प्राणा तरुणैणबलीष्टदा ॥७१॥ तरुणाजबलिप्रीता तरुणाजबलिप्रिया ॥ तरुणाजबलिप्राणा तरुणाजबलिप्रभुक् ॥७२॥ तरुणादित्यसङ्काशा तरुणादित्यविग्रहा ॥ तरुणादित्यरुचिरा तरुणादित्यनिर्मला ॥७३॥ तरुणादित्यनिलया तरुणादित्यमंडला ॥ तरुणादित्यललिता तरुणादित्य कुण्डला ॥७४॥ तरुणार्कसमज्योत्स्ना तरुणार्कसमप्रभा ॥ तरुणार्कप्रतीकाशा तरुणार्कप्रवर्द्धिता ॥७५॥ तरुणारुणनेत्रा च तरुणारुणलोचना ॥ तरुणारुणगात्रा च तरुणारुणभूषणा ॥ ७६ ॥ तरुणीदत्तसंकेता तरुणीदत्तभूषणा ॥ तरुणीगणसंतुष्टा तरुणी तरुणीमणिः ॥ ७७ ॥ तरुणीमणिसंसेव्या तरुणीमणिवंदिता ॥ तरुणीमणिसंतुष्टा तरुणीमणिपूजिता ॥ ७८ ॥ तरुणीवृन्दसंवंद्या तरुणीवृन्दवन्दिता ॥ तरुणी वृन्दसंस्तुत्या तरुणीवृन्दमानदा ॥ ७९ ॥ तरुणीवृन्दमध्यस्था तरुणीवृन्दवेष्टिता ॥ तरुणीवृन्दसंप्रीता तरुणीवृन्दभूषिता ॥ ८० ॥ तरुणीजयसंसिद्धा तरुणीजयमोक्षदा ॥ तरुणीपूजकासक्ता तरुणीपूजकार्थिनी ॥८१॥ तरुणीपूजकश्रीदा तरुणीपूजकार्तिहा ॥ तरुणीपूजक प्राणा तरुणीनिन्दकार्त्तिदा ॥ ८२ ॥ तरुणीकोटिनिलया तरुणीकोटिविग्रहा ॥ तरुणीकोटिमध्यस्था तरुणीकोटिवेष्टिता ॥ ८३ ॥ तरुणी कोटिदुःसाध्या तरुणीकोटिविग्रहा ॥ तरुणीकोटिरुचिरा तरुणी तरुणीश्वरी ॥ ८४ ॥ तरुणीमणिहाराढ्या तरुणीमणिकुण्डला ॥ तरुणी मणिसंहृष्टा तरुणीमणिमण्डिता ॥ ८५ ॥ तरुणीसरणिप्रीता तरुणीसरणीरता ॥ तरुणीसरणिस्थाना तरुणीसरणीमता ॥ ८६ ॥ तरणी मण्डलश्रीदा तरणीमण्डलेश्वरी ॥ तरणीमण्डलश्रद्धा तरणीमण्डलस्थिता ॥ ८७ ॥ तरणीमण्डलार्घ्याढ्या तरणीमण्डलार्चिता ॥ तरणी मण्डलध्येया तरणीभवसागरा ॥ ८८ ॥ तरणीकरणासक्ता तरणीतक्षकार्चिता ॥ तरणीतक्षकश्रीदा तरणीतक्षकार्थिनी ॥ ८९ ॥ तरीतरण शीला च तरीतरणतारिणी ॥ तरीतरणसंवेद्या तरीतरणकारिणी ॥ ९० ॥ तरुरूपा तरुस्था तरुस्तरुलतामयी ॥ तरुयूपा तरुस्था च तरु मध्यनिवासिनी ॥ ९१ ॥ तप्तकाञ्चनगेहस्था तप्तकाञ्चनभूमिका ॥ तप्तकाञ्चनप्राकारा तप्तकाञ्चनपादुका ॥ ९२ ॥ तप्तकाञ्चनदीप्तांगी तप्तकाञ्चनसन्निभा ॥ तप्तकाञ्चनगौरांगी तप्तकाञ्चनमञ्चगा ॥ ९३ ॥ तप्तकाञ्चनवस्त्राढ्या तप्तकाञ्चनरूपिणी ॥ तप्तकाञ्चनमध्यस्था तप्त काञ्चनकारिणी ॥ ९४ ॥ तप्तकाञ्चनमासाचर्या तप्तकाञ्चनपात्रभुक् ॥ तप्तकाञ्चनशैलस्था तप्तकाञ्चनकुण्डला ॥ ९५ ॥ तप्तकाञ्चनक्षेत्राढ्या

मं० म० तप्तकाञ्चनदण्डधृक् ॥ तप्तकाञ्चनभूषाढ्या तप्तकाञ्चनदानदा ॥ ९६ ॥ तप्तकाञ्चनदेशेशी तप्तकाञ्चनचापधृक् ॥ तप्तकाञ्चनतूणाढ्या तप्त म० खं० २
॥४४४॥ काञ्चनबाणभृत् ॥ ९७ ॥ तलातलविधात्री च तलातलविधायिनी॥तलातलस्वरूपेशी तलातलविहारिणी ॥९८॥ तलातलजनासाध्या तला ता० तं०
तलजनेश्वरी ॥ तलातलजनाराध्या तलातलजनार्थदा ॥ ९९ ॥ तलातलजयाभाक्षी तलातलजचञ्चला ॥ तलातलजरत्नाढ्या तलातलज तरं० ९
देवता ॥ १०० ॥ तटिनीस्थानरसिका तटिनीतटवासिनी ॥ तटिनी तटिनीतीरगामिनी तटिनीप्रिया ॥१०१॥ तटिनीप्लवनप्रीता तटिनी
प्लवनोद्यता॥तटिनीप्लवनश्लाघ्या तटिनीप्लवनार्थदा॥ १०२ ॥तटलास्या तटस्थाना तटेशी तटवासिनी॥तटपूज्या तटाराध्या तटरोमसुखा
र्थिनी॥१०३॥तटजा तटरूपा च तटस्था तटचञ्चला॥तटसन्निधिगेहस्था सहिता तटशायिनी ॥ १०४ ॥ तरंगिणी तरंगाभा तरंगायत
लोचना ॥ तरंगसमदुर्द्धर्षा तरंगसमचञ्चला ॥१०५॥ तरंगसमदीर्घांगी तरंगसमवर्द्धिता ॥ तरंगसमसंवृद्धिस्तरंगसमनिर्मला ॥ १०६ ॥
तडागमध्यनिलया तडागमध्यसंभवा ॥ तडागरचनश्लाघ्या तडागरचनोद्यता ॥ १०७ ॥ तडागकुमुदामोदी तडागेशी तडागिनी ॥
तडागनीरसंस्नाता तडागनीरनिर्मला ॥ १०८ ॥ तडागकमलागारा तडागकमलालया ॥ तडागकमलांतस्था तडागकमलोद्यता॥
॥ १०९ ॥ तडागकमलांगी च तडागकमलानना ॥ तडागकमलप्राणा तडागकमलेक्षणा ॥ ११० ॥ तडागरक्तपद्मस्था तडागश्वेत
पद्मगा ॥ तडागनीलपद्माभा तडागनीलपद्मभृत् ॥ १११ ॥ तनुस्तनुगता तन्वी तन्वंगी तनुधारिणी ॥ तनुरूपा तनुगता तनुधृक्तनु
रूपिणी ॥ ११२ ॥ तनुस्था तनुमध्यांगी तनुकृत्तनुमंगला ॥ तनुसेव्या तु तनुजातनुजा तनुसंभवा ॥ ११३ ॥ तनुभृत्तनुसंभूता
तनुदा तनुकारिणी ॥ तनुभृत्तनुसंहंत्री तनुसंचारकारिणी ॥ ११४ ॥ तथ्यवाक् तथ्यवचना तनुकृत्तथ्यवादिनी ॥ तथ्यभृत्तथ्य
चरिता तथ्यधर्मानुवर्तिनी ॥ ११५ ॥ तथ्यभुक्तथ्यगमना तथ्यभक्तिवरप्रदा ॥ तथ्यनीचेश्वरी तथ्यचित्ताचाराशुसिद्धिदा ॥ ॥४४४॥
॥ ११६ ॥ तर्क्यातर्क्यस्वभावा च तर्कदा या तु तर्ककृत् ॥ तर्काध्यापनमध्यस्था तर्काध्यापनकारिणी ॥ ११७ ॥ तर्का
ध्यापनसंतुष्टा तर्काध्यापनरूपिणी ॥ तर्काध्यापनसंशीला तर्कार्थप्रतिपादिता ॥ ११८ ॥ तर्काध्यापनसंतृप्ता तर्कार्थप्रतिपादिका ॥ तर्क

वादाश्रितपदा तर्कवादविवर्द्धिनी ॥ ११९ ॥ तर्कवादैकनिपुणा तर्कवादप्रचारिणी ॥ तमालदलश्यामांगी तमालदलमालिनी ॥
॥ १२० ॥ तमालवनसङ्केता तमालपुष्पपूजिता ॥ तगरी तगराराद्ध्या तगरार्चितपादुका ॥ १२१ ॥ तगरस्रक्कुसुसंतुष्टा
तगरस्रग्विराजिता ॥ तमराहुतिसंतुष्टा तगराहुतिकीर्तिदा ॥ १२२ ॥ तगराहुतिसांसिद्धा तगराहुतिमानदा ॥ तडित्तडि
ल्लताकारा तडिच्चश्चललोचना ॥ १२३ ॥ तडिल्लता तडित्तन्वी तडिद्दीप्ता तडित्प्रभा ॥ तद्रूपा तत्स्वरूपेशी तन्मयी तत्त्व
रूपिणी ॥ १२४ ॥ तत्स्थानदाननिरता तत्कर्मफलदायिनी ॥ तत्त्वकृत्तत्त्वदा तत्त्वा तत्त्ववित्तत्त्वतर्पिता ॥ १२५ ॥
तत्त्वाचर्या तत्त्वपूज्या च तत्त्वाराध्या तत्त्वरूपिणी ॥ तत्त्वज्ञानप्रदानेशी तत्त्वज्ञानसुमोक्षदा ॥ १२६ ॥ त्वरिता त्वीरतप्रीता त्वरितार्त्ति
विनाशिनी ॥ त्वरितासवसंतुष्टा त्वरितासवतर्पिता १२७ ॥ त्वग्वस्त्रा त्वक्परीधाना तरला तरलेक्षणा ॥ तरक्षुचर्मवसना तरक्षु
त्वग्विभूषणा ॥ १२८ ॥ तरक्षुस्तरक्षुप्राणा तरक्षुपृष्ठगामिनी ॥ तरक्षुपृष्ठसंस्थाना तरक्षुपृष्ठवासिनी ॥ १२९ ॥ तर्पितोदैस्तर्पणाशा तर्पणा
सक्तमानसा तर्पणानन्दहृदया तर्पणाधिपतिस्तातिः ॥ १३० ॥ त्रयीमयी त्रयीसेव्या त्रयीपूज्या त्रयीकथा ॥ त्रयीभव्या त्रयी
भाव्या त्रयीहव्या त्रयीयुता ॥ १३१ ॥ त्र्यक्षरी त्र्यक्षरेशानी त्र्यक्षरीशीघ्रसिद्धिदा ॥ त्र्यक्षरेशी त्र्यक्षरीस्था त्र्यक्षरीपुरुषास्पदा ॥
॥ १३२ ॥ तपता तपनेष्टा च तपस्तपनकन्यका ॥ तपनांशुसमासह्या तपनकोटिकांतिकृत् ॥ १३३ ॥ तपनीया तल्पगता तल्पातल्प
विधायिनी ॥ तल्पकृत्तल्पगा तल्पदात्री तल्पतलाश्रया ॥ १३४ ॥ तपनीयतलारात्रीं तपनीयांशुप्रार्थिनी ॥ तपनीयप्रदा तप्ता तपनीया
द्रिसंस्थिता ॥ १३५ ॥ तल्पेशी तल्पदा तल्पसंस्थिता तल्पवल्लभा ॥ तल्पप्रिया तल्परता तल्पनिर्माणकारिणी ॥ १३६ ॥
तरसापूजनासक्ता तरसावरदायिनी ॥ तरसासिद्धिसंधात्री तरसामोक्षदायिनी ॥ १३७ ॥ तापसी तापसाराध्या तापसार्तिविनाशिनी ॥
तापसार्ता तापसश्रीस्तापसप्रियवादिनी ॥ १३८ ॥ तापसानन्दहृदया तापसानन्ददायिनी ॥ तापसाश्रितपदाब्जा तापसासक्तमानसा ॥
॥ १३९ ॥ तामसी तामसीपूज्या तामसीप्रणयोत्सुका ॥ तामसी तामसीप्रीता तामसीशीघ्रसिद्धिदा ॥ १४० ॥ तालेशी ताल

भुक्तालदात्री तालोपमस्तनी ॥ तालवृक्षस्थिता तालवृक्षजा तालरूपिणी ॥ १४१ ॥ तार्क्ष्या तार्क्ष्यसमारूढा तार्क्ष्येशी तार्क्ष्य
पूजिता ॥ तार्क्ष्येश्वरी तार्क्ष्यमाता तार्क्ष्येशवरदायिनी ॥ १४२ ॥ तापी तु तापिनी तापसंहर्त्री तापनाशिनी ॥ तापदात्री तापकर्त्री
तापविध्वंसकारिणी ॥ १४३ ॥ त्रासकर्त्री त्रासदात्री त्रासहर्त्री च त्रासहा ॥ त्रासिता त्रासरहिता त्रासनिर्मूलकारिणी ॥ १४४ ॥
त्राणकृत् त्राणसंशीला तानेशी तानदायिनी ॥ तानगानरता तानकारिणी तानगायिनी ॥ १४५ ॥ तारुण्यामृतसम्पूर्णा तारुण्या
मृतवारिधिः ॥ तारुण्यामृतसंतुष्टा तारुण्यामृततर्पिता ॥ १४६ ॥ तारुण्यामृतपूर्णांगी तारुण्यामृतविग्रहा ॥ तारुण्यगुणसम्पन्ना
तारुण्योक्तिविशारदा ॥ १४७ ॥ ताम्बूली ताम्बुलेशानी ताम्बूलचर्वणोद्यता ॥ ताम्बूलपूरितास्या च ताम्बूलारुणिताधरा ॥
॥ १४८ ॥ ताटंकरत्नविख्यातिस्ताटंकरत्नभूषिणी ॥ ताटंकरत्नमध्यस्था ताटंकद्वयभूषिता ॥ १४९ ॥ तिथीशा तिथिसम्पूज्या तिथिस्था
तिथिरूपिणी ॥ तिथित्रितयवास्तव्या तिथीशवरदायिनी ॥ १५० ॥ तिलोत्तमादिकाराध्या तिलोत्तमादिकप्रभा ॥ तिलोत्तमा तिलप्रेक्ष्या
तिलाराध्या तिलार्चिता ॥ १५१ ॥ तिलभुक् तिलसंदात्री तिलतुष्टा तिलालया ॥ तिलदा तिलसंकाशा तिलतैलविधायिनी ॥ १५२ ॥
तिलतैलोपलिप्तांगी तिलतैलसुगंधिनी ॥ तिलाज्यहोमसंतुष्टा तिलाज्यहोमसिद्धिदा ॥१५३॥ तिलपुष्पाञ्जलिप्रीता तिलपुष्पाञ्जलिप्रिया ॥
तिलपुष्पाञ्जलिश्रेष्ठा तिलपुष्पाघनाशिनी ॥१५४॥ तिलकाश्रितसिंदूरा तिलकांकितचन्दना ॥ तिलकाहृतकस्तूरी तिलकामोदमोहिनी
॥ १५५ ॥ त्रिगुणा त्रिगुणाकारा त्रिगुणान्वितविग्रहा ॥ त्रिगुणाकारविख्याता त्रिमूर्तिस्त्रिगुणात्मिका ॥ १५६ ॥ त्रिशिरा
स्त्रिपुरेशानी त्रिपुरा त्रिपुरेश्वरी ॥ त्रिपुरेशी त्रिलोकस्था त्रिपुरी त्रिपुराम्बिका ॥ १५७ ॥ त्रिपुरारिसमाराध्या त्रिपुरा
रिवरप्रदा ॥ त्रिपुरारिशिरोभूषा त्रिपुरारिसुखप्रदा ॥ १५८ ॥ त्रिपुरारीष्टसन्दात्री त्रिपुरारीष्टदेवता ॥ त्रिपुरारिकृतार्द्धांगी
त्रिपुरारिविलासिनी ॥ १५९ ॥ त्रिपुरासुरसंहर्त्री त्रिपुरासुरमर्दिनी ॥ त्रिपुरासुरसंसेव्या त्रिपुरासुरवर्यथपा ॥ १६० ॥
त्रिकूटा त्रिकुटाराध्या त्रिकूटार्चितविग्रहा ॥ त्रिकूटाचलमध्यस्था त्रिकूटाचलवासिनी ॥ १६१ ॥ त्रिकूटाचलसञ्जाता त्रिकूटाचल

निर्गता ॥ त्रिकूटा त्रिजटेशानी त्रिजटावरदायिनी ॥ १६२ ॥ त्रिनेत्रेशी त्रिनेत्रा च त्रिनेत्रवरवर्णिनी ॥ त्रिवली त्रिवलीयुक्ता त्रिशूलवरधारिणी ॥ १६३ ॥ त्रिशूलेशी त्रिशूलीशी त्रिशूलभृत्त्रिशूलिनी ॥ त्रिमनुस्त्रिमनूपास्या त्रिमनूपासकेश्वरी ॥ १६४ ॥ त्रिमनुजपसंतुष्टा त्रिमनोस्तूर्णसिद्धिदा ॥ त्रिमनपजनप्रीता त्रिमनुध्यानमोक्षदा ॥ १६५ ॥ त्रिविधा त्रिविधाभक्तिस्त्रिमता त्रिमतेश्वरी ॥ त्रिभावस्था त्रिभावेशी त्रिभावपरिपूरिता ॥ १६६ ॥ त्रितत्त्वात्मा त्रितत्त्वेशी त्रितत्त्वज्ञा त्रितत्त्वधृक् ॥ त्रितत्त्वाचमनप्रीता त्रितत्त्वाचमनेष्टदा ॥ १६७ ॥ त्रिकोणस्था त्रिकोणेशी त्रिकोणचक्रवासिनी ॥ त्रिकोणचक्रमध्यस्था त्रिकोणबिंदुरूपिणी ॥ ॥ १६८ ॥ त्रिकोणयंत्रसंस्थाना त्रिकोणयंत्ररूपिणी ॥ त्रिकोणयंत्रसंपूज्या त्रिकोणयंत्रसिद्धिदा ॥ १६९ ॥ त्रिवर्गाढ्या त्रिवर्णेशी त्रिवर्णोपास्यरूपिणी ॥ त्रिवर्णस्था त्रिवर्णाढ्या त्रिवर्णावरदायिनी ॥ १७० ॥ त्रिवर्णाद्या त्रिवर्णार्च्या त्रिवर्गफलदायिनी ॥ त्रिवर्गाढ्या त्रिवर्गेशी त्रिवर्गाद्यफलप्रदा ॥ १७१ ॥ त्रिसंध्यार्च्या त्रिसंध्येशी त्रिसंध्याराधनेष्टदा ॥ त्रिसंध्यार्चनसंतुष्टा त्रिसंध्याजपमोक्षदा ॥ १७२ ॥ ॥ त्रिपदाराधितपदा त्रिपदा त्रिपदेश्वरी ॥ त्रिपदाप्रदिपाद्येशी त्रिपदाप्रतिपादिका ॥ १७३ ॥ त्रिशक्तिश्च त्रिशक्तीशी त्रिशक्तेष्टफलप्रदा ॥ त्रिशक्तेष्टा त्रिशक्तीष्टा त्रिशक्तिपरिवेष्टिता ॥ १७४ ॥ त्रिवेणीच त्रिवेणीश्री त्रिवेणी माधवार्चिता ॥ त्रिवेणीजलसंतुष्टा त्रिवेणीस्नानपुण्यदा ॥ १७५ ॥ त्रिवेणीजलसंस्नाता त्रिवेणीजलरूपिणी ॥ त्रिवेणीजलपुतांगी त्रिवेणीजलपूजिता ॥ १७६ ॥ त्रिनाडीस्था त्रिनाडीशी त्रिनाडीमध्यगामिनी ॥ त्रिनाडीसंध्यसञ्ज्ञेया त्रिनाडी च त्रिकोटिनी ॥ ॥ १७७ ॥ त्रिपञ्चाशात्त्रिरेखा च त्रिशक्तिपथगामिनी ॥ त्रिपथस्था त्रिलोकेशी त्रिकोटिकुलमोक्षदा ॥ १७८ ॥ त्रिरामेशी त्रिरामार्च्या त्रिरामवरदायिनी ॥ त्रिदशाश्रितपादाब्जा त्रिदशालयचञ्चला ॥ १७९ ॥ त्रिदशा त्रिदशप्रार्थ्या त्रिदशाशुवरप्रदा ॥ त्रिदशैश्वर्यसम्पन्ना त्रिदशेश्वरसेविता ॥ १८० ॥ त्रियामार्च्या त्रियामेशी त्रियामानंतसिद्धिदा ॥ त्रियामेशाधिकज्योत्स्ना त्रियामेशाधिकानना ॥ १८१ ॥ त्रियामानाथवत्सौम्या त्रियामानाथभूषणा ॥ त्रियामानाथलावण्या रत्नकोटियतानना ॥ १८२ ॥

त्रिकालस्था त्रिकालज्ञा त्रिकालज्ञत्वकारिणी ॥ त्रिकालेशी त्रिकालार्च्या त्रिकालज्ञत्वदायिनी ॥ १८३ ॥ तीरभुक्तीरगा तीरसारिता तारवीसर्ना ॥ तीरभुग्देशसंजाता तीरभुग्देशसंस्थिता ॥ १८४ ॥ तिग्मा तिग्मांशुसंकाशा तिग्मांशुक्रोडसंस्थिता ॥ तिग्मांशुकोटि दीप्तांगी तिग्मांशुकोटिविग्रहा ॥ १८५ ॥ तीक्ष्णा तीक्ष्णतरा तीक्ष्णमाहिषासुरमर्दिनी ॥ तीक्ष्णकर्त्रीलसत्पाणिस्तीक्ष्णासिवरधारिणी ॥ ॥ १८६ ॥ तीव्रा तीव्रगतिस्तीव्रासुरसंघविनाशिनी ॥ तीव्राष्टनागाभरणा तीव्रमुण्डविभूषणा ॥ १८७ ॥ तीर्थात्मिका तीर्थमयी तीर्थेशी तीर्थपूजिता ॥ तीर्थराजेश्वरी तीर्थफलदा तीर्थदानदा ॥ १८८ ॥ तुमुली तुमुलप्राज्ञी तुमुलासुरघातिनी ॥ तुमुलक्षतजप्रीता तुमुलांगणनर्तकी ॥ १८९ ॥ तुरगी तुरगारूढा तुरंगपृष्ठगामिनी ॥ तुरंगगमनाह्लादा तुरंगवेगगामिनी ॥ १९० ॥ तुरीया तुलना तुल्या तुल्यवृत्तिस्तु तुल्यकृत् ॥ तुलनेशी तुलाराज्ञी तुलाराज्ञीत्वसूक्ष्मवित् ॥ १९१ ॥ तुम्बिका तुम्बिकापात्रभोजना तुम्बिका र्थिनी ॥ तुलसी तुलसीवर्य्या तुलजा तुलजेश्वरी ॥ १९२ ॥ तुषाग्निव्रतसंतुष्टा तुषाग्निस्तुषराशिकृत् ॥ तुषारकरशीतांगी तुषारकर पूर्तिकृत् ॥ १९३ ॥ तुषाराद्रिस्तुषाराद्रिसुता तुहिनदीधितिः ॥ तुहिनाचलकन्या च तुहिनाचलवासिनी ॥ १९४ ॥ तुर्यवर्गेश्वरी तुर्यवर्गदा तुर्य्यवेददा ॥ तुर्य्यवर्य्यात्मिका तुर्य्यतुर्य्येश्वरस्वरूपिणी ॥ १९५ ॥ तुष्टिदा तुष्टिकृत्तुष्टिस्तूणीरद्वयपृष्ठधृक् ॥ तुम्बुराज्ञान संतुष्टा तुष्टसंसिद्धिदायिनी ॥ १९६ ॥ तूर्णराज्यप्रदा तूर्णगद्यदा तूर्णपद्यदा ॥ तूर्णपाण्डित्यसन्दात्री तूर्णपूर्णबलप्रदा ॥ १९७ ॥ तृतीया च तृतीयेशी तृतीयातिथिपूजिता ॥ तृतीयाचन्द्रचूडेशी तृतीयाचन्द्रभूषणा ॥ १९८ ॥ तृप्तिस्तृप्तिकरी तृप्ता तृष्णा तृष्णा विवर्द्धिनी ॥ तृष्णापूर्णकरी तृष्णानाशिनी तृषिता तृषा ॥ १९९ ॥ त्रेतासंसाधिता त्रेता त्रेतायुगफलप्रदा ॥ त्रैलोक्यपूज्या त्रैलोक्य दात्री त्रैलोक्यसिद्धिदा ॥ २०० ॥ त्रैलोक्येश्वरतादात्री त्रैलोक्यपरमेश्वरी ॥ त्रैलोक्यमोहनेशानी त्रैलोक्यराज्यदायिनी ॥ २०१ ॥ तैत्रिशाखेश्वरी तैत्रिशाखा तैत्रविवेकदा ॥ तोरणान्वितगेहस्था तोरणासक्तमानसा ॥ २०२ ॥ तोलकास्वर्णसंदात्री तोलकास्वर्ण कंकणा ॥ तोमरायुधरूपा च तोमरायुधधारिणी ॥ २०३ ॥ तौर्य्यत्रिकेश्वरी तौर्यत्रिकी तौर्य्यत्रिकोत्सुकी ॥ तंत्रकृत्तंत्रवरसूक्ष्मा तंत्र

मंत्रस्वरूपिणी ॥ २०४ ॥ तंत्रकृत्तंत्रसंपूज्या तंत्रेशी तंत्रसम्मता ॥ तंत्रज्ञा तंत्रवित्तंत्रसाध्या तंत्रस्वरूपिणी ॥ २०५ ॥ तंत्रस्था तंत्रजा तंत्री तंत्रभृत्तंत्रमंत्रदा ॥ तंत्राद्या तंत्रगा तंत्रा तंत्राचर्या तंत्रसिद्धिदा ॥ २०६ ॥ इति ते कथितं दिव्यं क्रतुकोटिफलप्रदम् ॥ नाम्नां सहस्रं तारायास्तकाराद्यं सुगोपितम् ॥ २०७ ॥ दानं यज्ञस्तपस्तीर्थं व्रतं चानशनादिकम् ॥ एकैकनाम संपुण्यं संध्यासु गदितं मया ॥ २०८ ॥ गुरौ देवे तथा मंत्रे यस्य स्यान्निश्चला मतिः ॥ तस्यैव स्तोत्रपाठेऽस्मिन्संभवेदधिकारिता ॥ २०९ ॥ महाचीनक्रमाभिन्नषोढान्यस्तकलेवरः ॥ क्रमदीक्षान्वितो मंत्री पठेदेतन्न चान्यथा ॥ २१० ॥ गंधपुष्पादिभिर्द्रव्यैर्मकारैः पंचभिर्द्विजः ॥ संपूज्य तारां विधिवत्पठेदेतदनन्यधीः ॥ २११ ॥ अष्टम्यां च चतुर्दश्यां संक्रांतौ रविवासरे ॥ शनिभौमदिने रात्रौ ग्रहणे चन्द्रसूर्ययोः ॥ २१२ ॥ ताराराात्रौ कालरात्रौ मोहरात्रौ विशेषतः ॥ पठनान्मंत्रसिद्धिः स्यात्सर्वज्ञत्वं प्रजायते ॥ २१३ ॥ श्मशाने प्रांतरे रम्ये शून्यागारे विशेषतः ॥ देवागारे गिरौ वापि स्तवपारायणं चरेत् ॥ २१४ ॥ ब्रह्महत्या सुरापानं स्तेयं स्त्रीगमनादिकम् ॥ गुरुतल्पे तथा चान्यत्पातकं नश्यति ध्रुवम् ॥ २१५ ॥ लतामध्यगतो मंत्री श्रद्धया चार्चयेद्यदि ॥ आकर्षयेत्तदा रम्भां मेनामपि तथोर्वशीम् ॥ २१६ ॥ संग्रामसमये वीरस्तारासाम्राज्यकीर्त्तनात् ॥ चतुरंगचयं जित्वा सर्वसाम्राज्यभाग्भवेत् ॥ ॥ २१७ ॥ निशार्द्धे पूजनांते च प्रतिनाम्ना प्रपूजयेत् ॥ एकैकं करवीराद्यैर्मंदारैर्नीलशारिजैः ॥ २१८ ॥ गद्यपद्यमयी वाणी भूभोज्या च प्रवर्तते ॥ पाण्डित्यं सर्वशास्त्रेषु वादी त्रस्यति दर्शनात् ॥ २१९ ॥ वह्निजायांतकैरेतैस्ताराद्यैः प्रतिनामभिः ॥ राजन्यं सर्वराजेषु परकायप्रवेशनम् ॥ २२० ॥ अंतर्धानं खेचरत्वं बहुकायप्रकाशनम् ॥ गुटिका पादुका पद्मावती मधुमती तथा ॥ २२१ ॥ रसं रसायनाः सर्वाः सिद्धयः समुपस्थिताः ॥ कर्पूरागरुकस्तूरीचन्दनैः संयुतैर्जलैः ॥ २२२ ॥ मूलसम्पुटितेनैव प्रतिनाम्ना प्रपूजयेत् ॥ यक्षराक्षसगंधर्वविद्याधरमहोरगाः ॥ २२३ ॥ भूतप्रेतपिशाचाद्या डाकिनीशाकिनीगणाः ॥ दुष्टभैरववेतालाः कूष्माण्डाः किन्नरीगणाः ॥ २२४ ॥ भयभीताः पलायंते तेजसा साधकस्य च ॥ मंत्रज्ञाने समुत्पन्ने प्रतिनाम्ना विचारयेत् ॥ २२५ ॥ मंत्रसम्पुटितेनैव तस्य शांति

भवेद्ध्रुवम् ॥ ललना वशमायांति दासतां यांति पार्थिवाः ॥ २२६ ॥ अग्नयः शीततां यांति जापकस्य च भाषणात् ॥ एकावर्तनमात्रेण राजभीतिनिवारणम् ॥ २२७ ॥ वेलावर्तनमात्रेण पशुवृद्धिः प्रजायते ॥ दशावृत्त्या धनप्राप्तिर्विंशत्या राज्यमाप्नुयात् ॥ २२८ ॥ शतावृत्त्या गृहे तस्य चंचला निश्चला भवेत् ॥ गंगाप्रवाहवद्वाणी प्रलापादपि जायते ॥ २२९ ॥ पुत्रपौत्रान्वितो मंत्री चिरंजीवी तु देववत् ॥ शतद्वयावर्त्तनेन देववत्पूज्यते जनैः ॥ २३० ॥ शतपञ्चकमावर्त्य स भवेद्भैरवोपमः ॥ सहस्रावर्तनेनैव मंत्रस्तस्य स्वसिद्धिदः ॥२३१॥ तस्मिन्प्रवर्त्तते सर्वासिद्धिः सर्वार्थसाधिनी ॥ पादुकांजनवेतालपातालगमनादिकम् ॥२३२॥ विविधा यक्षिणीसिद्धिर्वाक्सिद्धिस्तस्य जायते ॥ शोषणं सागराणां च धरायां भ्रमणं तथा ॥ २३३ ॥ नवीनसृष्टिनिर्माणं सर्वं कर्तुं क्षमो भवेत् ॥ अयुतावर्तनेनैव तारां पश्यति चक्षुषा ॥ २३४ ॥ लक्षावर्तनमात्रेण तारापतिसमो भवेत् ॥ न किंचिद्दुर्लभं तस्य जीवन्मुक्तो हि भूतले ॥ २३५ ॥ कल्पांतेन तु तत्पश्चात्तारासायुज्यमाप्नुयात् ॥ यद्धि तारासमा विद्या नास्ति तारुण्यरूपिणी ॥ २३६ ॥ न चैतत्सदृशं स्तोत्रं भवेद्ब्रह्माण्डमण्डले ॥ वक्त्रकोटिसहस्रैस्तु जिह्वाकोटिशतैरपि ॥ २३७ ॥ न शक्यते फलं वक्तु मया कल्पशतैरपि ॥ चुम्बके निन्दके दुष्टे पिशुने जीवहिंसके ॥ २३८ ॥ सगोप्यं स्तोत्रमेतत्तद्दर्शनेनैव कुत्रचित् ॥ राज्यं देयं धनं देयं शिरो देयमथापि वा ॥ २३९ ॥ न देयं स्तोत्रवर्य्यं तु मंत्रादपि महोद्यतम् ॥ अनुलोमविलोमाभ्यां मूलसंपुटितं त्विदम् ॥ २४० ॥ लिखित्वा भर्जपत्रादौ गंधाष्टकपुरस्सरैः ॥ धारयेद्दक्षिणे बाहौ कण्ठे वामभुजे तथा ॥ २४१ ॥ तस्य सर्वार्थसिद्धिः स्याद्वह्निना नैव दह्यते ॥ तद्गात्रं शस्त्रसंघैश्च भिद्यते न कदाचन ॥ २४२ ॥ स भूमिवलये पुत्र विचरेद्भैरवोपमः ॥ वंध्यापि लभते पुत्रं निर्द्धनो धनमाप्नुयात् ॥ २४३ ॥ निर्विघ्नो लभते विद्यां तर्कव्याकरणादिकाम् ॥ २४४ ॥ इति निगदितमस्यास्तादिनाम्नां सहस्रं वरदमनुनिधानं दिव्यसाम्राज्यसंज्ञम् ॥ विधिहरिगिरिशाद्यौ शक्तिदानैकदक्षं समविधि पठनीयं कालितारासमज्ञैः ॥ २४५ ॥ इति श्रीब्रह्मयामले तारायास्तकारादिसहस्रनामस्तोत्रं सम्पूर्णम् ॥

॥ अथ श्रीताराहृदयप्रारंभः ॥ श्रीशिव उवाच ॥ शृणु पार्वति भद्रं ते लोकानां हितकारकम् ॥ कथ्यते सर्वदा गोप्यं ताराहृदयमुत्त

मम् ॥ १ ॥ श्रीपार्वत्युवाच ॥ स्तोत्रं कथं समुत्पन्नं कृतं केन पुरा प्रभो ॥ कथ्यतां सर्वसद्वृत्तं कृपां कृत्वा ममोपरि ॥ २ ॥ श्रीशिव उवाच ॥ रणे देवासुरे पूर्वं कृतमिन्द्रेण सुप्रिये ॥ दुष्टशत्रुविनाशार्थं बलवृद्धियशस्करम् ॥ ३ ॥ ॐ अस्य श्रीमदुग्रताराहृदय स्तोत्रमंत्रस्य श्रीभैरवऋषिरनुष्टुप्छंदः श्रीमदुग्रतारादेवता स्त्रीं बीजं हूं शक्तिः नमः कीलकं सकलशत्रुविनाशार्थे पाठे विनियोगः ॥ ॐ स्त्रीं हृदयाय नमः १ । ॐ ह्रीं शिरसे स्वाहा २ । ॐ हूं शिखायै वषट् ३ । ॐ त्रीं कवचाय हुं ४ । ॐ ऐं नेत्रत्रयाय वौषट् ५ । ॐ हंसः अस्त्राय फट् ६ ॥ अथ ध्यानम्—ॐ ध्यायेत्कोटिदिवाकरद्युतिनिभां बालेन्दुयुक्छेखरां रक्तांगीं रसनां सुरक्तवसनां पूर्णेन्दुबिंबाननाम् ॥ पाशं कर्त्रिमहांकुशादि दधतीं दोर्भिश्चतुर्भिर्युतां नानाभूषणभूषितां भगवतीं तारां जगत्तारिणीम् ॥ ४ ॥ एवं ध्यात्वा शुभां तारां ततस्तु हृदयं पठेत् ॥ तारिणी तत्त्वनिष्ठानां सर्वतत्त्वप्रकाशिका ॥ ५ ॥ रामाभिन्ना परा शक्तिः शत्रुनाशं करोतु मे ॥ सर्वदा शत्रुसंरंभे तारा मे कुरुतां जयम् ॥ ६ ॥ स्त्रीं त्रीं स्वरूपिणी देवि त्रिषु लोकेषु विश्रुता ॥ तव स्नेहान्मयाख्यातं न पैशुन्यं प्रकाश्यताम् ॥ ७ ॥ शृणु देवि तव स्नेहात्तारानामानि तत्त्वतः ॥ वर्णयिष्यामि गुप्तानि दुर्लभानि जगत्त्रये ॥ ८ ॥ तारिणी तरला तारा त्रिरूपा तरणिप्रभा ॥ सत्त्वरूपा महासाध्वी सर्वसज्जनपालिका ॥ ९ ॥ रमणीया रजोरूपा जगत्सृष्टिकरी परा ॥ तमोरूपा महामाया घोररावा भयानका ॥ १० ॥ कालरूपा कालिकाख्या जगद्विध्वंसकारिका ॥ तत्त्वज्ञानपरानन्दा तत्त्वज्ञानप्रदाऽनघा ॥ ११ ॥ रक्तांगी रक्तवस्त्रा च रक्तमालाप्रशोभिता ॥ सिद्धिलक्ष्मीश्च ब्रह्माणी महाकाली महालया ॥ १२ ॥ नामान्येतानि ये मर्त्याः सर्वदैकाग्रमानसाः ॥ प्रपठंति प्रिये तेषां किंकरत्वं करोम्यहम् ॥ १३ ॥ तारां तारपरां देवीं तारकेश्वरपूजिताम् ॥ तारिणीं भवपाथोधेरुग्रतारां भजाम्यहम् ॥ १४ ॥ ॥ स्त्रींह्रींहूंत्रींफण्मंत्रेण जलं जप्त्वाऽभिषेचयेत् ॥ सर्वे रोगाः प्रणश्यंति सत्यं सत्यं वदाम्यहम् ॥ ॥ १५ ॥ त्रींस्वाहांतैर्महामंत्रैश्चन्दनं साधयेत्ततः ॥ तिलकं कुरुते प्राज्ञो लोको वश्यो भवेत्प्रिये ॥ १६ ॥ स्त्रींह्रींत्रींस्वाहामंत्रेण श्मशानं भस्म मंत्रयेत् ॥ शत्रोर्गृहे तत्प्रक्षेपाच्छत्रोर्मृत्युर्भविष्यति ॥ १७ ॥ ह्रींहूंस्त्रींफडंतमंत्रैः पुष्पं संशोध्य सप्तधा ॥ उच्चाटनं नय

स्याशु रिपूणां नैव संशयः ॥ १८ ॥ स्त्रींत्रींह्वींमंत्रत्रयेंन अक्षताश्चाभिमंत्रिताः ॥ तत्प्रतिक्षेपमात्रेण शीघ्रमायाति मानिनी ॥ १९ ॥
(हंसः ॐ ह्रींस्त्रींहूंहंसः) इति मंत्रेण जप्तेन शोधितं कज्जलं प्रिये ॥ तस्यैव तिलकं कृत्वा जगन्मोहं समाचरेत् ॥ २० ॥ तारायाः
हृदयं देवि सर्वपापप्रणाशनम् ॥ वाजपेयादियज्ञानां कोटिकोटिगुणोत्तरम् ॥ २१ ॥ गंगादिसर्वतीर्थानां फलं कोटिगुणात्स्मृतम् ॥ महा
दुःखे महारोगे संकटे प्राणसंशये ॥ २२ ॥ महाभये महाघोरे पठेत्स्तोत्रं महोत्तमम् ॥ सत्यं सत्यं मयोक्तं ते पार्वति प्राणवल्लभे ॥
॥ २३ ॥ गोपनीयं प्रयत्नेन न प्रकाश्यमिदं कचित् ॥ २४ ॥ इति श्रीभैरवीतंत्रे शिवपार्वतीसंवादे श्रीमदुग्रताराहृदयं सम्पूर्णम् ॥
अथ सरस्वतीस्तोत्रप्रारंभः ॥ ॐ अस्य श्रीवाग्वादिनीशारदामंत्रस्य मार्कंडेयाश्वलायनऋषिः ॥ स्रग्धरानुष्टुभौ छंदसी ॥ श्रीसरस्वती
देवता ॥ श्रीसरस्वतीप्रसादसिध्यर्थे जपे विनियोगः ॥ अथ ध्यानं— शुक्लां ब्रह्मविचारसारपरमाद्यां जगद्व्यापिनीं वीणापुस्तकधारिणी
मभयदां जाड्यांधकारापहाम् ॥ हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां वंदे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदम् ॥
॥ १ ॥ ब्रह्मोवाच ॥ ह्रींह्रींहृद्यैकविद्ये शशिरुचिकमलाकल्पविस्पष्टशोभे भव्ये भव्यानुकूले कुमतिवनदहे विश्ववंद्यांघ्रिपद्मे ॥ पद्मे
पद्मोपविष्टे प्रणतजनमनोमोदसंपादयित्रि प्रोत्फुल्लज्ञानकूटे हरिनिजदयिते देवि संसारसारे ॥ २ ॥ ऐंऐंऐंइष्टमंत्रे कमलभवमुखां
भोजरूपे स्वरूपे रूपारूपप्रकाशे सकलगुणमये निर्गुणे निर्विकारे ॥ न स्थूले नैव सूक्ष्मेऽप्यविदितविषये नापि विज्ञानतत्त्वे विश्वे
विश्वांतराले सुरवरनमिते निष्कले नित्यशुद्धे ॥ ३ ॥ ह्रींह्रींह्रींजापतुष्टे हिमरुचिमुकुटे वल्लकीव्यग्रहस्ते मातर्मातर्नमस्ते दह दह
जडतां देहि बुद्धिं प्रशस्ताम् ॥ विद्ये वेदांतगीते श्रुतिपरिपठिते मोक्षदे मुक्तिमार्गे मार्गातीतप्रभावे भव मम वरदा शारदे शुभ्रहारे ॥४ ॥
धींधींधींधारणाख्ये धृतिमतिनुतिभिर्नामभिः कीर्तनीये नित्ये नित्ये निमित्ते मुनिगणनमिते नूतने वै पुराणे ॥ पुण्ये पुण्यप्रभावे हरिहर
नमिते वर्णशुद्धे सुवर्णे मंत्रे मात्रार्थतत्त्वे मतिमति मतिदे माधवप्रीतिनादे॥५॥ह्रींक्ष्रींधींह्रींस्वरूपे दह दह दुरितं पुस्तकव्यग्रहस्ते संतुष्टा
कारचित्ते स्मितमुखि सुभगे जंभनि स्तंभविद्ये॥ मोहे मुग्धप्रबोधे मम कुरु सुमतिं ध्वांतविध्वंसनित्ये गीर्वाग्गौर्भारती त्वं कविवृषरसना

सिद्धिदा सिद्धिसाध्या ॥ ६ ॥ सौंसौंसौंशक्तिबीजे कमलभवमुखांभोजभूतस्वरूपे रूपारूपप्रकाशे सकलगुणमये निर्गुणे निर्विकारे ॥
न स्थूले नैव सूक्ष्मेऽप्यविदितविभवे जाप्यविज्ञानतत्त्वे विश्वे विश्वांतराले सुरगणनमिते निष्कले नित्यशुद्धे ॥ ७ ॥ स्तौमि त्वां
त्वां च वंदे भज मम रसनां मा कदाचित्त्यजेथा मा मे बुद्धिर्विरुद्धा भवतु न च मनो देवि मे जातु पापम् ॥ मा मे दुःखं कदाचिद्विपदि
च समयेऽप्यस्तु मेऽनाकुलत्वं शास्त्रे वादे कवित्वे प्रसरतु मम धीर्मास्तु कुंठा कदाचित् ॥ ८ ॥ इत्येतैः श्लोकमुख्यैः प्रतिदिनमुषसि
स्तौति यो भक्तिनम्रो देवीं वाचस्पतेरप्यतिमतिविभवो वाक्पटुर्नष्टपंकः ॥ स स्यादिष्टार्थलाभः सुतमिव सततं याति तं सा च देवी
सौभाग्यं तस्य लोके प्रसरति कविता विघ्नमस्तं प्रयाति ॥ ९ ॥ ब्रह्मचारी व्रती मौनी त्रयोदश्यां निरामिषः ॥ सारस्वतो नरः पाठात्स
स्यादिष्टार्थलाभवान् ॥ १० ॥ पक्षद्वयेऽपि यो भक्त्या त्रयोदश्येकविंशतिम् ॥ अविच्छेदं पठेद्धीमान्ध्यात्वा देवीं सरस्वतीम् ॥ ११ ॥
शुक्लांबरधरां देवीं शुक्लाभरणभूषिताम् ॥ वांछितं फलमाप्नोति स लोके नात्र संशयः ॥ १२ ॥ इति ब्रह्मा स्वयं प्राह सरस्वत्याः
स्तवं शुभम् ॥ प्रयत्नेन पठेन्नित्यं सोऽमृतत्वं प्रयच्छति ॥ १३ ॥ इति ब्रह्मपुराणे ब्रह्मणा कृतं सरस्वत्याः स्तोत्रं सम्पूर्णम् ॥
इति श्रीमंत्रमहार्णवे मध्यखण्डे तारातंत्रे पञ्चमस्तरङ्गः ॥ ५ ॥ ॥ छ ॥ ॥ ॥ ॥ ॥ छ ॥ ॥

षोडशी (त्रिपुसुंदरी) देव्यै नमः।



श्रीगणेशाय नमः ॥ अथ षोडशी (त्रिसुरसुंदरी) श्रीविद्यातंत्रं प्रारभ्यते ॥ तत्रादौ पटलप्रारंभः ॥ त्रिनेत्रं कमलाकांतं नृसिंहं चन्द्रशेखरम् ॥ नत्वा संक्षेपतो वक्ष्ये श्रीविद्यां मंत्रनायिकाम् ॥ १ ॥ इयं तु सुंदरी विद्या देवानामपि दुर्लभा ॥ गोपनीया प्रयत्नेन सर्व्वसम्पत्करी मता ॥ २ ॥ अपरीक्षितशिष्याय तां न दद्यात्कदाचन ॥ यदुच्चारणमात्रेण पापसंघः प्रलीयते ॥ आत्मा देयः शिरो देयं न देयः षोडशाक्षरः ॥ ३ ॥ मंत्रो यथा मंत्रोमहोदधौ–श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं कएईलह्रीं हसकहलह्रीं सकलह्रीं सौः ऐं क्लीं ह्रीं श्रीं ॥ इति षोडशाक्षरो मंत्रः ॥ अस्य विधानम्–अस्य त्रिपुरसुंदरीमंत्रस्य दक्षिणामूर्तिर्ऋषिः । पंक्तिश्छंदः । श्रीमत्रिपुरसुंदरी देवता । ऐं बीजम् । सौः शक्तिः । क्लीं कीलकम् । ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ दक्षिणामूर्तिऋषये नमः शिरसि १ । पंक्तिच्छंदसे नमः मुखे २ । श्रीमत्रिपुरसुंदरी देवतायै नमः हृदि ३ । ऐं बीजाय नमः गुह्ये ४ । सौः शक्तये नमः पादयोः ५ । क्लीं कीलकाय नमः नाभौ ६ । विनियोगाय नमः सर्वांगे ७॥ इति ऋष्यादि न्यासः ॥ ह्रीं श्रीं अं मध्यमाभ्यां नमः १ । ह्रीं श्रीं आं अनामिकाभ्यां नमः २ । ह्रीं श्रीं सौः कनिष्ठिकाभ्यां नमः ३ । ह्रीं श्रीं अं अगुष्ठाभ्यां नमः ४ । ह्रीं श्रीं आं तर्जनीभ्यां नमः ५ । ह्रीं श्रीं सौः करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करशुद्धिन्यासः ॥ ह्रीं श्रीं ह्रीं क्लीं सौः देव्यासनाय नमः

१ तंत्रांतरेऽपि–ह्रींकएईलह्रीं हसकहल ह्रीं सकलह्रीं इति षोडशाक्षरो मंत्रः । २ आनंदभैरवऋषिः । ३ देवीगायत्रीच्छंदः । ४ नाभौ । ५ स्वाधिष्ठाने । ६ मूलाधारे । ७ पादयोः ।

पादयोः १। ह्रीं श्रीं हैं हसक्लीं हसौः चक्रासनाय नमः जंघयोः २ । ह्रीं श्रीं हसैं हसक्लीं हसौः सर्वमंत्रासनाय नमः जानुनोः ३ । ह्रीं श्रीं ह्रीं क्लीं ब्लें साध्यसिद्धासनाय नमो लिंगे ४ ॥ इत्यासनन्यासः ॥ ह्रीं श्रीं क्लीं ऐं सौः हृदयाय नमः १। ॐ ह्रीं श्रीं शिरसे स्वाहा २ । कएईलह्रीं शिखायै वषट् ३। हसकहलह्रीं कवचाय हुम् ४। सकलह्रीं नेत्रत्रयाय वौषट् ५। सौः ऐं क्लीं ह्रीं श्रीं अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ जगद्वशीकरणसंमोहनन्यासौ विस्तरभयान्नोच्येते ॥ ॐ श्रीं नमः पादयोः १। ॐ ह्रीं नमः जंघयोः २ । ॐ क्लीं नमः जानुनोः ३ । ॐ ऐं नमः कटयोः ४ । ॐ सौः नमः लिंगे ५। ॐ ॐ नमः पृष्ठे ६। ॐ ह्रीं नमः नाभौ ७। ॐ श्रीं नमः पार्श्वयोः ८। ॐ कएईलह्रीं नमः स्तनयोः ९ । ॐ हसकहलह्रीं नमः अंसयोः १० । ॐ सकलह्रीं नमः कर्णयोः ११। ॐ सौः नमः ब्रह्मरंध्रे १२। ॐ ऐं नमः वक्त्रे १३। ॐ क्लीं नमः नेत्रयोः १४। ॐ ह्रीं नमः कर्णयोः १५। ॐ श्रीं नमः कर्णशष्कुल्योः १६ ॥ इति वर्णन्यासः ॥ अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः ब्लूं वशिनीवाग्देवतायै नमः शिरसि१। कं खं गं घं ङं क्लीं ह्रीं कामेश्वरीवाग्देवतायै नमो ललाटे २। चं छं जं झं ञं क्लीं मोहिनीवाग्देवतायै नमो भ्रूमध्ये ३। टं ठं डं ढं णं प्लूं विमलावाग्देवतायै नमः कंठे ४ । तं थं दं धं नं ज्म्रीं अरुणावाग्देवतायै नमो हृदि ५। पं फं बं भं मं ह्स्ल्व्यूं जयिनीवाग्देवतायै नमो नाभौ ६। यं रं लं वं झ्म्र्यूं सर्वेश्वरीवाग्देवतायै नमो मूलाधारे ७। शं षं सं हं ळं क्षं क्ष्म्रीं कौलिनीवाग्देवतायै नमः ऊर्वादिपादांतम् ८ । वाग्देवतायै नमः पादयोः ९ ॥ इति वाग्देवतान्यासः ॥ ॐ श्रीं नमः ब्रह्मरंध्रे १ । ॐ ह्रीं नमः ललाटे २ । ॐ क्लीं नमः नेत्रयोः ३। ॐ ऐं नमः कर्णयोः ४ । ॐ सौः नमः अंसयोः ५। ॐ ॐ नमः गंडयोः ६ । ॐ ह्रीं नमः दंतयोः ७ । ॐ श्रीं नमः ओष्ठयोः ८ । ॐ कएईलह्रीं नमः जिह्वायाम् ९ । ॐ हसकहलह्रीं नमः मुखे १० । ॐ सकलह्रीं नमः पृष्ठे ११ । ॐ सौः नमः सर्वांगे १२ । ॐ ऐं नमः हृदि १३ । ॐ क्लीं नमः स्तनयोः १४ ॐ ह्रीं नमः कुक्षौ १५ । ॐ श्रीं नमः लिंगे १६ । ॥ इति सृष्टिन्यासः ॥ ॐ श्रीं नमः अंगुष्ठयोः १ । ॐ ह्रीं नमः तर्जन्योः २ ।

ॐ क्लीं नमः मध्यमयोः ३ । ॐ ऐं नमः अनामिकयोः ४ । ॐ सौः नमः कनिष्ठिकयोः ५ । ॐ ॐ नमः ब्रह्मरंध्रे ६ । ॐ ह्रीं नमः मुखे ७ । ॐ श्रीं नमः हृदि ८ । ॐ कएईलह्रीं नमः नाभ्यादिपादांतम् ९ । ॐ हसकहलह्रीं नमः कंठादिनाभ्यंतम् १० । ॐ सकलह्रीं नमः ब्रह्मरंध्रात्कंठांतम् ११ । ॐ सौः नमः पदांगुष्ठयोः १२ । ॐ ऐं नमः पदतर्जन्योः १३ । ॐ क्लीं नमः पदमध्यमयोः १४ । ॐ ह्रीं नमः पदानामिकयोः १५ । ॐ श्रीं नमः पदकनिष्ठयोः १६ । इति स्थितिन्यासं कृत्वा पंचावृत्तिन्यासं कुर्यात् ॥ तद्यथा—ॐ श्रीं नमः मूर्ध्नि १ ॐ ह्रीं नमः वक्त्रे २ । ॐ क्लीं नमः दक्षनेत्रे ३ । ॐ ऐं नमः वामनेत्रे ४ । ॐ सौः नमः दक्षकर्णे ५ । ॐ ॐ नमः वामकर्णे ६ । ॐ ह्रीं नमः दक्षिणांसे ७ । ॐ श्रीं नमः वामांसे ८ । ॐ कएईलह्रीं नमः दक्षिणगंडे ९ । ॐ हसकहलह्रीं नमः वामगंडे १० । ॐ सकलह्रीं नमः ऊर्ध्वोष्ठे ११ । ॐ सौः नमः अधरोष्ठे १२ । ॐ ऐं नमः वक्त्रमध्ये १३ । ॐ क्लीं नमः ऊर्ध्वदंतपंक्तौ १४ । ॐ ह्रीं नमः अधोदंतपंक्तौ १५ । ॐ श्रीं नमः वदने १६ । इत्येको न्यासः ॥ १ ॥ ॐ श्रीं नमः शिखायाम् १ । ॐ ह्रीं नमः शिरसि २ । ॐ क्लीं नमः ललाटे ३ । ॐ ऐं नमः भ्रुवोः ४ । सौः नमः नासिकयोः ५ । ॐ ॐ नमः वक्त्रे ६ । ॐ ह्रीं नमः दक्षिणहस्तमूले ७ । ॐ श्रीं नमः दक्षिणकूर्परे ८ । ॐ कएईलह्रीं नमः दक्षिणमणिबंधे ९ । ॐ हसकहलह्रीं नमः दक्षहस्तांगुलिमूले १० । ॐ सकलह्रीं नमः दक्षहस्तांगुल्यग्रे ११ । ॐ सौः नमः वामहस्तमूले १२ । ॐ ऐं नमः वामकूर्परे १३ । ॐ क्लीं नमः वाममणिबंधे १४ । ॐ ह्रीं नमः वामहस्तांगुलिमूले १५ । ॐ श्रीं नमः वामहस्तांगुल्यग्रे १६ । इति द्वितीयो न्यासः ॥ २ ॥ ॐ श्रीं नमः शिरसि १ । ॐ ह्रीं नमः ललाटे २ । ॐ क्लीं नमः दक्षनेत्रे ३ । ॐ ऐं नमः वामनेत्रे ४ । सौः नमः मुखे ५ । ॐ ॐ नमः जिह्वायाम् ६ । ॐ ह्रीं नमः दक्षिणपादमूले ७ । ॐ श्रीं नमः दक्षिणजानुनि ८ । ॐ कएईलह्रीं नमः दक्षिणगुल्फे ९ । हसकह

१ मंत्रः पञ्चावृत्तिकृतो येन तद्वपतः भवेत् ।

लहीं नमः दक्षपादांगुलिमूले १०। ॐ सकलह्रीं नमः दक्षपादांगुल्यग्रे ११। ॐ सौः नमः वामपादमूले १२ । ॐ ऐं नमः वाम जानुनि १३ । ॐ क्लीं नमः वामगुल्फे १४। ॐ ह्रीं नमः वामपदांगुलिमूले १५ । ॐ श्रीं नमः वामपदांगुल्यग्रे १६ ॥ इति तृतीयो न्यासः॥ ३ ॥ ॐ श्रीं नमः शिरसि १ । ॐ ह्रीं नमः मुखे २। ॐ क्लीं नमः दक्षनेत्रे ३। ॐ ऐं नमः वामनेत्रे ४ । ॐ सौः नमः दक्षिणकर्णे ५। ॐ ॐ नमः वामकर्णे ६। ॐ ह्रीं नमः दक्षनाखापुटे ७। ॐ श्रीं नमः वामनासापुटे ८। ॐ कएईलह्रीं नमः दक्ष कपोले ९ । ॐ हसकहलह्रीं नमः वामकपोले १० । ॐ सकलह्रीं नमः ऊर्ध्वोष्ठे ११ । ॐ सौः नमः अधरोष्ठे १२। ॐ ऐं नमः ऊर्ध्वदंतपंक्तौ १३। ॐ क्लीं नमः अधोदंतपंक्तौ १४। ॐ ह्रीं नमः मूर्ध्नि १५। ॐ श्रीं नमः मुखे १६ ॥ इति चतुर्थो न्यासः ॥ ४ ॥ ॐ श्रीं नमः ललाटे १। ॐ ह्रीं नमः गले २। ॐ क्लीं नमः हृदि ३। ॐ ऐं नमः नाभौ ४ । ॐ सौः नमः मूलाधारे ५ । ॐ ॐ नमः ब्रह्मरंध्रे ६। ॐ ह्रीं नमः मुखे ७। ॐ श्रीं नमः गुदे ८ । ॐ कएईलह्रीं नमः आधारे ९ । ॐ हसकहलह्रीं नमः हृदि १० । ॐ सकलह्रीं नमः ब्रह्मरंध्रे ११ । ॐ सौः नमः दक्षिणहस्ते १२ । ॐ ऐं नमः वामहस्ते १३ । ॐ क्लीं नमः दक्षपादे १४। ॐ ह्रीं नमः वामपादे १५। ॐ श्रीं नमः हृदि १६ ॥ इति पंचमो न्यासः ॥ ५ ॥ इति न्यासपंचकं कृत्वा व्यापकं कुर्य्यात् । तद्यथा—ॐ श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं कएईलह्रीं हसकहलह्रीं सकलह्रीं सौं ऐं क्लीं ह्रीं श्रीं ॐ इति सर्वांगे ॥ १ ॥ ॐ श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं कएईलह्रीं हसकहलह्रीं सकलह्रीं सौः ऐं क्लीं ह्रीं श्रीं ॐ नमः इति हृदये ॥ २ ॥ इति विन्यस्य षोढा न्यासादीन् कुर्य्यात्। षोढान्यासादयो विस्तरभयान्नोक्तास्ते तारापटले अवलोक्य कार्याः। तथा च—षोढान्यासादयो न्यासाः कार्य्याः सौभाग्यवांछया ॥ नोच्यंते विस्तरभयान्नैव चावश्यकाश्च ते ॥ १ ॥ अथ तंत्रांतरे न्यासे विशेषः। ऐं क्लीं ह्रीं श्रीं भगवति महात्रिपुरसुंदरि स्वाहा। इति कुलुकां शिरसि १। ॐ सेतुं हृदि २ । ह्रीं महासेतुं कंठे ३। ह्रीं महासेतुं सहस्रारे ४। ॐ श्रीं अं एं क्लीं सौं अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं

सं हं क्षं इति निर्वाणनाभौ ५। क्लीं कामबीजं लिंगे ६। जिह्वायां मूलविद्यां विचिंत्य यथाशक्ति जपेत् ॥ इति कुकुकान्यासः ॥ ॐ अस्य श्रीरहस्यन्यासमंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुस्सामानि च्छन्दांसि चैतन्यशक्तिमहात्रिपुरसुन्दरी देवता कृताकृतन्यासपूर्णतासिद्धये विनियोगः ॥ ब्रह्मविष्णुमहेश्वरऋषिभ्यो नमः शिरसि १ । ऋग्यजुस्सामच्छन्दोभ्यो नमः मुखे २ । चैतन्यशक्तिमहात्रिपुरसुंदरीदेवतायै नमः हृदये ३ । विनियोगाय नमः पादयोः ४ । ऐं क्लीं सौं सौं क्लीं ऐं श्रीं ह्रीं हंसः सोहं सदाशिवासनायै महात्रिपुरसुंदर्य्यै नमः मूलाधारे १ । ऐं क्लीं सौं सौं क्लीं ऐं श्रीं ह्रीं हंसः सोहं रतिप्रियायै महात्रिपुरसुंदर्य्यै नमः स्वाधिष्ठाने २। ऐं क्लीं सौं सौं क्लीं ऐं श्रीं ह्रीं हंसः सोहं ज्ञानरूपायै महात्रिपुरसुंदर्य्यै नमः मणिपूरे ३ । ऐं क्लीं सौं सौं क्लीं ऐं श्रीं ह्रीं हंसः सोहं ध्यानरूपायै महात्रिपुरसुंदर्य्यै नमः अनाहते ४ । ऐं क्लीं सौं सौं क्लीं ऐं श्रीं ह्रीं हंसः सोहं विशुद्धस्वरूपायै महात्रिपुरसुंदर्य्यै नमः विशुद्धौ ५ । ऐं क्लीं सौं सौं क्लीं ऐं श्रीं ह्रीं हंसः सोहं स्वतंत्रस्वरूपायै महात्रिपुरसुंदर्य्यै नमः आज्ञायाम् ६। ऐं क्लीं सौं सौं क्लीं ऐं श्रीं ह्रीं हंसः सोहं आनंदरूपायै महात्रिपुरसुंदर्य्यै नमः सहस्रारे ७ ॥ इति रहस्यन्यासः ॥ ह्रीं कामाय नमः १ । क्लीं मन्मथाय नमः २। ऐं कन्दर्प्पाय नमः ३ । क्लूं मकरध्वजाय नमः ४। स्त्रीं मीनकेतवे नमः ५। ततः ऐं हृदयाय नमः १ । क्लीं शिरसे स्वाहा २ । सौं शिखायै वषट् ३। ऐं कवचाय हुम् ४ । क्लीं नेत्रत्रयाय वौषट् ५। सौं अस्त्राय फट् ६ ॥ इति कामन्यासः ॥ ऐं रत्यै नमः लिंगे १। क्लीं प्रीत्यै नमः हृदि २ । सौं मनोभवायै नमः भ्रूमध्ये ३ । सौं अमृतास्यायै नमः भ्रूमध्ये ४। क्लीं योगिन्यै नमः हृदि ५ । ऐं विश्वयोन्यै नमः लिंगे ६ ॥ इति रत्यादिन्यासः ॥ स्हौं ईशानाय मनोभवाय नमः शिरसि १ । स्हौं तत्पुरुषाय मकरध्वजाय नमः मुखे २ । स्हुं अघोरकुमाराय कंदर्पाय नमः हृदि ३। स्हीं वामदेवाय मन्मथाय नमः गुह्ये ४। स्हूं सद्योजाताय कामदेवाय नमः पादयोः ५ । स्हौं ईशानाय मनोभवाय नमः ऊर्ध्ववक्त्रे मस्तके १। स्हौं तत्पुरुषाय मकरध्वजाय नमः पूर्ववक्त्रे भाले २। स्हुं अघोरकुमाराय कन्दर्पाय नमः दक्षिणवक्त्रे दक्षकर्णे ३ । स्हीं वामदेवाय मन्मथाय नमः उत्तरवक्त्रे वामकर्णे ४ । स्हूं सद्योजाताय कामदेवाय

नमः पश्चिमवक्त्रे चूडाधः ५। इति मनोभवन्यासः॥ ह्रीं क्षोभणबाणाय नमः हृदि १। ह्रीं द्रावणबाणाय नमः शिरसि नमः २। क्लीं आकर्षणबाणाय नमः शिखायाम् ३। ब्लूं मोहनबाणाय नमः कवचम् ४। सः उन्मादनबाणाय नमः अस्त्रम् ५॥ इति बाणन्यासः॥ ऐं ह्रीं क्लीं अंगुष्ठाभ्यां नमः १ क्लां श्रीं सौः ऐं तर्जनीभ्यां नमः २। सौं औं ह्रीं श्रीं मध्यमाभ्यां नमः ३। ऐं कएईलह्रीं हसकहलह्रीं अनामिकाभ्यां नमः ४। क्लींसकलह्रीं कनिष्ठिकाभ्यां नमः ५। सौः सौः ऐं क्लीं ह्रीं श्रीं करतलकरपृष्ठाभ्यां नमः ६॥ ऐं ह्रीं श्रीं ऐं कएईलह्रीं सर्वज्ञायै महात्रिपुरसुंदर्य्यै हृदयाये नमः १। ऐं ह्रीं श्रीं क्लीं सहकहलह्रीं नित्यतृप्तायै महात्रिपुरसुन्दर्य्यै शिरसे स्वाहा २। ऐं ह्रीं श्रीं सौः सकलह्रीं अनादिबोधायै महात्रिपुरसुन्दर्य्यै शिखायै वषट् ३। ऐं ह्रीं श्रीं ऐं कएईलह्रीं स्वतंत्रायै महात्रिपुरसुंदर्य्यै कवचाय हुं ४। ऐं ह्रीं श्रीं क्लीं हसकहलह्रीं नित्यमलुप्तशक्तये महात्रिपुरसुंदर्य्यै नेत्रत्रयाय वौषट् ५। ऐं ह्रीं श्रीं सौः सकलह्रीं अनंतायै महात्रिपुरसुंदर्य्यै अस्त्राय फट् ६॥ इति स्वतंत्रन्यासः॥ इति तंत्रांतरोक्तन्यासं कृत्वा संक्षोभद्रावणाकर्षवश्योन्मादमहांकुशखेचरीबीजयोन्याख्येति नव मुद्राः प्रदर्शयेत्॥ अथ ध्यानम्—बालार्कायुततेजसं त्रिनयनां रक्तांबरोल्लासिनीं नानालंकृतिराजमानवपुषं बालोडुराट्शेखराम्॥ हस्तैरिक्षुधनुःसृणिं सुमशरं पाशं मुदा बिभ्रतीं श्रीचक्रस्थितसुंदरीं त्रिजगतामाधारभूतां स्मरेत्॥ १॥ इति ध्यात्वा मानसोपचारैः संपूजयेत्॥ ततः पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य 'ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः' इति संपूज्य पीठमध्ये ॐ ब्रं ब्रह्मप्रेताय नमः १। ॐ विं विष्णुप्रेताय नमः २। ॐ रुं रुद्रप्रेताय नमः ३। ॐ ईं ईश्वरप्रेताय नमः ४। ॐ सं सदाशिवप्रेताय नमः ५। ॐ सुं सुधार्णवासनाय नमः ६। ॐ प्रें प्रेतांबुजासनाय नमः ७। ॐ दिं दिव्यासनाय नमः ८। ॐ चं चक्रासनाय नमः ९। ॐ सं सर्वमंत्रासनाय नमः १०। ॐ सं साध्यसिद्धासनाय नमः ११॥ इति पूजयेत्॥ इति पीठदेवताः संपूज्य नव पीठशक्तीः पूजयेत्॥ तद्यथा—पूर्वाद्यष्टसु दिक्षु ॐ इच्छायै नमः १। ॐ ज्ञानायै नमः २। ॐ क्रियायै नमः ३। ॐ कामिन्यै नमः ४। ॐ कामदायिन्यै नमः ५। ॐ रत्यै नमः ६। ॐ रतिप्रियायै नमः ७। ॐ नंदायै नमः ८।

मध्ये ॐ मनोन्मन्यै नमः ९ ॥ इति नव पीठशक्तीः पूजयेत् ॥ ततः स्वर्णादियंत्रं ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संप्रोञ्छ्य तदुपरि देव्यष्टगंधेन बिंदुगर्भं त्रिकोणाष्टदलं द्वादशदलं चतुर्दशदलाष्टदलषोडशत्रिकोणरूप दलं च तस्योपरि त्रिरेखात्मकभूपुरं च लिखित्वा 'ऐं परायै अपरायै परापरायै ह्सौः सदाशिवमहाप्रेतपद्मासनाय नमः' इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य आवाहनादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्यात् । तद्यथा–पुष्पांजलिमादाय मूलमुच्चार्य—ॐ संविन्मये परे देवि परामृत रसप्रिये ॥ अनुज्ञां देहि त्रिपुरे परिवारार्चनाय मे ॥ इति पठित्वा पुष्पांजलिं च दद्यात् । इत्याज्ञां गृहीत्वावरणपूजां कुर्यात् । तद्यथा–पूज्यपूजकयोरंतरालं प्राची तदनुसारेण अन्याः दिशः प्रकल्प्य अग्न्यादिकोणेषु वामावर्तेन च । ऐं बीजाय नमः । ऐं बीजश्रीपादुकां पूजयामि तर्पयामि नमः । इति सर्वत्र वदेत् ॥ १ ॥ क्लीं बीजाय नमः । क्लीं बीजश्रीपा० २ । सौः बीजाय नमः । सौः बीजश्रीपा० ३ ॥ इति पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य--अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ ह्रींश्रींप्रकटगुप्तगुप्ततरसंप्रदायकुलानिर्गमरहस्यपरापररहस्यसंज्ञकश्रीचक्रगतयोगिनीपादुकाभ्यो नमः । इति पुष्पांजलिं दद्यात् ॥ इति प्रथमावरणम् ॥ १ ॥ ततस्त्रिकोणबाह्ये वामपार्श्वे दक्षहस्तेन पुष्पचंदनाक्षतानि तर्पयामीति वाम हस्तेन जलं चार्पयेत् । जले आर्द्रकं प्रास्यमिति केचित् । ॐ ॐ ऐं क्लीं सौः ॐ कामेश्वर्यै नमः । नमः कामेश्वरि इच्छाकामफल प्रदे सर्वसत्त्ववशंकरि सर्वजगत्क्षोभणकरि हुं हुं हुं द्रां द्रीं क्लीं ब्लूं सः सौं क्लीं ऐं कामेश्वरि नित्याश्रीपा० १ । ॐ अं ऐं भगमालिन्यै नमः । भगभुगे भगिनि भगोदरि भगमाले भगावहे भगगुह्ये भगयोने भगनिपातिनि सर्वभगवशंकरि भगरूपे नित्यक्लिन्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय वरदे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुभक्षोभय सर्वसत्त्वान् भगेश्वरि ऐं ब्लूं जं ब्लूं भें ब्लूं मों ब्लूं हें ब्लूं हें क्लिन्ने सर्वाणि भगानि मे वशमानय स्त्रीं हर ब्लें ह्रीं भगमालिनी नित्याश्रीपा० २ । इं ह्रीं नित्यक्लिन्नायै

नमः । नित्यक्लिन्ने मदद्रवे स्वाहा । नित्यक्लिन्ना नित्याश्रीपा० ३ । ईं ॐ क्रौं भ्रौं क्रौं त्रौं छ्रौं ज्रौं ज्रौं भेरुंडायै नमः स्वाहा । भेरुंडा नित्याश्रीपा० ४ । ओं ॐ ह्रीं वह्निवासिन्यै नमः । वह्निवासिनि नित्याश्रीपा० ५ ॥ इति पंच पूजयेत् ॥ ततः दक्षिणपार्श्वे ॐ ह्रीं प्रें सः नित्यक्लिन्ने मदद्रवे महाविद्येश्वरि नमः स्वाहा । महाविद्येश्वरीनित्याश्रीपा० १ ऋं ॐ ह्रीं शिवदूत्यै नमः[१०] । शिवदूतीनित्याश्रीपा० २ । ॠं ॐ ह्रीं हुं खेचछेक्षः स्त्रीं हें क्षें ह्रीं फट् त्वरितायै नमः[११] । त्वरितानित्याश्रीपा० ३ । लृं ऐं क्लीं सौः कुलसुंदर्यै नमः[१२] । कुलसुंदरीनित्याश्रीपा० ४ । ॡं ऐं क्लीं सौः ह्स्रौं ह्क्लीं ह्स्रौः सौः क्लीं ऐं द्रां द्रीं क्लीं ब्लूं नित्यायै नमः[१३] । नित्याश्रीपा० ५ ॥ इति पंच पूजयेत् ॥ देव्यग्रे एँ ॐ ह्रीं फ्रूं स्त्रूँ ह्रीं क्रौं नित्यमदद्रवे हूँ क्रों नीलपताकायै नमः[१४] । नीलपताकिनी नित्याश्रीपा० १ । ऐं ॐ स्स्ठफ्रूं विजयायै नमः[१५] । विजयानित्याश्रीपा० २ । ॐ स्वौं सर्वमंगलायै नमः[१६] । सर्वमंगलानित्याश्रीपा० ३ । औं ॐ नमो भगवति ज्वालामालिनि देवि सर्वभूतसंहारकारिके जातवेदासि ज्वलंती प्रज्वलंती ज्वल ज्वल प्रज्वल हुं रं रं हुं फट् । ज्वालामालिन्यै नमः[१७] । ज्वालामालिनीनित्याश्रीपा० ४ । अं कौं विचित्रानित्यायै नमः[१८] । विचित्रानित्याश्रीपा० ५ ॥ इति पंच पजयित्वा पुष्पांजलिं दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततो भूपुराद्बहिः पूर्वद्वारे गं गणपते नमः[१९] १ । पश्चिमद्वारे बं बटुकाय नमः[२०] २ । उत्तरद्वारे ह्रीं दुर्गायै नमः[२०] ३ । दक्षिणद्वारे क्षं क्षेत्रपालाय नमः[२१] ४ ॥ इति द्वारपालान् पूजयेत् ॥ ततो बाह्यचतुरस्रस्य प्रथमरेखायां पश्चिमादि द्वारचतुष्टये अणिमासिद्धि[२२] श्रीपा० १ । लघिमासिद्धि[२३] श्रीपा० २ । महिमासिद्धि[२४] श्रीपा० ३ । ईशित्वसिद्धिश्रीपा० ४ । कोणचतुष्टये वशित्वसिद्धि[२५] श्रीपा० ५ । प्राकाम्यसिद्धि[२७] श्रीपा० ६ । भुक्तिसिद्धि[२८] श्रीपा० ७ । इच्छासिद्धि[२९] श्रीपा० ८ । वरुणनिर्ऋतिमध्ये प्राप्तिसिद्धि[३०] श्रीपा० ९ । ९ । पूर्वेशानयोर्मध्ये सर्वकामसिद्धि[३१] श्रीपा० १० ॥ इति पूजयेत् ॥ मध्यरेखायां पश्चिमादिद्वारचतुष्टये ह्रीं श्रीं आं ब्राह्म्यै नमः[३२] । ब्राह्मीश्रीपा० १ । ईं माहेश्वर्यै नमः[३३] । माहेश्वरीश्रीपा० २ । ऊं कौमार्यै नमः[३४] । कौमारीश्रीपा० ३ । ॠं वैष्णव्यै नमः[३५] । वैष्णवीश्रीपा० ४ । कोणचतुष्टये ह्रीं श्रीं ॡं वाराह्यै नमः[३६] । वाराहीश्रीपा० ५ । ह्रीं श्रीं ऐं इन्द्राण्यै नमः[३७] । इन्द्राणीश्रीपा०

६। ह्रीं श्रीं औं चामुंडायै नमः। चामुंडाश्रीपा० ७ । ह्रीं श्रीं अः महालक्ष्म्यै नमः। महालक्ष्मीश्रीपा० ८ । इति पूजयेत् । तृतीयरेखायां पश्चिमादिद्वारचतुष्टये ॐ त्रिखण्डाक्षमुद्रां–श्रीपा० १। ह्रीं सर्वसंक्षोभिणीमुद्रां–श्रीपा० २ । ह्रीं सर्वविद्राविणीमुद्रां–श्रीपा० ३ । क्लीं सर्वाकर्षिणीमुद्रां-श्रीपा० ४। कोणचतुष्टये ब्लुं सर्ववशंकरीमुद्रां-श्रीपा० ५। ॐ सर्वोन्मादकरीमुद्रां-श्रीपा० ६ । क्रौं महांकुशमुद्रां-श्रीपा० ७। ह्सौं खेचरीमुद्रां-श्रीपा० ८। ततस्त्रिवलये बीजमुद्रां-श्रीपा० ९ योनिमुद्रां-श्रीपा० १० । चार्वाकदर्शनाय नमः ११। इति पूजयित्वा पुष्पांजलिं दद्यात् । ततो हस्तेनार्घ्यजलं गृहीत्वा अत्र त्रैलोक्यमोहनचतुरस्रचक्रे श्रीमहात्रिपुरसुंदरीसमधिष्ठिते एता ईशित्वाद्याः प्रकटयोगिन्यः समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः संतु। इति तर्पयेत्॥ इति तृतीयावरणम्॥३॥ ततः षोडशदलेषु पश्चिमदलादारभ्य वामावर्त्तेन च ह्रीं श्रीं अं कर्माकर्षिणीनित्या–कलौं–श्रीपा० १ । आं बुद्ध्याकर्षिणीनित्याकलौं–श्रीपा० २ । इं अहंकाराकर्षिणीनित्याकलौं–श्रीपा० ३ ईं शब्दाकर्षिणीनित्याकलौं–श्रीपा० ४ उं रूपाकर्षिणीनित्याकलौं–श्रीपा० ५। ऊं स्पर्शाकर्षिणीनित्याकलौं–श्रीपा० ६ । ऋं रसाकर्षिणीनित्याकलौं–श्रीपा० ७ । ॠं गंधाकर्षिणीनित्याकलौं–श्रीपा० ८ । ऌं चिंताकर्षिणीनित्याकलौं–श्रीपा० ९। ॡं धैर्याकर्षिणीनित्याकलौं–श्रीपा० १० । एं स्मृत्याकर्षिणीनित्याकलौं–श्रीपा० ११ । ऐं नामाकर्षिणीनित्याकलौं–श्रीपा० १२ । ओं बीजाकर्षिणीनित्याकलौं–श्रीपा० १३ । औं अमृताकर्षिणीनित्याकलौं–श्रीपा० १४। अं शरीराकर्षिणीनित्याकलौं–श्रीपा० १५। अः आत्माकर्षिणीनित्याकलौं–श्रीपा० १६ । इति षोडश योगिनीः पूजयित्वा पुष्पांजलिं दद्यात् ॥ ततो हस्तेनार्घ्यजलं गृहीत्वा अत्र सर्वाशापरिपूरके षोडशदलचक्रे श्रीमहात्रिपुरसुंदरीसमधिष्ठिते एताः कामाकर्षिण्याद्या गुप्तयोगिन्यः समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः पूजिताः संतु इति वदेत् ॥ इति चतुर्थावरणम् ॥ ४ ॥ ततोऽष्टदलचक्रे पूर्वादिक्रमेण ह्रीं श्रीं कँ खँ गँ घँ ङँ अनंगकुसुमादेवी–श्रीपा० १। ह्रीं श्रीं चँ छँ जँ झँ ञँ अनंगमेखलादेवी–


श्रीपा० २। ह्रीं श्रीं टँ ठँ डँ ढँ णँ अनंगमदनादेवी[६९]–श्रीपा० ३। ह्रीं श्रीं तँ थँ दँ धँ नँ अनंगमदनातुरादेवी[७०]–श्रीपा० ४। ह्रीं श्रीं पँ फँ बँ भँ मँ अनंगरेखादेवी[७१]–श्रीपा० ५। ह्रीं श्रीं यँ रँ लँ वँ अनंगयोगिनीदेवी[७२]–श्रीपा० ६। ह्रीं श्रीं शँ षँ सँ हँ अनंगकुशादेवी[७३]–श्रीपा० ७। ह्रीं श्रीं ळँ क्षँ अनंगमालिनीदेवी[७४]–श्रीपा० ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं दद्यात् ॥ ततो हस्तेनार्घ्यजलं गृहीत्वा अत्र संक्षोभकरेऽष्टदलचक्रे श्रीमहात्रिपुरसुंदरीसमाधिष्ठिते एता अनंगकुसुमाद्याः गुप्ततरा योगिन्यः समुद्राः ससिद्धयः सायुधा सवाहनाः सपरिवाराः सर्वोपचारैः पूजिताः संतु इति वदेत् ॥ इति पंचमावरणम् ॥ ५ ॥ ततश्चतुर्दशारचक्रे पश्चिमादिवामावर्तेन ह्रीं श्रीं सर्वसंक्षोभिणीशक्ति–श्रीपा० १। ह्रीं श्रीं सर्वविद्राविणीशक्ति–श्रीपा० २। ह्रीं श्रीं सर्वाकर्षिणीशक्ति–श्रीपा० ३। ह्रीं श्रीं सर्वाह्लादिनीशक्ति–श्रीपा० ४। ह्रीं श्रीं सर्वसंमोहिनीशक्ति–श्रीपा० ५। ह्रीं श्रीं सर्वस्तंभिनीशक्ति–श्रीपा० ६। ह्रीं श्रीं सर्वजृंभिणीशक्ति–श्रीपा० ७। ह्रीं श्रीं सर्ववशंकरीशक्ति–श्रीपा० ८। ह्रीं श्रीं सर्वरंजिनीशक्ति–श्रीपा० ९। ह्रीं श्रीं सर्वोन्मादिनीशक्ति–श्रीपा० १०। ह्रीं श्रीं सर्वार्थसाधिनीशक्ति–श्रीपा० ११। ह्रीं श्रीं सर्वाशापरिपूरिणीशक्ति–श्रीपा० १२। ह्रीं श्रीं सर्वमंत्रमयीशक्ति–श्रीपा० १३। ह्रीं श्रीं सर्वद्वंद्वक्षयकरीशक्ति–श्रीपा० १४ ॥ इति संपूज्य पुष्पांजलिं दद्यात्। ततो हस्तेनार्घ्यजलं गृहीत्वा अत्र सौभाग्यदायके चतुर्दशचक्रे श्रीमहात्रिपुरसुंदरीसमधिष्ठिते एताः संक्षोभिण्याद्याः शक्तयः संप्रदाययोगिन्यः समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः संतु इति वदेत् ॥ इति षष्ठावरणम् ॥ ६ ॥ ततो दशारचक्रे पश्चिमादिवामावर्त्तेन च ह्रीं श्रीं सर्वसिद्धिप्रदादेवी–श्रीपा० १। ह्रीं श्रीं सर्वसंपत्प्रदादेवी[९०]–श्रीपा० २। ह्रीं श्रीं सर्वप्रियंकरीदेवी[९१]–श्रीपा० ३। ह्रीं श्रीं सर्वमंगलकारिणीदेवी[९२]–श्रीपा० ४। ह्रीं श्रीं सर्वकामप्रदादेवी–श्रीपा० ५। ह्रीं श्रीं सर्वदुःखविमोचिनीदेवी[९४]–श्रीपा० ६। ह्रीं श्रीं सर्वांगसुंदरीदेवी[९५]–श्रीपा० ७। ह्रीं श्रीं सर्वमृत्युविनाशिनीदेवी[९६]–श्रीपा० ८। ह्रीं श्रीं सर्वविघ्ननिवारिणीदेवी[९७]–श्रीपा० ९। ह्रीं श्रीं


सर्वसौभाग्यदायिनीदेवी[९८]—श्रीपा० १० ॥ इति संपूज्य पुष्पांजलिं दद्यात् ॥ ततो हस्तेनार्घ्यजलं गृहीत्वा अत्र सर्वाशापरिपूरके
दशारचक्रे श्रीमहात्रिपुरसुंदरीसमधिष्ठिते एताः सर्वसिद्धिप्रदाद्या देव्यः कुलकौलिनीयोगिन्यः समुद्राः ससिद्धयः सायुधाः सवाहनाः
सपरिवाराः सर्वोपचारैः संपूजिताः संतु इति वदेत् ॥ इति सप्तमावरणम् ॥ ७ ॥ ततः पुनः दशारचक्रे पश्चिमादिवामावर्तेन च ह्रीं श्रीं
सर्वज्ञादेवी[९९]—श्रीपा० १ । ह्रीं श्रीं सर्वशक्तिमयीदेवी[१००]—श्रीपा० २ । ह्रीं श्रीं सर्वैश्वर्यप्रदादेवी[१०१]—श्रीपा० ३ । ह्रीं श्रीं सर्वज्ञानमयी
देवी[१०२]—श्रीपा० ४ । ह्रीं श्रीं सर्वव्याधिविनाशिनीदेवी[१०३]—श्रीपा० ५ । ह्रीं श्रीं सर्वाधारस्वरूपादेवी[१०४]—श्रीपा० ६ । ह्रीं श्रीं सर्व
पापहरादेवी[१०५]—श्रीपा० ७ । ह्रीं श्रीं सर्वानंदमयीदेवी[१०६]—श्रीपा० ८ । ह्रीं श्रीं सर्वरक्षास्वरूपिणीदेवी[१०७]—श्रीपा० ९ । ह्रीं श्रीं
सर्वेप्सितफलप्रदादेवी[१०८]—श्रीपा० १० ॥ इति संपूज्य पुष्पांजलिं दद्यात् ॥ ततो हस्तेनार्घ्यजलं गृहीत्वा अत्र सर्वरक्षाकरे
अंतर्दशाचक्रे त्रिपरमालिनीश्रीत्रिपुरसुंदरीदेवीसमधिष्ठिते एताः सर्वज्ञाद्या निर्भययोगिन्यः समुद्राः ससिद्धयः सायुधाः सवाहनाः
सपरिवाराः सर्वोपचारैः संपूजिताः संतु इति वदेत ॥ इत्यष्टमावरणम् ॥ ८ ॥ ततोऽष्टारचक्रे पश्चिमादिवामावर्तेन च
ह्रीं श्रीं अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ लृँ लॄँ एँ ऐँ ओँ औँ अँ अः वशिनीवाग्देवता[१०९]—श्रीपा० १ । ह्रीं श्रीं कँ खँ गँ घँ ङँ कामे
श्वरीवाग्देवतां-श्रीपा० २ । ह्रीं श्रीं चँ छँ जं झँ ञँ मोदिनीवाग्देवता[१११]—श्रीपा० ३ । ह्रीं श्रीं टँ ठँ डँ ढँ णँ विम
लावाग्देवता[११२]—श्रीपा० ४ । ह्रीं श्रीं तँ थँ दँ धँ नँ अव्ययावाग्देवता[११३]-श्रीपा० ५ । ह्रीं श्रीं पँ फँ बँ भँ मँ जयिनीवाग्देवता[११४]-श्री
पा० ६ । ह्रीं श्रीं यँ रँ लँ वँ सर्वेश्वरीवाग्देवता[११५]-श्रीपा० ७ । ह्रीं श्रीं शँ षँ सँ हँ लँ क्षँ कौलिनीवाग्देवता[११६]-श्रीपा० ८ ॥ इति
संपूज्य पुष्पांजलिं दद्यात् । ततो हस्तेनार्घ्यजलं गृहीत्वा अत्र सर्वरोगहरे अष्टारचक्रे श्रीमहात्रिपुरसुंदरीसमधिष्ठिते एता वशिन्याद्या
रहस्ययोगिन्यः समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः संतु इति वदेत् ॥ इति नवमावरणम् ॥ ९ ॥
ततः अभ्यंतरचक्रमध्ये दक्षिणे ॐ उत्तमबाणाय नमः[११७] १ वामे मोहधनुषे नमः[११८] २ । तदधः कर्कशाय नमः[११९] ३ । ततः पुनः

त्रिकोणे कामेश्वर्य्यै नमः १। चक्रिण्यै नमः २। भगशालिन्यै नमः ३। इति संपूज्य पुष्पांजलिं वारत्रयं दद्यात्। इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्यात्। अस्य पुरश्चरणं लक्षजपः। करवीरपुष्पैः त्रिमधुरोपेतैर्दशांशतो होमः। एवं कृते मंत्रः सिद्धो भवति। सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत्॥ तथा च—लक्षमेकं जपेन्मंत्रं दशांशं हयमारजैः॥ पुष्पैस्त्रिमधुरोपेतैर्जुहुयात्पूजितेऽनले॥ १॥ अथ प्रयोगा वक्ष्यंते साधकाभीष्टसिद्धिदाः॥ नवलक्षजपेनास्य रुद्ररूपो नरो भवेत्॥ २॥ मल्लिकामालतीपुष्पैर्होमाद्वागीशतामियात्॥ करवीरैर्जपापुष्पैर्होमान्मोहयते जगत्॥ ३॥ चंद्रकुंकुमकस्तूरीहोमात् कामाधिको भवेत्॥ चंपकैः पाटलैर्विश्वं वशमानयतेऽचिरात्॥ ४॥ लाजहोमो राज्यदायी मधुनोपद्रवक्षयः॥ निशि च्छागपलैर्होमो रिपुसैन्यविनाशकृत्॥ ५॥ दध्याज्यदुग्धमधुभिः क्रमाद्धोमादवाप्नुयात्॥ आरोग्यं संपदं ग्रामं धनं शर्करया सुखम्॥ ६॥ कमलैर्धनसंपत्तिर्दाडिमै राजवश्यता॥ क्षत्रिया मातुलिंगैस्तु वैश्या नारंगजैः फलैः॥ ७॥ शूद्राः कूष्मांडसंभूतैर्वश्याः स्युरचिराद्धुतैः॥ पनसानां लक्षहोमाद्वश्याः स्युश्चक्रवर्तिनः॥ ८॥ द्राक्षाफलैरिष्टसिद्धी रंभाभिर्मंत्रिणो वशाः॥ नारिकेलैस्तु संपत्तिस्तिलैः सर्वेष्टसिद्धयः॥ ॥ ९॥ गुग्गुलैर्दुःखनाशः स्यात् सर्वेष्टं शर्करागुडैः॥ पायसैर्धनधान्याप्तिर्बंधकैः प्राणिनो वशाः॥ १०॥ पक्वैश्चूतफलैर्होमाल्लक्षमात्राद्धरा वशा॥ लवण राजिकायुक्तैर्होमाद्दुष्टविनाशनम्॥ ११॥ कर्पूरहोमाल्लभते वाक्पतित्वं नरोऽचिरात्॥ करंजफलहोमेन भूतप्रेतादयो वशाः॥ १२॥ विल्वैः स्यादतुला लक्ष्मीरिक्षुदंडैः सुखालयः॥ घृतहोमादीप्सिताप्तिः शांतिः स्यात्तिलतंडुलैः॥ ॥ १३॥ किंबहूक्तेन देवेशि सर्वेष्टसाधनं नृणाम्॥ मध्ये कूटत्रिके भेदा वर्णांतरनियोजनात्॥ १४॥ बहवोऽन्ये न गदिता ग्रंथगौरवभीतितः॥ अपरीक्षितशिष्याय न देयेयं कदाचन॥ पुत्राय वा सुशिष्याय देयाभीष्टप्रदायिनी॥ १५॥ इति षोडशाक्षरषोडशीमंत्रप्रयोगः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्रीचक्रंषोडशीपूजनयन्त्रम्

१८





॥૪૯૯॥


अथ षोडशीभेदेन बालात्रिपुरामंत्रप्रयोगः ॥ अथ बालां प्रवक्ष्यामि मंत्री संसेव्य यां द्रुतम् ॥ बृहस्पतिः कुबेरश्च जायते विद्यया धनैः ॥ १ ॥ मंत्रो यथा मंत्रमहोदधौ–ऐं क्लीं सौः। इति त्र्यक्षरो मंत्रः । अथास्य शापोद्धारः । ऐं ऐं सौः क्लीं क्लीं ऐं सौः क्लीं क्लीं एवं नवार्णः शतं जप्तः शापनिवर्तकः ॥ अथोत्कीलनम्। ॐ क्लीं नमः । अयमप्युत्कीलनकरः शतं जपात् ॥ अथ त्रयाणां बीजानां दीपनीमाह । तत्रादौ वाग्बीजस्य दीपनीविद्यामाह । वद वद वाग्वादिनि ऐं इति शतं जपेत् । इयमाद्यस्य बीजस्य दीपनी ॥ अथ काम बीजस्य दीपनीमाह। क्लिन्ने क्लेदिनि महाक्षोभं कुरु। इत्येकादशवर्णा मध्यबीजस्य दीपनार्थे शतं जपेत् । अथ बालाबीजस्यदीपनी माह । ॐ मोक्षं कुरु । अंत्यस्य बीजस्य दीपनार्थे शतं जपेत् । इति शापोद्धारोत्कीलनादिविधानं कृत्वा पुरश्चरणं कुर्यात् । अस्य बालामंत्रस्य दक्षिणामूर्तिर्ऋषिः पंक्तिश्छंदः त्रिपुराबालादेवता सौः बीजं क्लीं शक्तिः ममाभीष्टसिध्यर्थे जपे विनियोगः । ॐ दक्षिणा मूर्तिऋषये नमः शिरसि १ । पंक्तिच्छंदसे नमः मुखे २। त्रिपुराबालादेवतायै नमः हृदि ३ । सौः बीजाय नमः गुह्ये ४ । क्लीं शक्तये नमः पादयोः ५। विनियोगाय नमः सर्वाङ्गे ६। इति ऋष्यादिन्यासः॥ ॐ ऐं नमः नाभ्यादिपादांतम् १ । ॐ क्लीं नमः हृदया दिनाभ्यंतम् २। ॐ सौः नमः मूर्द्धादिहृदयांतम् ३ । इति विन्यसेत् ॥ ॐ ऐं नमः वामकरे १ । ॐ क्लीं नमः दक्षकरे २ । ॐ सौः नमः करयोः ३ ॥ इति विन्यसेत् ॥ ॐ ऐं नमः मूर्ध्नि १। ॐ क्लीं नमः गुह्ये २। ॐ सौः नमः वक्षसि ३ ॥ इति विन्य सेत् ॥ ऐं रत्यै नमो गुह्ये १ । सौः प्रीत्यै नमो हृदि २। क्लीं कामभवायै नमो भ्रूमध्ये ३ ॥ इति विन्यसेत् ॥ ऐं अमृतेश्यै नमो गुह्ये १ । सौः योगेश्यै नमो हृदि २। क्लीं विश्वयोन्यै नमो भ्रूमध्ये ३। इति विन्यसेत् ॥ ह्रीं मनोभवाय नमः शिरसि १ । क्लीं मकरध्वजाय नमः मुखे २। ऐं कंदर्पाय नमः हृदि ३। ब्लूं मन्मथाय नमः गुह्ये ४ । स्त्रीं कामदेवाय नमः चरणयोः ५ ॥ इति

१ देव्या शप्ता कीलिता च विज्ञेयं तत्र सिद्धिदा ॥ शापोद्धारमथोत्कीलं विधाय जपमाचरेत्॥ २ आद्यमाद्यं च तार्तीयं कामः कामोऽथ वाग्भवम् ॥ अंत्यमंत्यमनंगं च नवार्णः कीर्तितो मनुः ॥ जप्तोऽयं शतधा शापं बालाया विनिवर्तयेत् ॥ ३ दीपनी प्रकाशकर्त्री ।

विन्यसेत् ॥ ततो द्रां द्राविण्यै नमः शिरसि १। द्रीं क्षोभिण्यै नमः पादयोः २। क्लीं वशीकारिण्यै नमो मुखे ३। ब्लूं कर्षिण्यै नमः गुह्ये ४। स्त्रीं संमोहिन्यै नमः हृदि ५॥ इति विन्यसेत् ॥ ततः आं सौः क्लीं ऐं अंगुष्ठाभ्यां नमः १। ईं सौः क्लीं ऐं तर्जनीभ्यां नमः २। ऊँ सौः क्लीं ऐं मध्यमाभ्यां नमः ३। सौः ऐं क्लीं ऐं अनामिकाभ्यां नमः ४। औं सौः क्लीं ऐं कनिष्ठिकाभ्यां नमः ५। अः सौः क्लीं ऐं करतलकरपृष्ठाभ्यां नमः ६॥ इति करन्यासः ॥ आँ सौः क्लीं ऐं हृदयाय नमः १। ईं सौः क्लीं ऐं शिरसे स्वाहा २। ऊँ सौः क्लीं ऐं शिखायै वषट् ३। ऐं सौः क्लीं ऐं कवचाय हुं ४। औं सौः क्लीं ऐं नेत्रत्रयाय वौषट् ५। अः सौः क्लीं ऐं अस्त्राय फट् ६॥ इति हृदयादिषडंगन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यान–रक्तांवरां चंद्रकलावतंसां समुद्यदादित्यनिभां त्रिनेत्राम् ॥ विद्याक्षमालाभयदानहस्तां ध्यायामि बालामरुणांबुजस्थाम् ॥ १ ॥ एवं ध्यात्वा मानसोपचारैः संपूजयेत् ॥ ततः पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य'ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः' इति पीठदेवताः संपूज्य नव पीठशक्तीः पूजयेत् । पूर्वाद्यष्टसु दिक्षु ॐ इच्छायै नमः १। ॐ ज्ञानायै नमः २। ॐ क्रियायै नमः ३। ॐ कामिन्यै नमः ४। ॐ कामदायिन्यै नमः ५। ॐ रत्यै नमः ६। ॐ रतिप्रियायै नमः ७। ॐ नंदायै नमः ८। मध्ये ॐ मनोन्मन्यै नमः ९॥ इति पीठशक्तीः पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रपत्रं ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य तस्योपरि देव्या अष्टगंधेन नवयोन्यात्मकं यंत्रं बहिरष्टदलं च तस्योपरि भूपुरं लिखित्वा 'ह्सौः सदाशिवमहाप्रेतपद्मासनाय नमः' इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य मध्ययोनौ मूलेन मूर्तिं प्रकल्प्य आवाहनादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्यात् ॥ तत्र क्रमः । पुष्पांजलिमादाय–संविन्मये परे देवि परामृतरसप्रिये ॥ अनुज्ञां देहि बालायाः परिवारार्चनाय मे ॥ १॥ इति पठित्वा पुष्पांजलिं दद्यात् । इत्याज्ञां गृहीत्वा देवीवामकोणे ॐ रत्यै नमः।

रतिश्रीपादुकां पूजयामि तर्पयामि नमः । इति सर्वत्र १ । देवी दक्षिणकोणे ॐ प्रीत्यै नमः । प्रीतिश्रीपा० २। देव्यग्रे ॐ मनोभवायै नमः। मनोभवाश्रीपा० ३ ॥ इति पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य्य–अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ मध्ययोनेर्बहिर्भागे आग्नेय्यादिचतुर्दिक्षु क्रमेण आँ सौः क्लीं ए हृदयाय नमः १ । ईं सौः क्लीं ऐं शिरसे स्वाहा २ । ऊँ सौः क्लीं ऐं शिखायै वषट् ३। ऐं सौः क्लीं ऐं कवचाय हुं ४। मध्ये औं सौः क्लीं ऐं नेत्रत्रयाय वौषट् ५। दिक्षु च अः सौः क्लीं ऐं अस्त्राय फट् ६ ॥ इति षडंगानि पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततो मध्ययोनेर्वहिर्भागे पूर्वादिचतुर्दिक्षु ह्रीं मनोभवाय नमः मनोभवश्रीपा० १। क्लीं मकरध्वजाय नमः मकरध्वजश्रीपा० २। ऐँ कंदर्प्पाय नमः कंदर्प्पश्रीपा० ३। व्लूँ मन्मथाय नमः मन्मथश्रीपा० ४।मध्ये स्त्रीं कामदेवाय नमः कामदेवश्रीपा० ५। इति पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततो मध्ययोनेर्वहिर्मनोभवाय

बालात्रिपुरापूजनयन्त्रम् ।



समीपे द्रां द्राविण्यै नमः द्राविणश्रीपा० १ । द्रीं क्षोभिण्यै नमः क्षोभिणीश्रीपा० २ । क्लीं वशीकारिण्यै नमः वशीकारिणीश्रीपा० ३ ।
ब्लूँ आकर्षिण्यै नमः आकर्षिणीश्रीपा० ४ । स्त्रीं संमोहिन्यै नमः संमोहिनीश्रीपा० ५ ॥ इति संपूज्य पुष्पांजलिं
दद्यात् ॥ इति चतुर्थावरणम् ॥ ४ ॥ ततोऽष्टयोनेः पूज्यपूजकयोरंतरालं प्राची तदनुसारेण अन्या दिशः प्रकल्प्य
प्राचीक्रमेण ॐ सुभगायै नमः । सुभगाश्रीपा० १ । ॐ भगायै नमः । भगाश्रीपा० २ । ॐ भगसर्पिण्यै नमः । भगसर्पिणीश्रीपा० ३ ।
ॐ भगमाल्यै नमः । भगमालीश्रीपा० ४ । ॐ अनंगनंगायै नमः । अनंगनंगाश्रीपा० ५ । ॐ कुसुमापरायै नमः । कुसुमापरा
श्रीपा० ६ । ॐ अनंगमेखलायै नमः । अनंगमेखलाश्रीपा० ७ । ॐ अनंगदमनायै नमः । अनंगदमनाश्रीपा० ८ ॥ इत्यष्टौ शक्तीः
पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति पंचमावरणम् ॥ ५ ॥ ततोऽष्टदलमूले प्राचीक्रमेण ॐ आँ ब्राह्म्यै नमः ब्राह्मीश्रीपा० १ । ॐ ईं
माहेश्वर्य्यै नमः । माहेश्वरीश्रीपा० २ । ॐ ऊं कौमार्यै नमः । कौमारीश्रीपा० ३ । ॐ ॠं वैष्णव्यै नमः वैष्णवीश्रीपा० ४ ।
ॐ ॡं वाराह्यै नमः । वाराहीश्रीपा० ५ । ॐ ऐं इन्द्राण्यै नमः । इन्द्राणीश्रीपा० ६ । ॐ औं चामुंडायै नमः । चामुंडाश्रीपा० ७ ।
ॐ अः महालक्ष्म्यै नमः महालक्ष्मीश्रीपा० ८ ॥ इत्यष्टौ मातॄः संपूज्य पुष्पांजलिं दद्यात् ॥ इति षष्ठावरणम् ॥ ६ ॥ ततोऽष्टदल
मध्ये ॐ अं असितांगभैरवाय नमः । असितांगभैरवश्रीपा० १ । ॐ इं रुरुभैरवाय नमः । रुरुभैरवश्रीपा० २ । ॐ उं चंडभैरवाय
नमः । चंडभैरवश्रीपा० ३ । ॐ ऋं क्रोधभैरवाय नमः । क्रोधभैरवश्रीपा० ४ । ॐ ऌं उन्मत्तभैरवाय नमः । उन्मत्तभैरवश्रीपा० ५ ।
ॐ एं कपालभैरवाय नमः । कपालभैरवश्रीपा० ६ । ॐ ओं भीषणभैरवाय नमः । भीषणभैरवश्रीपा० ७ । ॐ अं संहारभैरवाय
नमः । संहारभैरवश्रीपा० ८ । इत्यष्टौ भैरवान् पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति सप्तमावरणम् ॥ ७ ॥ ततोऽष्टदलाग्रेषु प्राची
क्रमेण ॐ कामरूपपीठाय नमः । कामरूपपीठश्रीपा० १ । ॐ मलयपीठाय नमः । मलयपीठश्रीपा० २ । ॐ कोल्लगिरिपीठाय नमः ।
कोल्लगिरिपीठश्रीपा० ३ । ॐ चौहारापीठाय नमः । चौहारापीठश्रीपा० ४ । ॐ कुलांतकपीठाय नमः । कुलांतकपीठश्री

पा० ५ । ॐ जालंधरपीठाय नमः । जालंधरपीठश्रीपा० ६ । ॐ उड्यानपीठाय नमः । उड्यानपीठश्रीपा० ७ । ॐ कोट्टपीठाय नमः । कोट्टपीठश्रीपा० ८ ॥ इत्यष्टौ पीठानि पूजयित्वा पुष्पांजलिं दद्यात् ॥ इत्यष्टमावरणम् ८ ॥ ततो भूपुराभ्यंतरे पूर्वादिक्रमेण दशादिक्षु ॐ हेतुकाय नमः । हेतुकश्रीपा० १ । ॐ त्रिपुरांतकाय नमः । त्रिपुरांतकश्रीपा० २ । ॐ वेतालाय नमः । वेतालश्रीपा० ३ । ॐ अग्निजिह्वाय नमः । अग्निजिह्वश्रीपा० ४ । ॐ कालांतकाय नमः । कालांतकश्रीपा० ५ । ॐ कपालाय नमः । कपालश्रीपा० ६ । ॐ एकपादाय नमः । एकपादश्रीपा० ७ । ॐ भीमरूपाय नमः । भीमरूपश्रीपा० ८ । ॐ मलयाय नमः । मलयश्रीपा० ९ । ॐ हाटकेश्वराय नमः । हाटकेश्वरश्रीपा० १० ॥ इति पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति नवमावरणम् ॥ ९ ॥ ततो दशमावरणे भूपुराद्बहिः इन्द्रादीन् अष्टौ दिग्पालान् पूजयित्वा पुष्पांजलिं दद्यात् ॥ १० ॥ एकादशे आवरणे इन्द्रादिसमीपे वज्राद्यायुधानि पूजयित्वा पुष्पांजलिं दद्यात् ॥ ११ ॥ तद्बहिः पूर्वे ॐ बं वटुकाय नमः । वटुकश्रीपा० १ । दक्षिणे ॐ यां योगिनीभ्यो नमः । योगिनीश्रीपा० २ । पश्चिमे ॐ क्षं क्षेत्रपालाय नमः । क्षेत्रपालश्रीपा० ३ । उत्तरे ॐ गं गणपतये नमः । गणपतिश्रीपा० ४ । आग्नेय्याम् ॐ वसुभ्यो नमः । वसुश्रीपा० ५ । नैर्ऋत्यां ॐ सूर्य्येभ्यो नमः सूर्य्यश्रीपा० ६ । वायव्यां ॐ शिवेभ्यो नमः । शिवश्रीपा० ७। ईशान्यां ॐ भूतेभ्यो नमः । भूतश्रीपा० ८॥इति पूजयित्वा पुष्पांजलिं दद्यात्॥इतिद्वादशावरणम् ॥ ॥ १२ ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्य्यात् ॥ अस्य पुरश्चरणं त्रिलक्षजपः । किंशुकपुष्पैः करवीरपुष्पैर्वा मधुरान्वितैर्दशांशतो होमः । तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कर्यात् ॥ एवं कृते मंत्रः सिद्धो भवति । सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च—लक्षत्रयं जपेन्मंत्रं दशांशं किंशुकोद्भवैः ॥ पुष्पैर्हयारिजैर्वापि जुहुयान्मधुरान्वितैः ॥ १ ॥ एवमेवं भजेद्बालामीशः स्याद्धनविद्ययोः ॥ रक्तांभोजैर्हुते नार्य्यो वश्याः स्युः सर्षपैर्नृपाः ॥ २ ॥ नंद्यावर्त्तै[1] राजवृक्षैः कुन्दैः पाटलचंपकैः ॥

[1] नंद्यावर्तस्तगरः ।

पुष्पैर्बिल्वफलैर्वापि होमाल्लक्ष्मीः स्थिरा भवेत् ॥ ३ ॥ अपमृत्युं जपेन्मंत्री गुडूच्या दुग्धयुक्तया ॥ पयोक्तदूर्वाहोमात्तु नीरोगायुः सम
श्नुते ॥ ४ ॥ ज्ञानं कवित्वं लभते चंद्रागुरुपुरैर्हुतैः ॥ द्विजेन्द्रा वश्यतां यांति कुसुमैरपराजितैः ॥ ५ ॥ कह्लारैः क्षत्रियाः कर्णि
कारजैः क्षितिपांगनाः ॥ कोरंटकुसुमैर्वैश्याः पादजाः पाटलैर्हुतैः ॥ ६ ॥ पलाशपुष्पैर्वाक्सिद्धिरन्नातिरन्नहोमतः ॥ सारघक्षीरदध्यक्तान्
लाजान् हुत्वा रुजो जयेत् ॥ ७ ॥ अथ वशीकरणतिलकः। रक्तचंदनकर्पूरकचूरागुरुरोचनाः ॥ चंदनं केसरं मांसी क्रमाद्भागैर्नि
योजयेत् ॥ ८ ॥ भूमिचंद्रैकनंदाब्धिदिक्सप्तनिगमोन्मितैः ॥ श्मशाने कृष्णभूतस्य निशि नीहारपाथसा ॥ ९ ॥ कुमार्य्या पेषयेत्तानि
मंत्रेणाप्यभिमंत्रयेत् ॥ विदधेत्तिलकं तेन दर्शनाद्वशयेज्जनान् ॥ १० ॥ गजसिंहादिभूतानि राक्षसाञ्छाकिनीरपि ॥ प्रयोगेष्वेषु कथ्यंते
क्रमाद्ध्यानानि सिद्धये ॥ ११ ॥ अथ कार्यपरत्वेन ध्यानभेदानाह ॥ तत्रादौ लक्ष्मीप्राप्तौ ध्यानं—मातुलिंगपयोजन्महस्तां कनक
सन्निभाम् ॥ पद्मासनगतां बालां लक्ष्मीप्राप्तौ विचिंतयेत् ॥ १२ ॥ ज्ञानाप्तये ध्यानं यथा—वरपीयूषकलशपुस्तकाभीतिधारिणीम्।
सुधां स्रवंतीं ज्ञानाप्तौ ब्रह्मरंध्रे विचिंतयेत् ॥ १३ ॥ रोगनाशनध्यानं यथा—शुक्लांबरां शशांकाभां रोगनाशे स्मरेच्छिवाम् ॥ अकारादि
क्षकारांतवर्णावयवरूपिणीम् ॥ १४ ॥ वशीकरणध्यानं यथा—सृणिपाशधरां देवीं रत्नालंकारभूषिताम् ॥ प्रसन्नामरुणां ध्यायेद्वशी
करणसिद्धये ॥ १५ ॥ अथ प्रत्येकमंत्रस्य जपध्यानविधिं ब्रुवे ॥ तत्रादौ वाग्बीजध्यानं यथा—विद्याक्षमालासुकपालमुद्राराजत्करां
कुंदसमानकांतिम् ॥ मुक्ताफलालंकृतिशोभितांगीं बालां स्मरेद्वाङ्मयसिद्धिहेतोः ॥ १६ ॥ अस्य विधानम्—ध्यात्वैवं वाग्भवं लक्षत्रयं
शुक्लांबरावृतः ॥ शुक्लचंदनलिप्तांगो मौक्तिकाभरणान्वितः ॥ १७ ॥ जपित्वा तद्दशांशेन पालाशकुसुमैर्नवैः ॥ जुहुयान्मधुराक्तैर्यः स

---


१ चंद्रः कर्पूरः। २ पुरं गुग्गुलु। ३ अपराजिता योन्याकारपुष्पवल्ली तदीयान्यपराजितानि तैः। ४ सारघं मधु। ५ भूमिरेकः। ६ चंद्र एकः।
७ एकः एकभागः। ८ नंदा नव। ९ अब्धयश्चत्वारः। १० दिशो दश। ११ सप्त सप्तभागाः। १२ निगमाश्चत्वारः। १३ रक्तचंदनमेकभागमित्यादि। एतान्येकीकृत्य
कृष्णचतुर्दशीरात्रौ कुमार्या संपेष्य मूलेनाभिमंत्र्य तिलकं कुर्यात्। १४ वशयेदिति शाकिन्यानीतानित्यर्थः।

भवेद्युवतिप्रियः ॥ १८ ॥ अथ कामबीजध्यानं यथा—भजेत्कल्पवृक्षाध उद्दीप्तरत्नासने सन्निषण्णां मदाघूर्णिताक्षीम् ॥ करैर्बीजपूरं कपालेषुचापं सपाशांकुशं रक्तवर्णं दधानाम् ॥ १९ ॥ अस्य विधानम्—ध्यात्वा देवीं जपेल्लक्षत्रयं यो मध्यबीजकम् ॥ रक्तवस्त्रावृतो रक्तभूषणो रक्तलेपनः ॥ २० ॥ दशांशं मालतीपुष्पैश्चंद्रचंदनलोलितैः ॥ जुहुयात्तस्य वश्याः स्युस्त्रिलोकीजनताः क्षणात् ॥ २१ ॥ तृतीयबीजध्यानं यथा—व्याख्यानमुद्रामृतकुंभविद्यामक्षस्रजं संदधतीं कराग्रैः ॥ चिद्रूपिणीं शारदचन्द्रकांतिं बालां स्मरेन्मौक्तिकभूषितांगीम् ॥ २२ ॥ अस्य विधानम्—ध्यात्वैवं चरमं बीजं जपेल्लक्षत्रयं सुधीः ॥ सितवस्त्रानुलेपाढ्यमात्मानं देवतां स्मरेत् ॥ २३ ॥ मालतीकुसुमैर्हुत्वा चंदनाक्तैर्दशांशतः ॥ लक्ष्मीविद्यासुकीर्तीनामाधारो जायतेऽचिरात् ॥ २४ ॥ इदं रहस्यं नाख्येयं कृतघ्ने कितवे शठे ॥ परीक्षिताय दातव्यमन्यथा दातृदोषदम् ॥ २५ ॥ अथ जपभेदान् कामभेदेनाह—वागंत्यकामान् प्रजपेदरीणां क्षोभहेतवे ॥ कामवागंत्यबीजानि त्रैलोक्यस्य वशीकृतौ ॥ २६ ॥ कामांत्यवाणीबीजानि मुक्तये नियतो जपेत् ॥ पूजाविधौ तु बालायास्त्रिविधानर्चयेद्गुरून् ॥ २७ ॥ अथ बालागायत्रीमंत्रः—"क्लीं त्रिपुरादेवि विद्महे कामेश्वरी धीमहि ॥ क्लिन्ने तन्नः प्रचोदयात्" ॥ गायत्री त्रिपुरा सर्वसिद्धिदा सुरसेविता ॥ अथ बालामंत्रभेदानाह । अथ वक्ष्याभि बालाया भेदानागमगोपितान् ॥ मंत्रो यथा—ह्रीं क्लीं ह्सौः ॥ इति त्र्यक्षरो मंत्रः ॥ ह्रीं क्लीं ह्सौः ह्सौः क्लीं ह्रीं॥ इति षडक्षरो मंत्रः ॥ श्रीं क्लीं ह्रीं ऐं क्लीं सौं ह्रीं क्लीं श्रीं ॥ इति नवाक्षरो मंत्रः ॥ ऐं क्लीं सौः बालात्रिपुरे स्वाहा ॥ इति दशाक्षरो मंत्रः ॥ ऐं क्लीं सौं बालात्रिपुरे सिद्धिं देहि नमः ॥ इति चतुर्दशाक्षरो मंत्रः ॥ ह्रीं श्रीं क्लीं त्रिपुरे भारति कवित्वं देहि स्वाहा ॥ इति षोडशाक्षरो मंत्रः ॥ स्क्लीं क्ष्म्यौं ऐं त्रिपुरे सर्ववांछितं देहि नमः स्वाहा ॥ इति सप्तदशाक्षरो मंत्रः ॥ ह्रीं ह्रीं ह्रीं प्रौढत्रिपुरे आरोग्यमैश्वर्यं च देहि स्वाहा ॥ इत्यष्टादशाक्षरो मंत्रः ॥ ह्रीं श्रीं क्लीं त्रिपुरमर्दने सर्वं शुभं साधय स्वाहा ॥ इत्यष्टादशाक्षरो मंत्रो द्वितीयः ॥ ह्रीं श्रीं क्लीं बालात्रिपुरे मदायत्तां विद्यां कुरु नमः स्वाहा ॥ इति विंशत्यक्षरो

१ ऐं सौं क्लीं इति जपेच्चेदरिनाशः स्यात् । २ क्लीं ऐं सौरिति वशीकरणे । ३ क्लीं सौः ऐमिति मुक्त्यै ।

मंत्रः ॥ ह्रीं श्रीं क्लीं परापरे त्रिपुरे सर्वमीप्सितं साधय स्वाहा ॥ इति विंशत्यक्षरो मंत्रो द्वितीयः ॥ क्लीं क्लीं श्रीं श्रीं ह्रीं त्रिपुराललिते मदीप्सितां योषितं देहि वांछितं कुरु स्वाहा ॥ इत्यष्टाविंशत्यक्षरो मंत्रः ॥ क्लीं क्लीं क्लीं श्रीं श्रीं श्रीं ह्रीं ह्रीं ह्रीं त्रिपुरसुंदरि सर्वं जगत् मम वशे कुरुकुरु मह्यं बलं देहि स्वाहा ॥ इति पंचविंशत्यक्षरो मंत्रः ॥ एते चतुर्दश बालामंत्रभेदाः ॥ एतेषां विधानम्--एतेषां चतुर्दशबालामंत्राणां दक्षिणामूर्तिऋषिः। गायत्रीछंदः। त्रिपुराबाला देवता। ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ अथ ध्यानम्--पाशांकुशौ पुस्तकमक्षसूत्रं करैर्दधाना सकलामरार्च्या ॥ रक्ता त्रिनेत्रा शशिशेखरेयं ध्येयाऽखिलर्द्ध्यै त्रिपुरात्र बाला ॥ इति ध्यात्वा लक्षं जपेत् । करवीरपुष्पैर्दशांशतो होमः । अन्यत् सर्वं पूर्ववत् ॥ तथा च--जपेल्लक्षं दशांशेन होमः पुष्पैर्हयारिजैः ॥ पूजा पूर्वोदिते पीठे गैरत्याद्यैश्च सायकैः ॥ १ ॥ मातृभिर्दिगधीशास्त्रैः प्रयोगाः पूर्ववन्मताः ॥ अथ धारणयंत्रं यथा--यंत्रं त्रैपुरमाख्यातं जप्तं संपातसाधितम् ॥ बहुना विधृतं दद्याद्धनं कीर्तिं सुखं सुतान् ॥ २ ॥ इति बालात्रिपुरामंत्रप्रयोगः ॥ इति षोडशीपटलं समाप्तम् ॥

बालाधारणयन्त्रम् ।



॥ श्रीगणेशायनमः ॥ अथ त्रिपुरसुंदरी (षोडशी) कवचप्रारंभः ॥ देव्युवाच ॥ भगवन्देवदेवेश लोकानुग्रहकारक ॥ त्वत्प्रसादान्महादेव श्रुता मंत्रास्त्वनेकधा ॥ १ ॥ साधनं विविधं देव कीलकोद्धरणं तथा ॥ शापादिदूषणोद्धारः श्रुतस्त्वत्तो मया प्रभो ॥ २ ॥ राजराजेश्वरीदेव्याः कवचं संचितं मया ॥ श्रोतुमिच्छामि त्वत्तस्तत्कथयस्व दयानिधे ॥ ३ ॥ ईश्वर उवाच ॥ लक्षवारसहस्राणि वारितासि पुनःपुनः ॥ स्त्रीस्वभावात्पुनर्देवि पृच्छसि त्वं मम प्रिये ॥ ४ ॥ अत्यंतगुह्यं कवचं सर्वकामफलप्रदम् ॥ प्रीतये तव देवेशि कथयामि शृणुष्व तत् ॥ ५ ॥ अस्य षोडशीकवचस्य महादेव ऋषिः प्रस्तारपंक्तिश्छंदो राजराजेश्वरी महात्रिपुरसुंदरी देवता धर्मार्थकाममोक्षसाधने पाठे विनियोगः ॥ पूर्वे मां भैरवी पातु बाला मां पातु दक्षिणे ॥ मालिनी पश्चिमे पातु त्रासिनी तूत्तरेऽवतु ॥६ ॥ ऊर्द्ध्वं पातु महादेवी महात्रिपुरसुंदरी ॥ अधस्तात्पातु देवेशी पातालतलवासिनी ॥ ७ ॥ आधारे वाग्भवः पातु कामराजस्तथा हृदि ॥ डामरः पातु मां नित्यं मस्तके सर्वकामदः ॥ ८ ॥ ब्रह्मरंध्रे सर्वगात्रे छिद्रस्थाने च सर्वदा ॥ महाविद्या भगवती पातु मां परमेश्वरी ॥ ९ ॥ ऐं ह्रीं ललाटे मां पातु क्लीं क्लुं सश्च नेत्रयोः ॥ नासायां मे कर्णयोश्च द्रीं द्रैं द्रां द्रीं चिबुके तथा ॥ १० ॥ सौः पातु गले हृदये सहह्रीं नाभिदेशके ॥ कलह्रीं क्लीं स्त्रीं गुह्यदेशे सह्रीं पादयोस्तथा ॥ ११ ॥ सह्रीं मां सर्वतः पातु सकलीं पातु संधिषु ॥ जले स्थले तथाऽऽकाशे दिक्षु राजगृहे तथा ॥ १२ ॥ ह्रूं क्षेमा त्वरिता पातु सह्रीं सक्लीं मनोभवा ॥ हंसः पायान्महादेवि परं निष्कलदेवता ॥ १३ ॥ विजया मंगला दूती कल्याणी भगमालिनी ॥ ज्वाला च मालिनी नित्या सर्वदा पातु मां शिवा ॥ १४ ॥ इत्येवं कवचं देवि देवानामपि दुर्लभम् ॥ तव प्रीत्या मयाख्यातं गोपनीयं प्रयत्नतः ॥ १५ ॥ इदं रहस्यं परमं गुह्याद्गुह्यतरं प्रिये ॥ धन्यं यशस्यमायुष्यं भोगमोक्षप्रदं शिवे ॥ ॥ १६ ॥ दुःस्वप्ननाशनं पुण्यं नरनारीवशंकरम् ॥ आकर्षणकरं देवि स्तंभोच्चाटनकं शिवे ॥ १७ ॥ इदं कवचमज्ञात्वा राजराजेश्वरीं पराम् ॥ योऽर्चयेद्योगिनीवृंदैः स भक्ष्यो नात्र संशयः ॥ १८ ॥ न तस्य मंत्रसिद्धिः स्यात्कदाचिदपि शांकरि ॥ इह लोके च दारिद्र्यं रोगदुःखाशुभानि च ॥ १९ ॥ परत्र नरकं गत्वा पशुयोनिमवाप्नुयात् ॥ तस्मादेतत्सदाभ्यासादधिकारी भवे

रिकल ॥ २० ॥ मद्वक्त्रनिर्गतमिदं कवचं सुपुण्यं पूजाविधेश्च पुरतो विधिना पठेद्यः ॥ सौभाग्यभागललितानि शुभानि भुक्त्वा देव्याः पदं भजति तत्पुनरंतकाले ॥ २१ ॥ इति कुलानंदसंहितायां षोडशीकवचं समाप्तम् ॥ श्रीगणेशाय नमः ॥ अथ त्रिपुट- (त्रिशक्तिरूपा) लक्ष्मीकवचप्रारंभः ॥ श्रीदेव्युवाच ॥ भगवन् सर्वधर्मज्ञ सर्वशास्त्रार्थपारग ॥ त्रिशक्तिरूपा लक्ष्म्याश्च कवचं यत्प्रकाशितम् ॥ १ ॥ सर्वार्थसाधनं नाम कथयस्व कृपांबुधे ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि कवचं परमाद्भुतम् ॥ २ ॥ सर्वार्थसाधनं नाम त्रैलोक्ये चातिदुर्लभम् ॥ सर्वसिद्धिमयं देवि सर्वैश्वर्यप्रदायकम् ॥ ३ ॥ पठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्यभाग्भवेत् ॥ सर्वार्थसाधनस्यास्य कवचस्य ऋषिः शिवः ॥ ४ ॥ छंदो विराट् त्रिशक्तिरूपा जगद्धात्री च देवता ॥ धर्मार्थकामयमोक्षेषु विनियोगः प्रकीर्तितः ॥ ५ ॥ श्रीबीजं मे शिरः पातु लक्ष्मीरूपा ललाटकम् ॥ ह्रीं पातु दक्षिणं नेत्रं वामनेत्रं सुरेश्वरी ॥ ६ ॥ क्लीं पातु दक्षकर्णं मे वामं कामेश्वरी तथा ॥ लक्ष्मीर्घ्राणं सदा पातु वदनं पातु केशवः ॥ ७ ॥ गौरी तु रसनां पात कंठं पात महेश्वरी ॥ स्कंधदेशं रतिः पातु भजौ तु मकरध्वजः ॥ ८ ॥ शंखनिधिः करौ पातु वक्षः पद्मनिधिः सदा ॥ ब्राह्मी मध्यं सदा पातु नाभिं पातु महेश्वरी ॥ ९ ॥ कुमारी पृष्ठदेशं मे गुह्यं रक्षतु वैष्णवी ॥ वाराही सक्थिनी पातु ऐं ह्रीं पातु पदद्वयम् ॥ १० ॥ भार्यां रक्षतु चामुंडा लक्ष्मी रक्षतु पुत्रकान् ॥ इन्द्रः पूर्वे सदा पातु आग्नेय्यामग्निदेवता ॥ ११ ॥ याम्ये यमः सदा पातु नैर्ऋत्ये निर्ऋतिश्च माम् ॥ पश्चिमे वरुणः पातु वायव्यां वायुदेवता ॥ १२ ॥ सौम्ये सोमः सदा पातु ऐशान्यामीश्वरोऽवतु ॥ ऊर्द्ध्वं प्रजापतिः पातु अधश्चानंतदेवता ॥ १३ ॥ राजद्वारे श्मशाने च अरण्ये प्रांतरे तथा ॥ जले स्थले चांतरिक्षे शत्रूणां विग्रहे तथा ॥ १४ ॥ एताभिः सहिता देवी त्रिबीजात्मा महेश्वरी ॥ त्रिशक्तिश्च महालक्ष्मीः सर्वत्र मां सदाऽवतु ॥ १५ ॥ इति ते कथितं देवि सारात्सारतरं परम् ॥ सर्वार्थसाधनं नाम कवचं परमाद्भुतम् ॥ १६ ॥ अस्यापि पठनात्सद्यः कुबेरोऽपि धनेश्वरः ॥ इन्द्राद्याः सकला देवा धारणात्पठनाद्यतः ॥ १७ ॥ सर्वसिद्धीश्वराः संतः सर्वैश्वर्यमवाप्नुयुः ॥ पुष्पांज

ल्यष्टकं दत्त्वा मूलेनैव पठेत्सकृत् ॥ १८ ॥ संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात् ॥ प्रीतिमन्योन्यतः कृत्वा कमला निश्चला गृहे ॥ १९ ॥ वाणी च निवसेद्वक्त्रे सत्यं सत्यं न संशयः ॥ यो धारयति पुण्यात्मा सर्वार्थसाधनाभिधम् ॥ २० ॥ कवचं परमं पुण्यं सोऽपि पुण्यवतां वरः ॥ सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यविजयी भवेत् ॥ २१ ॥ पुरुषो दक्षिणे बाहौ नारी वामभुजे तथा ॥ बहुपुत्रवती भूत्वा वंध्यापि लभते सुतम् ॥ २२ ॥ ब्रह्मास्त्रादीनि शस्त्राणि नैव कृंतंति तं जनम् ॥ एतत्कवचमज्ञात्वा यो जपेत्परमेश्वरीम् ॥ दारिद्र्यं परमं प्राप्य सोऽचिरान्मृत्युमाप्नुयात् ॥ २३ ॥ इति रुद्रयामले त्रिशक्त्याः सर्वार्थनामकं कवचं समाप्तम् ॥

॥ अथ श्रीविद्याकवचप्रारंभः ॥ देव्युवाच ॥ देवदेव महादेव भक्तानां प्रीतिवर्द्धनम् ॥ सूचितं यन्महादेव्याः कवचं कथयस्व मे ॥ १ ॥ महादेव उवाच ॥ शृणु देवि प्रवक्ष्यामि कवचं देवदुर्लभम् ॥ न प्रकाश्यं परं गुह्यं साधकाभीष्टसिद्धिदम् ॥ २ ॥ कवचस्य ऋषिर्देवि दक्षिणामूर्तिरव्ययः ॥ छंदः पंक्तिः समुद्दिष्टं देवी त्रिपुरसुंदरी ॥ ३ ॥ धर्मार्थकाममोक्षाणां विनियोगस्तु साधने ॥ वाग्भवः कामराजश्च शक्तिर्बीजं सुरेश्वरि ॥ ४ ॥ (ऐं) वाग्भवः पातु शीर्षे मां (क्लीं कामराजस्तथा हृदि ॥ सौः) शक्तिबीजं सदा पातु नाभौ गुह्ये च पादयोः ॥ ५ ॥ ऐं श्रीं सौः वदने पातु बाला मां सर्वसिद्धये ॥ हसैं हसकलह्रीं हसौः पातु भैरवी कंठदेशतः ॥ ६ ॥ सुंदरी नाभिदेशे च शीर्षे कामकला सदा ॥ भ्रूनासयोरंतराले महात्रिपुरसुंदरी ॥ ७ ॥ ललाटे सुभगा पातु भगा मां कंठदेशतः ॥ भगोदया च हृदये उदरे भगसर्पिणी ॥ ८ ॥ भगमाला नाभिदेशे लिंगे पातु मनोभवा ॥ गुह्ये पातु महादेवी राजराजेश्वरी शिवा ॥ ९ ॥ चैतन्यरूपिणी पातु पादयोर्जगदंबिका ॥ नारायणी सर्वगात्रे सर्वकार्ये शुभंकरी ॥ १० ॥ ब्रह्माणी पातु मां पूर्वे दक्षिणे वैष्णवी तथा ॥ पश्चिमे पातु वाराही उत्तरे तु महेश्वरी ॥ ११ ॥ आग्नेय्यां पातु कौमारी महालक्ष्मीस्तु नैर्ऋते ॥ वायव्यां पातु चामुंडा इंद्राणी पातु ईशके ॥ १२ ॥ जले पातु महामाया पृथिव्यां सर्वमंगला ॥ आकाशे पातु वरदा सर्वत्र भुवनेश्वरी ॥ १३ ॥ इदं तु कवचं देव्या देवानामपि दुर्लभम् ॥ पठेत्प्रातः समुत्थाय शुचिः प्रयतमानसः ॥ १४ ॥ नाधयो व्याधयस्तस्य न भयं च कचिद्भवेत् ॥ न च मारी

भयं तस्य पातकानां भयं तथा ॥ १५ ॥ न दारिद्र्यवशं गच्छेत्तिष्ठेन्मृत्युवशे न च ॥ गच्छेच्छिवपुरं देवि सत्यं सत्यं वदाम्यहम् ॥१६॥ इदं कवचमज्ञात्वा श्रीविद्यां यो जपेत्सदा ॥ स नाप्नोति फलं तस्य प्राप्नुयाच्छस्त्रघातनम् ॥ १७ ॥ इति सिद्धयामले श्रीविद्याकवचं समाप्तम् ॥ अथ षोडशीस्तोत्रप्रारंभः ॥ कल्याणवृष्टिभिरिवामृतपूरिताभिर्लक्ष्मीस्वयंवरणमङ्गलदीपिकाभिः ॥ सेवाभिरम्ब तव पादसरोज मूले नाकारि किं मनसि भक्तिमतां जनानाम् ॥ १ ॥ एतावदेव जननि स्पृहणीयमास्ते त्वद्वन्दनेषु सलिलस्थसरोजनेत्रे ॥ सान्निध्य सुद्यदरुणाम्बुजसोदरस्य त्वद्विग्रहस्य सुधया परयाऽऽप्लुतस्य॥२॥ईषत्प्रभावकलुषाः कति नाम संति ब्रह्मादयः प्रतिदिनं प्रलयाभिभूताः॥ एकः स एव जननि स्थिरसिद्धिरास्ते यः पादयोस्तव सकृत्प्रणतिं करोति ॥ ३ ॥ लब्ध्वा सकृत् त्रिपुरसुंदरि तावकीनं कारुण्यकन्द लतिकातिभरं कटाक्षम् ॥ कन्दर्प्पभावसुभगास्त्वयि भक्तिभाजः सम्मोहयंति तरुणीं भुवनत्रयेऽपि ॥ ४ ॥ ह्रींकारमेव तव नाम गृणंति ये वा मातस्त्रिकोणनिलये त्रिपुरे त्रिनेत्रे ॥ त्वत्संस्मृतौ यमभटाभिभवं विहाय दीव्यंति नन्दनवने सह लोकपालैः ॥ ५ ॥ हंतुः पुरामधि गलं परिपूर्णमानः क्रूरः कथं न भविता गरलस्य वेगः ॥ नाश्वासनाय यदि मातरिदं तवार्द्धदेहस्य शश्वदमृताप्लुतशीतलस्य ॥६॥ सर्व ज्ञतां सदसि वाक्पटुतां प्रसूते देवि त्वदंघ्रिसरसीरुहयोः प्रणामः ॥ किं च स्फुरन्मुकुटमुज्ज्वलमातपत्रं द्वे चामरे च महतीं वसुधां दधाति ॥ ७ ॥ कल्पद्रुमैरभिमतप्रतिपादनेषु कारुण्यवारिधिभिरंब भवत्कटाक्षैः ॥ आलोकय त्रिपुरसुन्दरि मामनाथं त्वय्येव भक्तिभरितं त्वयि बद्धदृष्टिम् ॥ ८ ॥ हंतेतरेष्वपि निधाय मनांसि चान्ये भक्तिं वहंति किल सापरदैवतेषु ॥ त्वामेव देवि मनसाऽहमनुस्मरामि त्वामेव नौमि शरणं जननि त्वमेव ॥ ९ ॥ लक्षेषु सत्स्वपि तवाक्षिविलोकनानामालोकय त्रिपुरसुन्दरि मां कथंचित् ॥ नूनं मया च सदृशं करुणैकपात्रं जातो जनिष्यति जनो न च जायते वा ॥१०॥ ह्रींह्रीमिति प्रतिदिनं जपतां तवाख्यां किं नाम दुर्लभमिह त्रिपुराभिधाने ॥ मालाकिरीटमदवारणमाननीयांस्तान्सेवते मधुमती स्वयमेव लक्ष्मीः ॥ ११ ॥ सम्पत्कराणि सकलेन्द्रियनन्दनानि साम्राज्यदानकुश लानि सरोरुहाणि ॥ त्वद्वन्दनानि दुरितोद्धरणोद्यतानि मामेव मातरनिशं कलयंतु नान्यम् ॥ १२ ॥ कल्पोपसंहरणकल्पिततांडवस्य

देवस्य खण्डपरशोः परभैरवस्य ॥ पाशांकुशैक्षवशरासनपुष्पबाणा सा साक्षिणी विजयेते तव मूर्तिरेका ॥ १३ ॥ लग्नं सदा भवतु मातरिदं त्वदीयं तेजः परं बहुलकुंकुमपङ्कशोणम् ॥ भास्वत्किरीटममृतं कुशलावतंसं रूपं त्रिकोणमुदितं परमामृताक्तम् ॥ १४ ॥ ह्रींकारत्रयसम्पुटेन महता मंत्रेण संदीपितं स्तोत्रं यः प्रतिवासरं तव पुरो मातर्जपेन्मंत्रवित् ॥ तस्य क्षोणिभुजो भवंति वशगा लक्ष्मी श्चिरं स्थायिनी वाणी निर्मलसूक्तिभावभरिता जागर्ति दीर्घं यशः ॥ १५ ॥ इति ब्रह्मविरचितं षोडशीकल्याणीस्तोत्रं समाप्तम् ॥

अथ षोडश्यष्टोत्तरशतनामस्तोत्रप्रारंभः ॥ भृगुरुवाच ॥ चतुर्वक्त्र जगन्नाथ स्तोत्रं वद मम प्रभो ॥ यस्यानुष्ठानमात्रेण नरो भक्ति मवाप्नुयात् ॥ १ ॥ ब्रह्मोवाच ॥ सहस्रनाम्नामाकृष्य नाम्नामष्टोत्तरं शतम् ॥ गुह्याद्गुह्यतरं गुह्यं सुन्दर्य्याः परिकीर्तितम् ॥ २ ॥ ॐ अस्य श्रीषोडश्यष्टोत्तरशतनामस्तोत्रस्य शंभुर्ऋषिरनुष्टुप्छंदः श्रीषोडशी देवता धर्म्मार्थकाममोक्षसिद्धये पाठे विनियोगः ॥ ॐ त्रिपुरा षोडशी माता त्र्यक्षरा त्रितया त्रयी ॥ सुंदरी सुमुखी सेव्या सामवेदपरायणा ॥ ३ ॥ शारदा शब्दनिलया सागरा सरिदम्बरा ॥ शुद्धा शुद्धतनः साध्वी शिवध्यानपरायणा ॥४॥ स्वामिनी शंभुवनिता शांभवी च सरस्वती ॥ समुद्रमथिनी शीघ्रगामिनी शीघ्रसिद्धिदा ॥ ५ ॥ साधुसेव्या साधुगम्या साधुसंतुष्टमानसा ॥ खट्वांगधारिणी खर्वा खड्गखर्परधारिणी ॥ ६ ॥ षड्वर्गभावरहिता षड्वर्गपरिचारिका ॥ षड्वर्गा च षडंगा च षोढा षोडशवार्षिकी ॥ ७ ॥ क्रतुरूपा क्रतुमती ऋभुक्षक्रतुमण्डिता ॥ कवर्गादिपवर्गांता अंतस्था अंतरूपिणी ॥ ८ ॥ अकाराकाररहिता कालमृत्युजरापहा ॥ तन्वी तत्त्वेश्वरी तारा त्रिवर्षा ज्ञानरूपिणी ॥ ९ ॥ काली कराली कामेशी च्छायासंज्ञा प्यरुन्धती ॥ निर्विकल्पा महावेगा महोत्साहा महोदरी ॥ १० ॥ मेधा बलाका विमला विमलज्ञानदायिनी ॥ गौरी वसुन्धरा गोप्त्री गवांपतिनिषेविता ॥ ११ ॥ भगांगा भगरूपा च भक्तिभावपरायणा ॥ छिन्नमस्ता महाधूमा तथा धूम्रविभूषणा ॥ १२ ॥ धर्मकर्मा दिरहिता धर्मकर्मपरायणा ॥ सीता मातांगिनी मेधा मधुदैत्यविनाशिनी ॥ १३ ॥ भैरवी भुवना माताऽभयदा भवसुन्दरी ॥ भावुका वगला कृत्या बाला त्रिपुरसुन्दरी ॥ १४ ॥ रोहिणी रेवती रम्या रम्भा रावणवन्दिता ॥ शतयज्ञमयी सत्वा शतक्रतुवरप्रदा ॥ १५ ॥

शतचन्द्रानना देवी सहस्रादित्यसन्निभा ॥ सोमसूर्याग्निनयना व्याघ्रचर्माम्बरावृता ॥ १६ ॥ अर्द्धेन्दुधारिणी मत्ता मदिरा मदिरेक्षणा ॥
इति ते कथितं गोप्यं नाम्नामष्टोत्तरं शतम् ॥ १७ ॥ सुन्दर्याः सर्वदं सेव्यं महापातकनाशनम् ॥ गोपनीयं गोपनीयं गोपनीयं कलौ
युगे ॥ १८ ॥ सहस्रनामपाठस्य फलं यद्वै प्रकीर्तितम् ॥ तस्मात्कोटिगुणं पुण्यं स्तवस्यास्य प्रकीर्तनात् ॥ १९ ॥ पठेत्सदा भक्तियुतो
नरो यो निशीथकालेऽप्यरुणोदये वा ॥ प्रदोषकाले नवमीदिनेऽथवा लभेत भोगान् परमाद्भुतान् प्रियान् ॥ २० ॥ इति ब्रह्मयामले
पूर्वखण्डे षोडश्यष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥ अथ षोडशीसहस्रनामस्तोत्रप्रारंभः ॥ कैलासशिखरे रम्ये नानारत्नोपशोभिते ॥ कल्प
पादपमध्यस्थे नानापुष्पोपशोभिते ॥ १ ॥ मणिमण्डपमध्यस्थे मुनिगन्धर्वसेविते ॥ कदाचित्सुखमासीनं भगवंतं जगद्गुरुम् ॥ २ ॥
कपालखट्वांगधरं चन्द्रार्धकृतशेखरम् ॥ हस्तत्रिशूलडमरुं महावृषभवाहनम् ॥ ३॥ जटाजूटधरं देवं कण्ठभूषणवासुकिम् ॥ विभूतिभूषणं
देवं नीलकण्ठं त्रिलोचनम्॥४ ॥ द्वीपिचर्म्मपरीधानं शुद्धस्फटिकसन्निभम्॥ सहस्रादित्यसंकाशं गिरिजार्द्धांगभूषणम्॥ ५॥प्रणम्य शिरसा
नाथं कारणं विश्वरूपिणम् ॥ कृताञ्जलिपुटो भूत्वा प्राहैनं शिखिवाहनः ॥ ६ ॥ कार्तिकेय उवाच ॥ देवदेव जगन्नाथ सृष्टिस्थितिलया
त्मक ॥ त्वमेव परमात्मा च त्वं गतिः सर्वदेहिनाम् ॥ ७ ॥ त्वं गतिः सर्वलोकानां दीनानां च त्वमेव हि ॥ त्वमेव जगदाधारस्त्वमेव
विश्वकारणम् ॥ ८ ॥ त्वमेव पूज्यः सर्वेषां त्वदन्यो नास्ति मे गतिः ॥ किं गुह्यं परमं लोके किमेकं सर्वसिद्धिदम् ॥ ९ ॥
किमेकं परमं श्रेष्ठं को योगः स्वर्गमोक्षदः ॥ विना तीर्थेन तपसा विना दानैर्विना मखैः ॥ १० ॥ विना लयेन ध्यानेन नरः सिद्धि
मवाप्नुयात् ॥ कस्मादुत्पद्यते सृष्टिः कस्मिंश्च प्रलयो भवेत ॥ ११ ॥ कस्मादुत्तीर्यते देव संसारार्णवसंकटात् ॥ तदहं श्रोतुमिच्छामि
कथयस्व महेश्वर ॥ १२ ॥ ईश्वर उवाच ॥ साधु साधु त्वया पृष्टं पार्वतीप्रियनन्दन ॥ अस्ति गुह्यतमं पुत्र कथयिष्याम्यसंश
यम् ॥ १३ ॥ सत्त्वं रजस्तमश्चैव ये चान्ये महदादयः ॥ ये चान्ये बहवो भूताः सर्वे प्रकृतिसम्भवाः ॥ १४ ॥ सैव देवी परा
शक्तिर्महात्रिपुरसुन्दरी ॥ सैव प्रसूयते विश्वं विश्वं सैव प्रपास्यति ॥ १५ ॥ सैव संहरते विश्वं जगदेतच्चराचरम् ॥ आधारः सर्व

भूतानां सैव रोगार्तिहारिणी ॥ १६ ॥ इच्छाज्ञानक्रियाशक्तिर्ब्रह्मविष्णुशिवात्मिका ॥ त्रिधा शक्तिस्वरूपेण सृष्टिस्थितिविनाशिनी ॥
॥ १७ ॥ सृज्यते ब्रह्मरूपेण विष्णुरूपेण पाल्यते ॥ ह्रियते रुद्ररूपेण जगदेतच्चराचरम् ॥ १८ ॥ यस्या योनौ जगत्सर्वमद्यापि
परिवर्तते ॥ यस्या प्रलीयते चांते यस्यां च जायते पुनः ॥ १९ ॥ यां समाराध्य त्रैलोक्ये संप्राप्यं पदमुत्तमम् ॥ तस्या नामसहस्रं
तु कथयामि शृणुष्व तत् ॥ २० ॥ ॐ अस्य श्रीमहात्रिपुरसुन्दरीसहस्रनामस्तोत्रमंत्रस्य श्रीभगवान् दक्षिणामूर्तिर्ऋषिः। जगती च्छंदः ।
समस्तप्रकटगुप्तसंप्रदायकुलकौलोत्तीर्णानिर्गर्भरहस्याचिन्त्यप्रभावती देवता। ॐ बीजं माया शक्तिः कामराजेति कीलकं धर्मार्थकाममोक्षार्थे
जपे विनियोगः ॥ अथ ध्यानम्—ॐ आधारे तरुणार्कबिम्बरुचिरं हेमप्रभं वाग्भवं बीजं मन्मथमिन्द्रगोपसदृशं हृत्पंकजे संस्थितम्
विष्णुब्रह्मपदस्थशक्तिकलितं सोमप्रभाभासुरं ये ध्यायंति पदत्रयं तव शिवे ते यांति सौख्यं पदम्॥२१॥ कल्याणी कमला काली कराली
कामरूपिणी ॥ कामाख्या कामदा काम्या कामना कामचारिणी ॥ २२ ॥ कालरात्रिर्महारात्रिः कपाली कालरूपिणी ॥ कौमारी
करुणा मुक्तिः कलिकल्मषनाशिनी ॥ २३ ॥ कात्यायनी कराधारा कौमुदी कमलप्रिया ॥ कीर्तिदा बुद्धिदा मेधा नीतिज्ञा
नीतिवत्सला ॥ २४ ॥ माहेश्वरी महामाया महातेजा महेश्वरी ॥ महाजिह्वा महाघोरा महादंष्ट्रा महाभुजा ॥ २५ ॥ महामोहांध
कारघ्नी महामोक्षप्रदायिनी ॥ महादारिद्र्यनाशा च महाशत्रुविमर्दिनी ॥ २६ ॥ महामाया महावीर्या महापातकनाशिनी ॥ महा
मखा मंत्रमयी मणिपूरकवासिनी ॥ २७ ॥ मानसी मानदा मान्या मनश्चक्षू रणेचरा ॥ गणमाता च गायत्री गणगंधर्वसेविता ॥
॥ २८ ॥ गिरिजा गिरिशा साध्वी गिरिस्था गिरिवल्लभा ॥ चण्डेश्वरी चण्डरूपा प्रचण्डा चण्डमालिनी ॥ २९ ॥ चर्विका
चर्चिकाकारा चण्डिका चारुरूपिणी ॥ यज्ञेश्वरी यज्ञरूपा जपयज्ञपरायणा ॥ ३० ॥ यज्ञमाता यज्ञभोक्त्री यज्ञेशी यज्ञसंभवा ॥
सिद्धयज्ञक्रियासिद्धिर्यज्ञाङ्गी यज्ञरक्षिका ॥ ३१ ॥ यज्ञक्रिया यज्ञरूपा यज्ञाङ्गी यज्ञरक्षिका ॥ यज्ञक्रिया च यज्ञा च यज्ञा यज्ञ
क्रियालया ॥ ३२ ॥ जालंधरी जगन्माता जातवेदा जगत्प्रिया ॥ जितेन्द्रिया जितक्रोधा जननी जन्मदायिनी ॥ ३३ ॥ गङ्गा

गोदावरी चैव गोमती च शतद्रुका ॥ घर्घरा वेदगर्भा च रेचिका समवासिनी ॥ ३४ ॥ सिंधुर्मंदाकिनी क्षिप्रा यमुना च सरस्वती ॥ भद्रा रागविपाशा च गण्डकी विंध्यवासिनी॥३५॥नर्मदा सिंधु कावेरी वेत्रवत्या सुकौशिकी॥महेन्द्रतनया चैव अहल्या चर्मकावती ॥३६॥ अयोध्या मथुरा माया काशी काञ्ची अवंतिका ॥ पुरी द्वारावती तीर्था महाकिल्बिषनाशिनी ॥ ३७ ॥ पद्मिनी पद्ममध्यस्था पद्म किंजल्कवासिनी ॥ पद्मवक्त्रा चकोराक्षी पद्मस्था पद्मसंभवा ॥ ३८ ॥ ह्रींकारा कुण्डलाधारा हृत्पद्मस्था सुलोचना ॥ श्रींकारी भूषणा लक्ष्मीः क्लींकारी क्लेशनाशिनी ॥ ३९ ॥ हरिवक्त्रोद्भवा शांता हरिवक्त्रकृतालया ॥ हरिवक्त्रोद्भवा शांता हरिवक्षस्स्थलस्थिता ॥ ४० ॥ वैष्णवी विष्णुरूपा च विष्णुमातृस्वरूपिणी ॥ विष्णुमाया विशालाक्षी विशालनयनोज्ज्वला ॥ ४१ ॥ विश्वेश्वरी च विश्वात्मा विश्वेशी विश्वरूपिणी ॥ विश्वेश्वरी शिवाराध्या शिवनाथा शिवप्रिया ॥ ४२ ॥ शिवमाता शिवाख्या च शिवदा शिवरूपिणी ॥ भवेश्वरी भवाराध्या भवेशी भवनायिका ॥ ४३ ॥ भवमाता भवागम्या भवकण्टकनाशिनी ॥ भवप्रिया भवानन्दा भवानी भवमोहिनी ॥४४॥ गायत्री चैव सावित्री ब्रह्माणी ब्रह्मरूपिणी ॥ ब्रह्मेशी ब्रह्मदा ब्रह्मा ब्रह्माणी ब्रह्मवादिनी ॥ ४५ ॥ दुर्गस्था दुर्गरूपा च दुर्गा दुर्गार्ति नाशिनी ॥ सुगमा दुर्गमा दांता दयादोग्ध्री दुरापहा ॥ ४६ ॥ दुरितघ्नी दुराध्यक्षा दुरा दुष्कृतनाशिनी ॥ पंचास्या पंचमी पूर्णा पूर्ण पीठनिवासिनी ॥ ४७ ॥ सत्त्वस्था सत्त्वरूपा च सत्त्वस्था सत्त्वसम्भवा ॥ रजस्था च रजोरूपा रजोगुणसमुद्भवा ॥ ४८ ॥ तमस्था च तमोरूपा तामसी तामसप्रिया ॥ तमोगुणसमुद्भूता सात्त्विकी राजसी कला ॥ ४९ ॥ काष्ठा मुहूर्ता निमिषा अनिमेषा ततः परम् ॥ अर्द्धमासा च मासा च संवत्सरस्वरूपिणी ॥ ५० ॥ योगस्था योगरूपा च कल्पस्था कल्परूपिणी ॥ नानारत्नविचित्राङ्गी नानाभरण मण्डिता ॥ ५१ ॥ विश्वात्मिका विश्वमाता विश्वपाशविनाशिनी ॥ विश्वासकारिणी विश्वा विश्वशक्तिर्विचक्षणा ॥ ५२ ॥ जपा कुसुमसङ्काशा दाडिमीकुसुमोपमा ॥ चतुरंगी चतुर्बाहुश्चतुराचारवासिनी ॥ ५३ ॥ सर्वेशी सर्वदा सर्वा सर्वदा सर्वदायिनी ॥ माहेश्वरी च सर्वाद्या शर्वाणी सर्वमंगला ॥ ५४ ॥ नलिनी नन्दिनी नन्दा आनन्दानन्दवर्द्धिनी ॥ व्यापिनी सर्वभूतेषु भवभारविनाशिनी ॥ ५५ ॥

सर्वश्रृंगारवेषाढ्या पाशांकुशकरोद्यता ॥ सूर्यकोटिसहस्राभा चन्द्रकोटिनिभानना ॥ ५६ ॥ गणेशकोटिलावण्या विष्णुकोट्यरिमर्दिनी ॥
दावाग्निकोटिदलिनी रुद्रकोट्युग्ररूपिणी ॥ ५७ ॥ समुद्रकोटिगम्भीरा वायुकोटिमहाबला ॥ आकाशकोटिविस्तारा यमकोटिभयंकरी ॥
॥ ५८ ॥ मेरुकोटिसमुच्छ्राया गणकोटिसमृद्धिदा ॥ निष्कस्तोका निराधारा निर्गुणा गुणवर्जिता ॥ ५९ ॥ अशोका शोकरहिता
तापत्रयविवर्जिता ॥ वसिष्ठा विश्वजननी विश्वाख्या विश्ववर्द्धिनी ॥ ६० ॥ चित्रा विचित्रचित्रांगी हेतुगर्भा कुलेश्वरी ॥ इच्छाशक्ति
र्ज्ञानशक्तिः क्रियाशक्तिः शुचिस्मिता ॥ ६१ ॥ शुचिः स्मृतिमयी सत्या श्रुतिरूपा श्रुतिप्रिया ॥ महासत्त्वमयी सत्त्वा पंचतत्त्वोपरि
स्थिता ॥ ६२ ॥ पार्वती हिमवत्पुत्री पारस्था पाररूपिणी ॥ जयंती भद्रकाली च अहल्या कुलनायिका ॥ ६३ ॥ भूतधात्री च
भूतेशी भूतस्था भूतभावना॥ महाकुण्डलिनी शक्तिर्महाविभववर्द्धिनी ॥ ६४ ॥ हंसाक्षी हंसरूपा च हंसस्था हंसरूपिणी ॥ सोमसूर्याग्नि
मध्यस्था मणिमण्डलवासिनी ॥ ६५ ॥ द्वादशारसरोजस्था सूर्यमण्डलवासिनी ॥ अकलंका शशांकाभा षोडशारनिवासिनी ॥ ६६ ॥
डाकिनी राकिनी चैव लाकिनी काकिनी तथा ॥ शाकिनी हाकिनी चैव षट्चक्रेषु निवासिनी ॥ ६७ ॥ सृष्टिस्थितिविनाशाय सृष्टि
स्थित्यंतकारिणी ॥ श्रीकण्ठप्रियहृत्कण्ठा नन्दाख्या बिन्दुमालिनी ॥ ६८ ॥ चतुष्षष्टिकलाधारा देहदण्डसमाश्रिता ॥ माया काली
धृतिर्मेधा क्षुधा तुष्टिर्महाद्युतिः ॥ ६९ ॥ हिंगुला मंगला सीता सुषुम्ना मध्यगामिनी ॥ परघोरा करालाक्षी विजया जयदायिनी ॥
॥ ७० ॥ हृत्पद्मनिलया भीमा महाभैरवनादिनी ॥ आकाशलिंगसम्भूता भुवनोद्यानवासिनी ॥ ७१ ॥ महत्सूक्ष्मा च कंकाली भीम
रूपा महाबला ॥ मेनकागर्भसम्भूता तप्तकाञ्चनसन्निभा ॥ ७२ ॥ अंतरस्था कूटबीजा त्रिकूटाचलवासिनी ॥ वर्णाख्या वर्णरहिता
पञ्चाशद्वर्णभेदिनी ॥ ७३ ॥ विद्याधरी लोकधात्री अप्सरा अप्सरःप्रिया ॥ दीक्षा दाक्षायणी दक्षा दक्षयज्ञविनाशिनी ॥ ७४ ॥
यशःपूर्णा यशोदा च यशोदागर्भसम्भवा ॥ देवकी देवमाता च राधिका कृष्णवल्लभा ॥ ७५ ॥ अरुन्धती शचीन्द्राणी गान्धारी गन्ध
मालिनी ॥ ध्यानातीता ध्यानगम्या ध्यानज्ञा ध्यानधारिणी ॥ ७६ ॥ लम्बोदरी च लम्बोष्ठी जाम्बवंती जलोदरी ॥ महोदरी मुक्त

केशी मुक्तकामार्थसिद्धिदा ॥ ७७ ॥ तपस्विनी तपोनिष्ठा सुपर्णा धर्मवासिनी ॥ बाणचापधरा धीरा पाञ्चाली पञ्चमप्रिया ॥ ७८ ॥ गुह्यांगी च सुभीमा च गुह्यतत्त्वा निरंजना ॥ अशरीरा शरीरस्था संसारार्णवतारिणी ॥ ७९ ॥ अमृता निष्कला भद्रा सकला कृष्ण पिंगला ॥ चक्रप्रिया च चक्राह्वा पंचचक्रादिदारिणी ॥ ८० ॥ पद्मरागप्रतीकाशा निर्मलाकाशसन्निभा ॥ अधःस्था ऊर्द्ध्वरूपा च ऊर्द्ध्वपद्मनिवासिनी ॥ ८१ ॥ कार्यकारणकर्तृत्वे शश्वद्रूपेषु संस्थिता ॥ रसज्ञा रसमध्यस्था गन्धस्था गन्धरूपिणी ॥८२॥ परब्रह्मस्वरूपा च परब्रह्मनिवासिनी ॥ शब्दब्रह्मस्वरूपा च शब्दस्था शब्दवर्जिता ॥ ८३ ॥ सिद्धिर्बुद्धिः परा बुद्धिः सन्दीप्तिर्मध्यसंस्थिता ॥ स्वगुह्या शाम्भवी शक्तिस्तत्त्वस्था तत्त्वरूपिणी ॥ ८४ ॥ शाश्वती भूतमाता च महाभूताधिपप्रिया ॥ शुचिप्रेता धर्मसिद्धिर्धर्मवृद्धिः पराजिता ॥ ८५ ॥ कामसंदीपिनी कामा सदाकौतूहलप्रिया ॥ जटाजूटधरा मुक्ता सूक्ष्मा शक्तिविभूषणा ॥ ८६ ॥ द्वीपिचर्म्मपरीधाना चीरवल्कलधारिणी ॥ त्रिशूलडमरुधरा नरमालाविभूषणा ॥ ८७ ॥ अत्युग्ररूपिणी चोग्रा कल्पांतदहनोपमा ॥ त्रैलोक्य साधिनी साध्या सिद्धिसाधकवत्सला ॥ ८८ ॥ सर्वविद्यामयी सारा चासुराणां विनाशिनी ॥ दमनी दामनी दांता दयादोग्ध्री दुरापहा ॥ ॥ ८९ ॥ अग्निजिह्वोपमा घोरा घोरघोरेतरानना ॥ नारायणी नारसिंही नृसिंहहृदये स्थिता ॥ ९० ॥ योगेश्वरी योगरूपा योग माता च योगिनी ॥ खेचरी खचरी खेला निर्वाणपदसंश्रया ॥ ९१ ॥ नागिनी नागकन्या च सुवेशा नागनायिका ॥ विषज्वालावती दीप्ता कलाशतविभूषणा ॥ ९२ ॥ तीव्रवक्त्रा महावक्त्रा नागकोटित्वधारिणी ॥ महासत्त्वा च धर्मज्ञा धर्मातिसुखदायिनी ॥ ९३ ॥ कृष्णमूर्द्धा महामूर्द्धा घोरमूर्द्धा वरानना ॥ सर्वेन्द्रियमनोन्मत्ता सर्वेन्द्रियमनोमयी ॥ ९४ ॥ सर्वसंग्रामजयदा सर्वप्रहरणोद्यता ॥ सर्वपीडोपशमनी सर्वारिष्टनिवारिणी ॥ ९५ ॥ सर्वैश्वर्य्यसमुत्पन्ना सर्वग्रहविनाशिनी ॥ मातंगी मत्तमातंगी मातङ्गीप्रिय मण्डला ॥ ९६ ॥ अमृतोदधिमध्यस्था कटिसूत्रैरलंकृता ॥ अमृतोदधिमध्यस्था प्रवालवसनाम्बुजा ॥ ९७ ॥ मणि मण्डलमध्यस्था ईषत्प्रहसितानना ॥ कुमुदा ललिता लोला लाक्षालोहितलोचना ॥ ९८ ॥ दिग्वासा देवदूती च देवदेवाधि

देवता ॥ सिंहोपरि समारूढा हिमाचलनिवासिनी ॥ ९९ ॥ अट्टाट्टहासिनी घोरा घोरदैत्यविनाशिनी ॥ अत्युग्ररक्तवस्त्राभा नाग केयूरमण्डिता ॥ १०० ॥ मुक्ताहारलतोपेता तुंगपीनपयोधरा ॥ रक्तोत्पलदलाकारा मदाघूर्णितलोचना ॥ १०१ ॥ समस्त देवतामूर्तिः सुरारिक्षयकारिणी ॥ खड्गिनी शूलहस्ता च चक्रिणी चक्रमालिनी ॥ १०२ ॥ शंखिनी चापिनी बाणा वज्रिणी वज्र दण्डिनी ॥ आनन्दोदधिमध्यस्था कटिसूत्रैरलंकृता ॥ १०३ ॥ नानाभरणदीप्तांगी नानामणिविभूषिता ॥ जगदानंसंभूता चिंता मणिगुणान्विता ॥ १०४ ॥ त्रैलोक्यनमिता तुर्य्यचिन्मयानन्दरूपिणी ॥ त्रैलोक्यनन्दिनी देवी दुःखदुस्वप्ननाशिनी ॥ १०५ ॥ घोराग्निदाहशमनी राजदेवार्थसाधिनी ॥ महापराधराशिघ्नी महाचौरभयापहा ॥ १०६ ॥ रागादिदोषरहिता जरामरणवर्जिता ॥ चन्द्रमण्डलमध्यस्था पीयूषार्णवसंभवा ॥ १०७ ॥ सर्वदेवैः स्तुता देवी सर्वसिद्धैर्नमस्कृता ॥ अचिंत्यशक्तिरूपा च मणिमंत्रमहौषधिः ॥ १०८ ॥ आस्तिस्वस्तिमयी बाला मलयाचलवासिनी ॥ धात्री विधात्री संहर्त्री रतिज्ञा रतिदायिनी ॥ १०९ ॥ रुद्राणी रुद्ररूपा च रुद्ररौद्रार्तिनाशिनी ॥ सर्वज्ञा चैव धर्मज्ञा रसज्ञा दीनवत्सला ॥ ११० ॥ अनाहता त्रिनयना निर्भारा निर्वृतिः परा ॥ परा घोरा करालाक्षी सुमतिश्रैष्ठ्यदायिनी ॥ १११ ॥ मंत्रालिका मंत्रगम्या मंत्रमाला सुमंत्रिणी ॥ श्रद्धानन्दा महाभद्रा निर्द्वन्द्वा निर्गुणात्मिका ॥ ११२ ॥ धरिणी धारिणी पृथ्वी धरा धात्री वसुन्धरा ॥ मेरुमन्दरमध्यस्था स्थितिः शङ्करवल्लभा ॥ ११३ ॥ श्रीमतीः श्रीमयी श्रेष्ठा श्रीकरी भावभाविनी ॥ श्रीदा श्रीमा श्रीनिवासा श्रीमती श्रीमतां गतिः ॥ ११४ ॥ उमा सारंगिणी कृष्णा कुटिला कुटिलालका ॥ त्रिलोचना त्रिलोकात्मा पुण्यपुण्या प्रकीर्तिता ॥ ११५ ॥ अमृता सत्यसंकल्पा सा सत्या ग्रंथिभेदिनी ॥ परेशी परमा साध्या परा विद्या परात्परा ॥ ११६ ॥ सुन्दरांगी सुवर्णाभा सुरासुरनमस्कृता ॥ प्रजा प्रजावती धन्या धनधान्यसमृद्धिदा ॥ ११७ ॥ ईशानी भुवनेशानी भवानी भुवनेश्वरी ॥ अनंतानंतमहिता जगत्सारा जगद्भवा ॥ ११८ ॥ अचिंत्यात्मा चिंत्यशक्तिश्चिंता चिंत्यस्वरूपिणी ॥ ज्ञानगम्या ज्ञानमूर्तिर्ज्ञानिनी ज्ञानशालिनी ॥ ११९ ॥ असिता घोररूपा च सुधाधारा सुधावहा ॥

भास्करी भास्वती भीतिर्भास्वद्दक्षानुशायिनी ॥ १२० ॥ अनसूया क्षमा लज्जा दुर्लभाभरणात्मिका ॥ विश्वघ्नी विश्ववीरा च विश्वघ्नी विश्वसंस्थिता ॥ १२१ ॥ शीलस्था शीलरूपा च शीला शीलप्रदायिनी ॥ बोधिनी बोधकुशला रोधिनी बोधिनी तथा ॥ १२२ ॥ विद्योतिनी विचित्रात्मा विद्युत्पटलसन्निभा ॥ विश्वयोनिर्महायोनिः कर्मयोनिः प्रियात्मिका ॥ १२३ ॥ रोहिणी रोगशमनी महा रोमज्वरापहा ॥ रसदा पुष्टिदा पुष्टिर्मानदा मानवप्रिया ॥ १२४ ॥ कृष्णांगवाहिनी कृष्णा कृष्णा कृष्णसहोदरी ॥ शाम्भवी शम्भुरूपा च शम्भुस्था शम्भुसम्भवा ॥ १२५ ॥ विश्वोदरी योगमाता योगमुद्राग्रयोगिनी ॥ वागीश्वरी योगनिद्रा योगिनी कोटि सेविता ॥ १२६ ॥ कौलिका मन्दकन्या च श्रृंगारपीठवासिनी ॥ क्षेमंकरी सर्वरूपा दिव्यरूपा दिगम्बरा ॥ १२७ ॥ धूम्रवक्त्रा धूम्रनेत्रा धूम्रकेशी च धसरा ॥ पिनाकी रुद्रवेताली महावेतालरूपिणी ॥ १२८ ॥ तपिनी तापिनी दीक्षा विष्णु विद्यात्मना श्रिता ॥ मंथरा जठरा ताम्रा अग्निजिह्वा भयापहा ॥ १२९ ॥ पशुघ्नी पशुरूपा च पशुहा पशुवाहिनी ॥ पिता माता च धीरा च पशुपाशविनाशिनी ॥ १३० ॥ चन्द्रमा चन्द्ररेखा चन्द्रकांतिविभूषणा ॥ कुंकुमांकितसर्वांगी सुधासद्गुरुलोचना ॥ ॥ १३१ ॥ शुक्लाम्बरधरा देवी वीणापुस्तकधारिणी ॥ ऐरावतपद्मधरा श्वेतपद्मासनस्थिता ॥ १३२ ॥ रक्ताम्बरधरा देवी रक्त पद्मविलोचनना ॥ दुस्तरा तारिणी तारा तरुणी ताररूपिणी ॥ १३३ ॥ सुधाधारा च धर्मज्ञा धर्मसंगोपदेशिनी ॥ भगेश्वरी भगाराध्या भगिनी भगनायिका ॥ १३४ ॥ भगबिम्बा भगक्लिन्ना भगयोनिर्भगप्रदा ॥ भगेश्वरी भगाराध्या भगिनी भगनायिका ॥ १३५ ॥ भगेशी भगरूपा च भगगुह्या भगावहा ॥ भगोदरी भगानन्दा भगस्था भगशालिनी ॥ १३६ ॥ सर्वसंक्षोभिणी शक्तिः सर्वविद्रा विणी तथा ॥ मालिनी माधवी माध्वी मधुरूपा महोत्कटा ॥ १३७ ॥ भरुण्डचन्द्रिका ज्योत्स्ना विश्वचक्षुस्तमोपहा ॥ सुप्रसन्ना महादूती यमदूती भयंकरी ॥ १३८ ॥ उन्मादिनी महारूपा दिव्यरूपा सुरार्चिता ॥ चैतन्यरूपिणी नित्या क्लिन्ना काममदोद्धता ॥ ॥ १३९ ॥ मदिरानन्दकैवल्या मदिराक्षी मदालसा ॥ सिद्धेश्वरी सिद्धविद्या सिद्धाद्या सिद्धसम्भवा ॥ १४० ॥ सिद्धर्द्धिः

सिद्धमाता च सिद्धिः सर्वार्थसिद्धिदा ॥ मनोमयी गुणातीता परज्योतिःस्वरूपिणी ॥ १४१ ॥ परेशी परगा पारा परा सिद्धिः
परा गतिः ॥ विमला मोहिनी चाद्या मधुपानपरायणा ॥ १४२ ॥ वेदवेदांगजननी सर्वशास्त्रविशारदा ॥ सर्वदेवमयी विद्या सर्वशास्त्र
मयी तथा ॥ १४३ ॥ सर्वज्ञानमयी देवी सर्वधर्ममयीश्वरी ॥ सर्वयज्ञमयी यज्ञा सर्वमंत्राधिकारिणी ॥ १४४ ॥ सर्वसम्प
त्प्रतिष्ठात्री सर्वविद्राविणी परा ॥ सर्वसंक्षोभिणी देवी सर्वमंगलकारिणी ॥ १४५ ॥ त्रैलोक्याकर्षिणी देवी सर्वाह्लादनकारिणी ॥
सर्वसंमोहिनी देवी सर्वस्तंभनकारिणी ॥ १४६ ॥ त्रैलोक्यजृंभिणी देवी तथा सर्ववशंकरी ॥ त्रैलोक्यरंजिनी देवी सर्वसम्पत्तिदायिनी
॥ १४७ ॥ सर्वमंत्रमयी देवी सर्वद्वन्द्वक्षयंकरी ॥ सर्वसिद्धिप्रदा देवी सर्वसम्पत्प्रदायिनी ॥ १४८ ॥ सर्वप्रियकरी देवी सर्व
मंगलकारिणी ॥ सर्वकामप्रदा देवी सर्वदुःखविमोचिनी ॥ १४९ ॥ सर्वमृत्युप्रशमनी सर्वविघ्नविनाशिनी ॥ सर्वांगसुंदरी माता
सर्वसौभाग्यदायिनी ॥ १५० ॥ सर्वज्ञा सर्वशक्तिश्च सर्वैश्वर्यफलप्रदा ॥ सर्वज्ञानमयी देवी सर्वव्याधिविनाशिनी ॥ १५१ ॥
सर्वाधारस्वरूपा च सर्वपापहरा तथा ॥ सर्वानन्दमयी देवी सर्वेक्षायाः स्वरूपिणी ॥ १५२ ॥ सर्वलक्ष्मीमयी विद्या सर्वेप्सितफलप्रदा ॥
सर्वारिष्टप्रशमनी परमानन्ददायिनी ॥ १५३ ॥ त्रिकोणानिलया त्रिस्था त्रिमात्रा त्रितनुस्थिता ॥ त्रिवेणी त्रिपथा त्रिस्था त्रिमूर्तिस्त्रि
पुरेश्वरी ॥ १५४ ॥ त्रिधाम्नी त्रिदशाध्यक्षा त्रिवित् त्रिपुरवासिनी ॥ त्रयीविद्या च त्रिशिरास्त्रैलोक्या च त्रिपुष्करा ॥ १५५ ॥
त्रिकोटरस्था त्रिविधा त्रिपुरा त्रिपुरात्मिका ॥ त्रिपुरश्रीस्त्रिजननी त्रिगुरा त्रिपुरसुन्दरी ॥ १५६ ॥ इदं त्रिपुरसुन्दर्याः स्तोत्रं नाम
सहस्रकम् ॥ गुह्याद्गुह्यतरं पुत्र तव प्रीत्यै प्रकीर्तितम् ॥ १५७ ॥ गोपनीयं प्रयत्नेन पठनीयं प्रयत्नतः ॥ नातः परतरं पुण्यं
नातः परतरं तपः ॥ १५८ ॥ नातः परतरं स्तोत्रं नातः परतरा गतिः ॥ स्तोत्रं सहस्रनामाख्यं मम वक्त्राद्विनिर्गतम् ॥
॥ १५९ ॥ यः पठेत्प्रयतो भक्त्या शृणुयाद्वा समाहितः ॥ मोक्षार्थी लभते मोक्षं स्वर्गार्थी स्वर्गमाप्नुयात् ॥ १६० ॥
कामांश्च प्राप्नुयात्कामी धनार्थी च लभेद्धनम् ॥ विद्यार्थी लभते विद्यां यशोऽर्थी लभते यशः ॥ १६१ ॥ कन्यार्थी लभते

कन्या सुतार्थी लभते सुतम् ॥ गुर्विणी जनयेत्पुत्रं कन्या विन्दति सत्पतिम् ॥ १६२ ॥ मूर्खोऽपि लभते शास्त्रं हीनोऽपि लभते गतिम् ॥ अर्कामायां हि संक्रांत्यामष्टम्योश्च विशेषतः ॥ १६३ ॥ पौर्णमास्यां चतुर्दश्यां नवम्यां भौमवासरे ॥ पठेद्वा पाठयेद्वापि शृणुयाद्वा समाहितः ॥ १६४ ॥ स मुक्तः सर्वपापेभ्यः कामेश्वरसमो भवेत् ॥ लक्ष्मीवान्धनवांश्चैव वल्लभः सर्वयोषिताम् ॥ १६५ ॥ तस्य वश्यं भवेदाशु त्रैलोक्यं सचराचरम् ॥ रुद्रं दृष्ट्वा यथा देवा विष्णुं दृष्ट्वा च दानवाः ॥ १६६ ॥ यथाहि गरुडं दृष्ट्वा सिंहं दृष्ट्वा यथा गजाः ॥ कीटवत्प्रपलायंते तस्य वक्त्रावलोकनात् ॥ १६७ ॥ अग्निचौरभयं तस्य कदाचिन्नैव संभवेत् ॥ पाप्मानो विविधाः शांतिं मेरुपर्वतसन्निभाः ॥ १६८ ॥ यस्मात्तच्छृणुयाद्विघ्नांस्तृणं वह्निहुतं यथा ॥ एकदा पठनादेव सर्वपापक्षयो भवेत् ॥ १६९ ॥ दशधा पठनादेव वाचां सिद्धिः प्रजायते ॥ शतधा पठनाद्वापि खेचरो जायते नरः ॥ १७० ॥ सहस्रदशसंख्यं वा यः पठेद्भक्तिमानसः ॥ मातास्य जगतां धात्री प्रत्यक्षा भवति ध्रुवम् ॥ १७१ ॥ लक्षं पूर्णं यथा पुत्र स्तोत्रराजं पठेत्सुधीः ॥ भव पाशविनिर्मुक्तो मम तुल्यो न संशयः ॥ १७२ ॥ सर्वतीर्थेषु यत्पुण्यं सकृज्जप्त्वा लभेन्नरः ॥ सर्ववेदेषु यत्प्रोक्तं तत्फलं परिकीर्तितम् ॥ १७३ ॥ भूत्वा च बलवान् पुत्रधनवान् सर्वसम्पदः ॥ देहांते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥ १७४ ॥ स यास्यति न संदेहः स्तवराजस्य कीर्तनात् ॥ १७५ ॥ इति श्रीवामकेश्वरतंत्रे हरकुमारसंवादे महात्रिपुरसुन्दर्याः षोडश्याः सहस्रनामस्तोत्रं समाप्तम् ॥

अथ षोडशीहृदयप्रारंभः ॥ कैलासे करुणाक्रांता परोपकृतिमानसा ॥ पप्रच्छ करुणासिंधुं सुप्रसन्नं महेश्वरम् ॥ १ ॥ श्रीपार्वत्युवाच ॥ आगामिनि कलौ ब्रह्मन् धर्मकर्मविवर्जिताः ॥ भविष्यंति जनास्तेषां कथं श्रेयो भविष्यति ॥ २ ॥ श्रीशिव उवाच ॥ शृणु देवि प्रवक्ष्यामि तव स्नेहान्महेश्वरि ॥ दुर्लभं त्रिषु लोकेषु सुंदरीहृदयस्तवम् ॥ ३ ॥ ये नरा दुःखसंतप्ता दारिद्र्यहतमानसाः ॥ अस्यैव पाठमात्रेण तेषां श्रेयो भविष्यति ॥ ४ ॥ ॐ अस्य श्रीमहाषोडशीहृदयस्तोत्रमंत्रस्य आनन्दभैरव ऋषिः । दैवीगायत्री च्छंदः । श्रीमहात्रिपुरसुन्दरी देवता । ऐं बीजम् । सौः शक्तिः । क्लीं कीलकम् । धर्मार्थकाममोक्षार्थे पाठे विनियोगः ॥ ॐ आनन्दभैरवऋषये नमः शिरसि

॥४६७॥ श्रीं०म०

१। देवीगायत्रीच्छन्दसे नमः मुखे २। श्रीमहात्रिपुरसुंदरीदेवतायै नमः हृदये ३। ऐं बीजाय नमः नाभौ ४। सौः शक्तये नमः स्वाधिष्ठाने ५। क्लीं कीलकाय नमः मूलाधारे ६। विनियोगाय नमः पादयोः ७ ॥ इति ऋष्यादिन्यासः ॥ ऐं ह्रीं क्लीं अंगुष्ठाभ्यां नमः ॥ १। क्लीं श्रीं सौः ऐं तर्जनीभ्यां नमः २। सौः ॐ ह्रीं श्रीं मध्यमाभ्यां नमः ३। ऐं कएलह्रीं हसकहलह्रीं अनामिकाभ्यां नमः ४। क्लीं सकल कनिष्ठिकाभ्यां नमः ५। सौः सौः ऐं क्लीं ह्रीं श्रीं करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ऐं ह्रीं क्लीं हृदयाय नमः १। क्लीं श्रीं सौः ऐं शिरसे स्वाहा २। सौः ॐ ह्रीं श्रीं शिखायै वषट् ३। ऐं कएल ह्रीं हसकल ह्रीं कवचाय हुं ४। क्लीं सकल नेत्रत्रयाय वौषट् ५। सौः सौः ऐं क्लीं ह्रीं श्रीं अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ अथ ध्यानम्—बालव्यक्तविभाकरामितनिभां भव्यप्रदां भारतीमीषत्फुल्लमुखाम्बुजस्मितकरैराशाभवान्धापहाम् ॥ पाशं साभयमंकुशं च वरदं संबिभ्रतीं भूतिदां भ्राजंतीं चतुरंबुजाकृतकरैर्भक्त्या भजे षोडशीम् ॥ ५ ॥ सुन्दरी सकलकल्मषापहा कोटिकंजकमनीयकान्तिभृत् ॥ कोटिकल्पकृतपुण्यकर्मणा पूजनीयपदपुण्यपुष्करा ॥ ६ ॥ शर्वरीशसमसुन्दरानना श्रीशशक्तिसुकृताश्रयाश्रिता ॥ सज्जनानुशरणीयसत्पदा संकटे सुरगणैः सुवन्दिता ॥ ७ ॥ या सुरासुररणे जयान्विता संजघान जगदम्बिकाऽजिता ॥ तां भजामि जननीं जगज्जनिं युद्धयुक्तदितिजान्सुदुर्जयान् ॥ ८ ॥ योगिनां हृदयसंगतां शिवां योगयुक्तमनसां यतात्मनाम् ॥ जाग्रतीं जगति यत्नतो द्विजा यां जपंति हृदि तां भजाम्यहम् ॥ ॥ ९ ॥ कल्पकास्तु कलयंति कालिकां यत्कला कलिजनोपकारिका ॥ कौलिकालिकलितांघ्रिपंकजां तां भजामि कलिकल्मषापहाम् ॥ ॥ १० ॥ बालार्कानंतशोचिर्निजतनुकिरणैर्दीपयंतीं दिगंतान् दीप्तैर्देदीप्यमानां दनुजदलवनानल्पदावानलाभाम् ॥ दान्तोदंतोग्रचित्तां दलितदितिसुतां दर्शनीयां दुरंतां देवीं दीनार्द्रचित्तां हृदि मुदितमनाः षोडशीं संस्मरामि ॥ ११ ॥ धीरान्धन्यान्धरित्रीधवविधृतशिरोधूतधूल्यब्जपादां धृष्टान्धाराधराधो विनिधृतचपलाचारुचन्द्रप्रभाभाम् ॥ धर्म्यान्धूतोपहारान्धरणिसुरधवोद्धारिणीं ध्येयरूपां धीमद्धन्यातिधन्यान्धनदधनवृतां सुंदरीं चिंतयामि ॥ १२ ॥ जयतु जयतु जल्पा योगिनी योगयुक्ता जयतु जयतु सौम्या सुन्दरी सुन्दरास्या ॥

जयतु जयतु पद्मा पद्मिनी केशवस्य जयतु जयतु काली कालिनी कालकांता ॥ १३ ॥ जयतु जयतु खर्वा षोडशी वेदहस्ता जयतु जयतु धात्री धर्मिणी धातृशांतिः ॥ जयतु जयतु वाणी ब्रह्मणो ब्रह्मवन्द्या जयतु जयतु दुर्गा दारिणी देवशत्रोः ॥ १४ ॥ देवि त्वं सृष्टिकाले कमलभवभृता राजसी रक्तरूपा रक्षाकाले त्वमम्बा हरिहृदयधृता सात्त्विकी श्वेतरूपा॥भूरिक्रोधा भवांते भवभवनगता तामसी कृष्णरूपा एताश्चान्यास्त्वमेव क्षितमनुजमला सुन्दरी केवलाद्या ॥१५॥ सुमलशमनमेतद्देवि गोप्यं गुणज्ञे ग्रहणमननयोग्यं षोडशीयं खलघ्नम्॥सुरतरुसमशीलं संपदे पाठकानां प्रभवति हृदयाख्यं स्तोत्रमत्यंतमान्यम्॥१६॥इदं त्रिपुरसुन्दर्य्याः षोडश्याः परमाद्भुतम्॥यः शृणोति नरः स्तोत्रं स सदा सुखमश्नुते ॥ १७ ॥ न शूद्राय प्रदातव्यं शठाय मलिनात्मने ॥ देयं दान्ताय भक्ताय ब्राह्मणाय विशेषतः ॥ १८ ॥ इति श्रीत्रिपुरसुन्दरीतंत्रे षोडशीहृदयस्तोत्रं समाप्तम् ॥ इति श्रीमंत्रमहार्णवे मध्यखण्डे श्रीत्रिपुरसुन्दरीषोडश्यास्तंत्रे षष्ठस्तरंगः ॥ ६ ॥


भुवनेश्वर्यै नमः ।




श्रीगणेशाय नमः ॥ अथ भुवनेश्वरीतंत्रप्रारंभः ॥ अथ वक्ष्ये जगद्धात्रीमधुना भुवनेश्वरीम् ॥ ब्रह्मादयोऽपि यां ज्ञात्वा लेभिरे श्रियमूर्जिताम् ॥ १ ॥ व्योमबीजं महेशानि कैलासादि प्रतिष्ठितम् ॥ वह्निबीजात्सुवर्णादि निष्पन्नं बहुधा प्रिये ॥ ॥ २ ॥ तेनायं वर्तते लोको भूमिमंडलसंस्थितः ॥ तुर्य्यस्वरेण पाताले शेषरूपेण वर्तते ॥ ३ ॥ महाभूमंडलं तस्मात्पातालस्यापि नायिका ॥ अत एव महेशानि भुवनाधीश्वरी प्रिये ॥ ४ ॥ हकारे व्योम तुर्य्येण स्वरेणानिलसंभवः ॥ विकारे सति रेफेण साक्षाद्वह्निस्वरूपिणी ॥ ५ ॥ वह्निबीजं वसु ज्ञेयं तस्माद्रेफश्च सुंदरी ॥ अत एव महेशानि सवायोः समता भवेत् ॥ ६ ॥ बिंदुचक्रामृता देवी प्लावयंती जगत्त्रयम् ॥ द्रवरूपा भवेत्तस्मात्स्रवंती चार्द्धमात्रया॥ अत एव महेशानि भुवनेशीति कथ्यते ॥ ७ ॥ तत्रादौ एकाक्षरबीजमंत्रप्रयोगः शारदातिलके ॥ मंत्रो यथा–(ह्रीं) इत्येकाक्षरो बीजमंत्रः ॥ अस्य श्रीभुवनेश्वरीमंत्रस्य शक्तिर्ऋषिः । गायत्रीच्छंदः । हकारो बीजम् । ईकारः शक्तिः । रेफः कीलकम् । श्रीभुवनेश्वरी देवता । चतुर्वर्गसिद्ध्यर्थे जपे विनियोगः ॥ शक्तिऋषये नमः शिरसि १ । गायत्रीच्छंदसे नमः मुखे २ । भुवनेश्वर्यै देवतायै नमः हृदि ३ । हं बीजाय नमः गुह्ये ४ । ईं शक्तये नमः पादयोः ५ । रं कीलकाय नमः नाभौ ६ । विनियोगाय नमः सर्वांगे ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ ह्रां अंगुष्ठाभ्यां नमः १ । ॐ ह्रीं तर्जनीभ्यां नमः २ । ॐ ह्रूं मध्यमाभ्यां नमः ३ । ॐ ह्रैं अनामिकाभ्यां नमः ४ । ॐ ह्रौं कनिष्ठिकाभ्यां नमः ५ । ॐ ह्रः करतलकरपृष्ठाभ्यां नमः ६ ॥ इति

करन्यासः ॥ ॐ ह्राँ हृदयाय नमः १ । ॐ ह्रीं शिरसे स्वाहा २ । ॐ ह्रूँ शिखायै वषट् ३ । ॐ ह्रैं कवचाय हुं ४ । ॐ ह्रौं नेत्रत्रयाय वौषट् ५ । ॐ ह्रः अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ इति न्यासं कृत्वा सर्वदेवोपयोगिपद्धतिमार्गेण सृष्टिस्थिति संहारमातृकान्यासं च कुर्यात् ॥ अशक्तश्चेत् मंत्रवर्णन्यासं कुर्यात् ॥ ॐ ह्रल्लेखायै नमः शिरसि १ । ॐ एं गगनायै नमः मुखे २ । ॐ उं रक्तायै नमः हृदि ३ । ॐ इं करालिकायै नमः गुह्ये ४ । ॐ अं महोच्छुष्मायै नमः पादयोः ५ ॥ इति मंत्रवर्णन्यासः ॥ ॐ ह्रल्लेखायै ऊर्ध्ववक्त्राय नमः शिरसि १ । ॐ एं गगनायै पूर्ववक्त्राय नमः मुखे २ । ॐ उं रक्तायै दक्षिणवक्त्राय नमः हृदि ३ । ॐ इं करालिकायै उत्तरवक्त्राय नमः गुह्ये ४ । ॐ अं महोच्छुष्मायै पश्चिमवक्त्राय नमः पादयोः ५ ॥ इति पंचवक्त्रन्यासः ॥ ॐ गायत्रीसहितब्रह्मणे नमः भाले १ । ॐ सावित्रीसाहिताविष्णवे नमः दक्षिणकपोले २ । ॐ वागीश्वरीसहितमहेश्वराय नमः वाम कपोले ३ । ॐ श्रीसहितधनपतये नमः वामकर्णाग्रे ४ । ॐ रतिसहितस्मराय नमः मुखे ५ । ॐ पुष्टिसहितगणपतये नमः दक्षिणकर्णो परि ६ । ॐ शंखनिधये नमः दक्षिणगंडकर्णान्तराले ७ । ॐ पद्मनिधये नमः वामगंडकर्णांतराले ८ । ॐ ह्रीं मूलदेवताभुवनेश्वर्य्यै नमः मुखे ९ ॥ इति विन्यसेत् ॥ ततः ॐ गायत्रीसहितब्रह्मणे नमः कंठमूले १ । ॐ सावित्रीसहितविष्णवे नमो दक्षिणस्तने २ । ॐ वागीश्वरीसहितमहेश्वराय नमः वामस्तने ३ । ॐ श्रीसहितधनपतये नमः वामांसे ४ । ॐ रतिसहितस्मराय नमः हृदयकमले ५ । ॐ पुष्टिसहितगणपतये नमः दक्षिणांसे ६ । ॐ शंखनिधये नमः दक्षिणपार्श्वे ७ । ॐ पद्मनिधये नमः वामपार्श्वे ८ । ॐ ह्रीं मूलदेवता भुवनेश्वर्य्यै नमः नाभौ ९ ॥ इति विन्यसेत् ॥ ततः ब्राह्म्यै नमः भाले १ । ॐ माहेश्वर्य्यै नमः वामांसे २ । ॐ कौमार्य्यै नमः वामपार्श्वे ३ । ॐ वैष्णव्यै नमः जठरे ४ । ॐ वाराह्यै नमः दक्षिणपार्श्वे ५ । ॐ इन्द्राण्यै नमः दक्षिणांसे ६ । ॐ चामुंडायै नमः गले ७ । ॐ महालक्ष्म्यै नमः हृदि ८ ॥ इति विन्यसेत् ॥ ततो हृदये करं दत्त्वा—ॐ ह्रीं मूलदेवताभुवनेश्वर्य्यै सर्वांगे व्यापकं भव ॥ इति विन्यस्य देवतारूपं भावयन् ध्यायेत् ॥ अथ ध्यानम्—उद्यदिनद्युतिमिंदुकिरीटां तुंगकुचां नयन

भुवनेश्वरीपूजनयन्त्रम्।





॥४६१॥

त्रययुक्ताम् ॥ स्मेरमुखीं वरदांकुशपाशाभीतिकरां प्रभजे भुवनेशीम् ॥ १ ॥ इति ध्यात्वा सर्वतोभद्रमंडले पीठदेवतापद्धतिमार्गेण संस्थाप्य अथवा 'मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः' इति पीठदेवताः संपूज्य पूर्वादिक्रमेण पीठशक्तीः पूजयेत्॥ तद्यथा–ॐ जयायै नमः १ । ॐ विजयायै नमः २ । ॐ अजितायै नमः ३ । ॐ अपराजितायै नमः ४ । ॐ नित्यायै नमः ५ । ॐ विलासिन्यै नमः ६ । ॐ दोग्ध्र्यै नमः ७ । ॐ अघोरायै नमः ८ । पीठमध्ये ॐ मंगलायै नमः ९ ॥ इति नवपीठशक्तीः पूजयेत् ॥ ततः षट्कोणाष्टदलवृतषोडशदलभूपुरात्मकं स्वर्णादिनिर्मितं यंत्रमभ्युत्तारणपूर्वकं 'ॐ ह्रीं सर्वशक्तिकमलासनाय नमः । इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्राणप्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य आवाहनादि पुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्यात् ॥ तत्र क्रमः–देव्याः समीपे मध्ये । ॐ हृल्लेखायै नमः हृल्लेखाश्रीपादुकां पूजयामि तर्पयामि नमः । इति सर्वत्र १ । पूर्वे । ॐ एं गगनायै नमः गगनाश्रीपा० २ । दक्षिणे । ॐ रक्तायै नमः रक्ताश्रीपा० ३ । उत्तरे । ॐ ईं करालिकायै नमः करालिकाश्रीपा० ४ । पश्चिमे । ॐ महोच्छुष्मायै नमः महोच्छुष्माश्रीपा० ५ । इति पूजयेत् । ततः पुष्पांजलिमादाय मूलमुच्चार्य्य–ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ ततः षट्कोणकेसरेषु अग्निकोणे । ॐ ह्रां हृदयाय नमः हृदयश्रीपा० १ । निर्ऋतिकोणे । ॐ ह्रीं शिरसे स्वाहा शिरःश्रीपा० २ । वायव्ये । ॐ ह्रूं शिखायै वषट् शिखाश्रीपा० ३ । ईशान्ये । ॐ ह्रैं कवचाय हुं कवचश्रीपा० ४ । पूज्यपूजकयोर्मध्ये । ॐ ह्रौं नेत्रत्रयाय वौषट् नेत्रत्रयश्रीपा० ५ । देवीपश्चिमे ॐ ह्रः अस्त्राय फट् अस्त्रश्रीपा० ६ ॥ इति षडंगानि पूजयित्वा पुष्पांजलिं दद्यात् । इति द्वितीयावरणम् ॥ षट्कोणाग्रेषु पूर्वे । ॐ गायत्र्यै नमः । गायत्रीश्रीपा० १ । ॐ ब्रह्मणे नमः । ब्रह्मश्रीपा० २ । नैर्ऋते । ॐ सावित्र्यै नमः । सावित्रीश्रीपा० ३ । ॐ विष्णवे नमः । विष्णुश्रीपादुकां पूजयामि तर्प० ४ । वायुकोणे । ॐ सरस्वत्यै नमः । सरस्वतीश्रीपा० ५ । ॐ रुद्राय नमः ।

रुद्रश्रीपा० ६ । आग्निकोणे । ॐ श्रियै नमः । श्रीश्रीपा० ७ । ॐ धनपतये नमः धनपतिश्रीपा० ८ । पश्चिमे । ॐ रत्यै नमः । रतिश्रीपा० ९ । ॐ स्मराय नमः । स्मरश्रीपा० १० । ऐशान्याम् । ॐ पुष्ट्यै नमः । पुष्टिश्रीपा० ११ । ॐ गणपतये नमः । गणपतिश्रीपादुकां पू० १२ । षट्कोणदक्षिणे । ॐ शंखनिधये नमः । शंखनिधिश्रीपा० १३ । वामे । ॐ पद्मनिधये नमः । श्रीपा० १४ । ॥ पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति तृतीयावरणम् ॥ पूर्वाद्यष्टदले । ॐ अनंगकुसुमायै नमः । अनंगकसुमा श्रीपा० १ । ॐ अनंगकुसुमतुरायै नमः । अनंगकुसुमतुराश्रीपा० २ । ॐ अनंगदमनायै नमः अनंगदमनाश्रीपा० ३ । ॐ अनंग मदनातुरायै नमः । अनंगमदनातुराश्रीपा० ४ । ॐ भुवनपालायै नमः । भुवनपालाश्रीपा० । ॐ गगनवेगायै नमः । गगनवेगा श्रीपा० ६ । ॐ शशिरेखायै नमः । शशिरेखाश्रीपा० ७ । ॐ गगनरेखायै नमः । गगनरेखाश्रीपा० ८ ॥ इत्यष्टौ शक्तीः पूज यित्वा पुष्पांजलिं दद्यात् ॥ इति चतुर्थावरणम् ॥ षोडशदलेषु पूर्वादिक्रमेण । ॐ करालयै नमः । करालीश्रीपा० १ । ॐ विकरालयै नमः । विकरालीश्रीपा० २ । ॐ उमायै नमः । उमाश्रीपा० ३ । ॐ सरस्वत्यै नमः । सरस्वतीश्रीपादुकां पू० ४ । ॐ श्रियै नमः श्रीश्रीपादुकां पूजयामि तर्पयामि नमः ५ । ॐ दुर्गायै नमः । दुर्गाश्रीपा० ६ । ॐ उषायै नमः । उषाश्रीपा० ७ । ॐ लक्ष्म्यै नमः लक्ष्मीश्रीपा० ८ । ॐ श्रुत्यै नमः । श्रुतिश्रीपा० ९ । स्मृत्यै नमः । स्मृतिश्रीपा० १० । ॐ धृत्यै नमः । धृति श्रीपा० ११ । ॐ श्रद्धायै नमः । श्रद्धाश्रीपादुकां० १२ । ॐ मेधायै नमः । मेधाश्रीपादुकां पू० १३ । ॐ मत्यै नमः । मति श्रीपादुकां पूजया० १४ । ॐ कांत्यै नमः कांतिश्रीपा० १५ । ॐ आर्य्यायै नमः । आर्य्याश्रीपा० १६ ॥ इति पूजयित्वा पुष्पां जलिं दद्यात् ॥ इति पंचमावरणम् ॥ ततो भूपुराभ्यंतरे पूर्वादिक्रमेण । ॐ अनंगरूपायै नमः । अनंगरूपाश्रीपा० १ । ॐ अनंग मदनायै नमः । अनंगमदनाश्रीपा० २ । ॐ अनंगमदनातुरायै नमः । अनंगमदनातुराश्रीपा० ३ । ॐ भुवनरेखायै नमः । भुवनरेखाश्री पा० ४ । ॐ भुवनपालिकायै नमः । भुवनपालिकाश्रीपा० ५ । ॐ सर्वशिशिरायै नमः । सर्वशिशिराश्रीपा० ६ । अनंगवेदनायै नमः ।

अनंगवेदनाश्रीपादुकांपू० ७। ॐअनंगमेखलायै नमः। अनंगमेखलाश्रीपा० ८। इति पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति षष्ठावरणम् ॥
ततो भूपुरे पूर्वादिक्रमेण। ॐ लं इन्द्राय देवाधिपतये सायुधाय सवाहनाय सपरिवाराय नमः। इन्द्रश्रीपा०। ॐ रं अग्नये तेजोऽधिपतये सायुधाय सवाहनाय सपरिवाराय नमः। अग्निश्रीपा० २। ॐ मां यमाय प्रेताधिपतये सायुधाय सवाहनाय सपरिवाराय नमः। यमश्रीपा० ३। ॐ क्षं निर्ऋतये रक्षोऽधिपतये सायुधाय सवाहनाय सपरिवाराय नमः। निर्ऋतिश्रीपा० ४। ॐ वं वरुणाय जलाधिपतये सायुधाय सवाहनाय सपरिवाराय नमः। वरुणश्रीपा० ५। ॐ यं वायवे प्राणाधिपतये सायुधाय सवाहनाय सपरिवाराय नमः। वायुश्रीपादुकां पू० ६। ॐ सौं सोमाय ताराधिपतये सायुधाय सवाहनाय सपरिवाराय नमः। सोमश्रीपा० ७। ॐ हं ईशानाय गणाधिपतये सायुधाय सवाहनाय सपरिवाराय नमः। ईशानश्रीपा० ८। इन्द्रेशानयोर्मध्ये। ॐ आं ब्रह्मणे प्रजाधिपतये सायुधाय सवाहनाय सपरिवाराय नमः। ब्रह्मश्रीपा० ९। निर्ऋतिवरुणयोर्मध्ये ॐ ह्रीं अनंताय नागाधिपतये सायुधाय सवाहनाथ सपरिवाराय नमः। अनंतश्रीपा० १०॥ इति दशदिक्पालान्पूजयेत् ॥ तद्बहिः पूर्वादिक्रमेण। ॐ वं वज्राय नमः १। ॐ शं शक्तये नमः २। ॐ दं दंडाय नमः ३। ॐ खं खड्गाय नमः ४। ॐ पां पाशाय नमः ५। ॐ अं अंकुशाय नमः ६। ॐ गं गदाय नमः ७। ॐ त्रिं त्रिशूलाय नमः ८। ॐ पं पद्माय नमः ९। ॐ चं चक्राय नमः १०। इत्यस्त्राणि पूजयेत् ॥ इति सप्तमावरणम् ॥ इत्यावरणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य जपं कुर्य्यात् ॥ अस्य पुरश्चरणं द्वात्रिंशल्लक्षजपः ॥ तद्दशांशेन हवनतर्पणमार्जनब्राह्मणभोजनानि कुर्य्यात् ॥ एवं कृते मंत्रः सिद्धो भवति। सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च–प्रजपेन्मंत्रविन्मंत्रं द्वात्रिंशल्लक्षमानतः ॥ त्रिस्वादूक्तैः प्रजुहुयादष्टद्रव्यैर्दशांशतः ॥ १ ॥ पूज्यते सकलैर्देवैः किंपुनर्मनुजोत्तमैः ॥ मंत्री त्रिमधुरोपेतैर्हुत्वाश्वत्थसमिद्वरैः ॥ २ ॥ ब्राह्मणान्वशयेच्छीघ्रं पार्थिवान्पद्महोमतः ॥ पलाशपुष्पैस्तत्पत्नीर्मंत्रिणं कुमुदैरपि ॥ ३ ॥ पंचविंशतिसंजप्तैर्जलैर्नित्यं दिने दिने ॥

१ ॐ कुं कुबेराय धनाधिपतये सायुधाय० इति मतांतरे। २ घृतमधुशर्कराभिः। ३–अश्वत्थोदुम्बरप्लक्षन्यग्रोधसमिधस्तिलाः। सिद्धार्थपायसाज्यानि द्रव्याण्यष्टौ विदुर्बुधाः।

आत्मानमभिषिंचेयः सर्वसौभाग्यवान् भवेत् ॥ ४ ॥ पंचविंशतिसंजप्तं जलं प्रातः पिबेन्नरः ॥ अवश्यं महतीं प्रज्ञां कवीनामग्रणी र्भवेत् ॥ ५ ॥ कर्पूरागरुसंयुक्तं कुंकुमं साधुसाधितम् ॥ गृहीत्वा तिलकं कुर्याद्राजवश्यमनुत्तमम् ॥ ६ ॥ शालिपिष्टमयीं कृत्वा पुत्तलीं मधुरान्विताम् ॥ जप्तां प्रतिष्ठितप्राणां भक्षयेद्रविवासरे ॥ ७ ॥ वशं नयति राजानं नारीं वा नरमेव वा ॥ कंठमात्रोदके स्थित्वा वीक्ष्य तोयगतं रविम् ॥ ८ ॥ त्रिसहस्रं जपेन्मंत्रमिष्टां कन्यां लभेन्नरः ॥ अन्नं तु मंत्रितं मंत्री भुंजीत श्रीप्रसिद्धये ॥ ९ ॥ लिखितां भस्मनाऽमायां सुसाध्यां फलकादिषु॥ तत्काले दर्शयेद्यंत्रं सुखं सूयेत गर्भिणी ॥१०॥ इत्येकाक्षरो भुवनेश्वरीमंत्रप्रयोगः ॥ १ ॥

अथ त्र्यक्षरमंत्रप्रयोगः ॥ मंत्रो यथा-- ऐं ह्रीं श्रीं इति त्र्यक्षरात्मको भुवनेश्वरीमंत्रः । अस्य विधानम्-न्यासादिकं सर्वं पूर्ववत् । षडंगन्यासे तु विशेषः । ऐ ह्रां अंगुष्ठाभ्यां नमः १ । ऐं ह्रीं तर्जनीभ्यां नमः २ । ऐं ह्रूं मध्यमाभ्यां नमः ३ । ऐं ह्रैं अनामिकाभ्यां नमः ४ । ऐं ह्रौं कनिष्ठिकाभ्यां नमः ५ । ऐं ह्रः करतलकरपृष्ठाभ्यां नमः ६ । इति करन्यासः ॥ ॐ ऐं ह्रां हृदयाय नमः १ । ॐ ऐं ह्रीं शिरसे स्वाहा २ । ॐ ऐं ह्रूं शिखायै वषट् ३ । ॐ ऐं ह्रैं कवचाय हुम् ४ । ॐ ऐं ह्रौं नेत्रत्रयाय वौषट् ५ । ॐ ऐं ह्रः अस्त्राय फट् ६॥ इति हृदयादिषडंगन्यासः ॥ एवं न्यासविधिं कृत्वा ध्यायेत् ॥ अथ ध्यानम्—सिंदूरारुणविग्रहां त्रिनयनां माणिक्य मौलिस्फुरत्तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम् ॥पाणिभ्यां मणिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं सौम्यां रत्नघटस्थसव्यचरणं ध्यायेत्परामंबिकाम् ॥ इति ध्यायेत्॥ अस्य पुजादिकं सर्वं पूर्ववत् ॥ अस्य पुरश्चरणं द्वादशलक्षजपः ॥ तत्तद्दशांशेन होमतर्पण मार्जनब्राह्मणभोजनानि कुर्यात् ॥ एवं कृते मंत्रः सिद्धो भवति ॥ सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथाच—रविलक्षं जपेन्मंत्रं पायसैर्मधुराप्लुतैः ॥ दशांशं जुहुयान्मंत्री पीठे प्रागीरिते यजेत् ॥ १ ॥ देवीप्रागुक्तमार्गेण गंधाद्यैरतिशोभनैः ॥ हुत्वा पलाशकुसुमैर्वाक्[1]श्रियं महतीं व्रजेत् ॥ २ ॥ ब्राह्मीघृतं पिबेज्जप्तं कवित्वं वत्सराद्भवेत् ॥ सिद्धार्थान् लवणोपेतान् हुत्वा मंत्री वशं

१-प्राप्येति शेषः ।

मं० म०
॥ ७२॥

नयेत् ॥ ३ ॥ नरं नारीं नरपतिं नात्र कार्या विचारणा ॥ चतुरंगुलजैः पुष्पैश्चन्दनांभःसमुक्षितैः ॥ ४ ॥ हुत्वा वशीकरोत्याशु त्रैलोक्य मपि साधकः ॥ जुहुयादरुणांभोजैरयुतं मधुराप्लुतैः ॥५॥ राज्यश्रियमवाप्नोति सलिलैस्तण्डुलैस्तथा ॥ प्रागुक्तान्यपि कर्माणि मंत्रेणानेन साधयेत् ॥ ६ ॥ इति त्र्यक्षरबीजात्मकभुवनेश्वरीमंत्रप्रयोगः ॥ २ ॥ श्रीगणेशाय नमः ॥ अथ त्रैलोक्यमंगलभुवनेश्वरीकवचम् ॥ देव्यु वाच ॥ देवेश भुवनेश्वर्या या या विद्याः प्रकाशिताः ॥ श्रुताश्चाधिगताः सर्वाः श्रोतुमिच्छामि सांप्रतम् ॥ १ ॥ त्रैलोक्यमंगलं नाम कवचं यत्पुरोदितम् ॥ कथयस्व महादेव मम प्रीतिकरं परम् ॥ २॥ ईश्वर उवाच ॥ शृणु पार्वति वक्ष्यामि सावधानावधारय ॥ त्रैलोक्यमंगलं नाम कवचं मंत्रविग्रहम् ॥ ३ ॥ सिद्धविद्यामयं देवि सर्वैश्वर्यसमन्वितम् ॥ पठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्यभाग्भवेत् ॥ ४ ॥ ॐ अस्य श्रीभुवनेश्वरीत्रैलोक्यमंगलकवचस्य शिव ऋषिः । विराट् छंदः । जगद्धात्री भुवनेश्वरी देवता । धर्मार्थकाममोक्षार्थे जपे विनियोगः ॥ शिवऋषये नमः शिरसि १ ॥ विराट्छंदसे नमः मुखे २ ॥ भुवनेश्वरीदेवतायै नमः हृदि ३ ॥ विनियोगाय नमः सर्वांगे ४ ॥ इति ऋष्यादिन्यासः ॥ ह्रीं बीजं मे शिरः पातु भुवनेशी ललाटकम् ॥ ऐं पातु दक्षनेत्रं मे ह्रीं पातु वामलोचनम् ॥१॥ श्रीं पातु दक्षकर्णं मे त्रिवर्णात्मा महेश्वरी ॥ वामकर्णं सदा पातु ऐं घ्राणं पातु मे सदा ॥ २ ॥ ह्रीं पातु वदनं देवि ऐं पातु रसनां मम ॥ वाक्पुटा च त्रिवर्णात्मा कंठं पातु परात्मिका ॥ ३ ॥ श्रीं स्कंधौ पातु नियतं ह्रीं भुजौ पातु सर्वदा ॥ क्लीं करौ त्रिपुटा पातु त्रिपुरैश्वर्यदायिनी ॥ ॥ ४ ॥ ॐ पातु हृदयं ह्रीं मे मध्यदेशं सदावतु ॥ क्रौं पातु नाभिदेशं मे त्र्यक्षरी भुवनेश्वरी ॥ ५ ॥ सर्वबीजप्रदा पृष्ठं पातु सर्ववशंकरी ॥ ह्रीं पातु गुह्यदेशं मे नमोभगवती कटिम् ॥ ६ ॥ माहेश्वरी सदा पातु शंखिनी जानुयुग्मकम् ॥ अन्नपूर्णा सदा पातु स्वाहा पातु पदद्वयम् ॥ ७ ॥ सप्तदशाक्षरा पायादन्नपूर्णाखिलं वपुः ॥ तारं माया रमाकामः षोडशार्णा ततः परम् ॥ ८ ॥ शिरःस्था सर्वदा पातु विंशत्यर्णात्मिका परा ॥ तारं दुर्गेयुगं रक्षिणीस्वाहेति दशाक्षरा ॥ ९ ॥ जयदुर्गा घनश्यामा पातु मां सर्वतो मुदा ॥ मायाबीजादिका चैषा दशार्णा च ततः परा ॥१०॥ उत्तप्तकांचनाभासा जयदुर्गाऽऽननेऽवतु ॥ तारं ह्रीं दुं च दुर्गायै नमोऽष्टार्णात्मिका परा ॥ ११ ॥ शंख

चक्रधनुर्बाणधरा मां दक्षिणेऽवतु ॥ महिषामर्दिनी स्वाहा वसुवर्णात्मिका परा ॥ १२ ॥ नैर्ऋत्यां सर्वदा पातु महिषासुरनाशिनी ॥ माया पद्मावती स्वाहा सप्तार्णा परिकीर्तिता ॥ १३ ॥ पद्मावती पद्मसंस्था पश्चिमे मां सदाऽवतु ॥ पाशांकुशपुटा माये हि पर मेश्वरि स्वाहा ॥ १४ ॥ त्रयोदशार्णा ताराद्या अश्वारूढाऽनलेऽवतु ॥ सरस्वति पंचस्वरे नित्यक्लिन्ने मदद्रवे ॥ १५ ॥ स्वाहा वस्वक्षरा विद्या उत्तरे मां सदाऽवतु ॥ तारं माया च कवचं खे रक्षेत्सततं वधूः ॥ १६ ॥ हूं क्षें ह्रीं फट् महाविद्या द्वादशार्णाखिलप्रदा ॥ त्वरिताष्टाहिभिः पायाच्छिवकोणे सदा च माम् ॥ १७ ॥ ऐं क्लीं सौः सततं बाला मूर्द्धदेशे ततोऽवतु ॥ बिंद्वंता भैरवी बाला हस्तौ मां च सदाऽवतु ॥ १८ ॥ इति ते कथितं पुण्यं त्रैलोक्यमंगलं परम् ॥ सारात्सारतरं पुण्यं महाविद्यौघविग्रहम् ॥ १९॥ अस्यापि पठनात्सद्यः कुबेरोऽपि धनेश्वरः॥ इन्द्राद्याः सकला देवा धारणात्पठनाद्यतः ॥२०॥सर्वसिद्धीश्वराः संतः सर्वैश्वर्यमवाप्नुयुः ॥ पुष्पांजल्यष्टकं दद्यान्मूलेनैव पृथक् पृथक् ॥ २१ ॥ संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात् ॥ प्रीति मन्योऽन्यतः कृत्वा कमला निश्चला गृहे ॥ २२ ॥ वाणी च निवसेद्वक्त्रे सत्यं सत्यं न संशयः ॥ यो धारयति पुण्यात्मा त्रैलोक्यमंगला भिधम् ॥ २३ ॥ कवचं परमं पुण्यं सोऽपि पुण्यवतां वरः ॥ सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यविजयी भवेत् ॥ २४ ॥ पुरुषो दक्षिणे बाहौ नारी वामभुजे तथा ॥ बहुपुत्रवती भूयाद्वंध्यापि लभते सुतम् ॥ २५ ॥ ब्रह्मास्त्रादीनि शस्त्राणि नैव कृंतंति तं जनम् ॥ एत त्कवचमज्ञात्वा यो भजेद्भुवनेश्वरीम् ॥ दारिद्र्यं परमं प्राप्य सोऽचिरान्मृत्युमाप्नुयात् ॥ २६ ॥ इति श्रीरुद्रयामले तंत्रे देवीश्वर संवादे त्रैलोक्यमंगलं नाम भुवनेश्वरीकवचं समाप्तम् ॥ अथ भुवनेश्वरीस्तोत्रं लिख्यते॥ अथानंदमयीं साक्षाच्छब्दब्रह्मस्वरूपिणीम् ॥ ईडे सकलसंपत्त्यै जगत्कारणमंबिकाम् ॥ १ ॥ आद्यामशेषजननीमरविंदयोनेर्विष्णोः शिवस्य च वपुःप्रतिपादयित्रीम् ॥ सृष्टिस्थितिक्षय करीं जगतां त्रयाणां स्तुत्वा गिरं विमलयाम्यहमम्बिके त्वाम् ॥ २ ॥ पृथ्व्या जलेन शिखिना मरुतां वरेण होत्रेन्दुना दिनकरेण च मूर्तिभाजः ॥ देवस्य मन्मथरिपोरपि शक्तिमत्ताहेतुस्त्वमेव खलु पर्वतराजपुत्रि ॥ ३ ॥ त्रिस्रोतसः सकलदेवसमर्चिताया वैशिष्ट्यकारण

मवैमि तदेव मातः ॥ त्वत्पादपंकजपरागपवित्रितासु शंभोर्जटासु सततं परिवर्तनं यत् ॥ ४ ॥ आनंदयेत्कुमुदिनीमधिपः कलानां नान्या
मिनः कमलिनीमथ नेतरां वा ॥ एकत्र मोदनविधौ परमे क ईष्टे त्वं तु प्रपंचमभिनंदयसि स्वदृष्ट्या ॥ ५ ॥ आप्याप्यशेषजगतां नव
यौवनासि शैलाधिराजतनयाप्यतिकोमलासि ॥ त्रय्याः प्रसूरपि तथा न समीक्षितासि ध्येयासि गौरि मनसो न पथि स्थितासि ॥ ६ ॥
आसाद्य जन्म मनुजेषु चिराद्दुरापं तत्रापि पाटवत्वमवाप्य निजेन्द्रियाणाम् ॥ नाभ्यर्चयंति जगतां जनयित्रि ये त्वां निःश्रेणिकाग्रमधि
रुह्य पुनः पतंति ॥ ७ ॥ कर्पूरचूर्णहिमवारिविलोडितेन ये चंदनेन कुसुमैश्च सुगंधिगंधैः ॥ आराधयंति हि भवानि समुत्सुकास्त्वां ते
खल्वशेषभुवनाधिभुवः प्रथंते ॥ ८ ॥ आविश्य मध्यपदवीं प्रथमे सरोजे सुप्ताहिराजसदृशी विरचय्य विश्वम् ॥ विद्युल्लतावलयविभ्रम
मुद्वहंती पद्मानि पंच विदलय्य समश्नुवाना ॥ ९ ॥ तन्निर्गतामृतरसैः परिषिक्तगात्रमार्गेण तेन निलयं पुनरप्यवाप्ता ॥ येषां हृदि
स्फुरसि जातु न ते भवेयुर्मातर्महेश्वरकुटुंबिनि गर्भभाजः ॥ १० ॥ आलंबिकुंडलभरामभिरामवक्त्रामापीवरस्तनतटीं तनुवृत्तमध्याम् ॥
चिंताक्षसूत्रकलशालिखिताढ्यहस्तामावर्तयामि मनसा तव गौरि मूर्तिम् ॥ ११ ॥ आस्थाय योगमवजित्य च वैरिषट्कमाबद्ध्य
चेंद्रियगणं मनसि प्रसन्ने ॥ पाशांकुशाभयवराढ्यकरां सुवक्त्रामालोकयंति भुवनेश्वरि योगिनस्त्वाम् ॥ १२ ॥ उत्तप्तहाटकनिभा
करिभिश्चतुर्भिरावर्तितामृतघटैरभिषिच्यमाना ॥ हस्तद्वयेन नलिने रुचिरे वहंती पद्मापि साभयवरा भवसि त्वमेव ॥ १३ ॥ अष्टाभिरुग्र
विविधायुधवाहिनीभिर्दोर्वल्लरीभिरधिरुह्य मृगाधिराजम् ॥ दूर्वादलद्युतिरमर्त्यविपक्षपक्षान् न्यक्कुर्वती त्वमसि देवि भवानि दुर्गा ॥ १४ ॥
आविर्निदाघजलशीकरशोभिवक्त्रां गुंजाफलेन परिकल्पितहारयष्टिम् ॥ पीतांशुकामसितकांतिमनंगतंत्रामाद्यां पुलिंदतरुणीमसकृत्स्म
रामि ॥ १५ ॥ हंसैर्गतिक्वणितनूपुरदूरदृष्टे मूर्तैरिवार्थवचनैरनुगम्यमानौ ॥ पद्माविवोर्ध्वमुखरूढसुजातनालौ श्रीकंठपत्नि शिरसा विदधे
तवांघ्री ॥ १६ ॥ द्वाभ्यां समीक्षितुमतृप्तिमतेव दृग्भ्यामुत्पाट्य भालनयनं वृषकेतनेन ॥ सांद्रानुरागतरलेन निरीक्ष्यमाणे जंघे शुभे अपि
भवानि तवानतोऽस्मि ॥ १७ ॥ ऊरू स्मरामि जितहस्तिकरावलेपौ स्थौल्येन मार्दवतया परिभूतरंभौ ॥ श्रेणीभरस्य सहनौ परि

कल्प्य दत्तौ स्तंभाविवांगवयसा तव मध्यमेन ॥ १८ ॥ श्रोण्यौ स्तनौ च युगपत् प्रथयिष्यतोच्चैर्बाल्यात्परेण वयसा परिहृष्टसारौ ॥
रोमावलीविलसितेन विभाव्य मूर्तिं मध्यं तव स्फुरतु मे हृदयस्य मध्ये ॥ १९ ॥ सख्यः स्मरस्य हरनेत्रहुताशशांत्यै लावण्यवारिभरितं
नवयौवनेन ॥ आपाद्य दत्तमिव पल्लवमप्रविष्टं नाभिं कदापि तव देवि न विस्मरेयम् ॥ २० ॥ ईशोऽपि गेहपिशुनं भसितं दधाने काश्मीर
कर्दममनुस्तनपंकजे ते ॥ स्नातोत्थितस्य करिणः क्षणलक्ष्यफेनौ सिंदूरितौ स्मरयतः समदस्य कुंभौ ॥२१॥ कंठातिरिक्तगलदुज्ज्वलकांति
धाराशोभौ भुजौ निजरिपोर्मकरध्वजेन ॥ कंठग्रहाय रचितौ किल दीर्घपाशौ मातर्मम स्मृतिपथं न विलंघयेताम् ॥ २२ ॥ नात्या
यतं रचितकंबुविलासचौर्यं भूषाभरेण विविधेन विराजमानम् ॥ कंठं मनोहरगुणं गिरिराजकन्ये संचिंत्य तृप्तिमुपयामि कदापि नाहम् ॥
॥ २३ ॥ अत्यायताक्षमभिजातललाटपट्टं मंदस्मितेन दरफुल्लकपोलरेखम् ॥ बिंबाधरं वदनमुन्नतदीर्घनासं यस्ते स्मरत्यसकृदम्ब स
एव जातः ॥ २४ ॥ आविस्तुषारकरलेखमनल्पगंधपुष्पोपरिभ्रमदलिव्रजनिर्विशेषम् ॥ यश्चेतसा कलयते तव केशपाशं तस्य
स्वयं गलति देवि पुराणपाशः ॥ २५ ॥ श्रुतिसुचरितपाकं श्रीमता स्तोत्रमेतत्पठति य इह मर्त्यो नित्यमार्द्रान्तरात्मा ॥ स भवति
पदमुच्चैः संपदां पादनम्रक्षितिपमुकुटलक्ष्मीलक्षणानां चिराय ॥ २६ ॥ इति श्रीरुद्रयामले तंत्रे भुवनेश्वरीस्तोत्रं समाप्तम् ॥
॥ अथ भुवनेश्वर्यष्टोत्तरशतनामस्तोत्रप्रारंभः ॥ कैलाशशिखरे रम्ये नानारत्नोपशोभिते ॥ नरनारीहितार्थाय शिवं पप्रच्छ पार्वती ॥
॥ १ ॥ देव्युवाच ॥ भुवनेश्वरीमहाविद्यानाम्नामष्टोत्तरं शतम् ॥ कथयस्व महादेव यद्यहं तव वल्लभा ॥ २ ॥ ईश्वर उवाच ॥ शृणु
देवि महाभागे स्तवराजमिमं शुभम् ॥ सहस्रनाम्नामधिकं सिद्धिदं मोक्षहेतुकम् ॥ ३ ॥ शुचिभिः प्रातरुत्थाय पठितव्यः समाहितैः ॥
त्रिकालं श्रद्धया युक्तैः सर्वकामफलप्रदः ॥ ४ ॥ ॐ अस्य श्रीभुवनेश्वर्यष्टोत्तरशतनामस्तोत्रस्य शक्तिर्ऋषिः । गायत्री च्छन्दः । भुवनेश्वरी
देवता । चतुर्वर्गसाधने विनियोगः ॥ ॐ महामाया महाविद्या महायोगा महोत्कटा ॥ माहेश्वरी कुमारी च ब्रह्माणी ब्रह्मरूपिणी ॥ ५ ॥
वागीश्वरी योगरूपा योगिनीकोटिसेविता ॥ जया च विजया चैव कौमारी सर्वमंगला ॥ ६ ॥ हिंगुला च विलासी च ज्वालिनी

ज्वालरूपिणी ॥ ईश्वरी क्रूरसंहारी कुलमार्गप्रदायिनी ॥ ७ ॥ वैष्णवी सुभगाकारा सुकुल्या कुलपूजिता ॥ वामाङ्गा वामचारा च
वामदेवप्रिया तथा ॥ ८ ॥ डाकिनी योगिनीरूपा भूतेशी भूतनायिका ॥ पद्मावती पद्मनेत्रा प्रबुद्धा च सरस्वती ॥ ९ ॥ भूचरी खेचरी
माया मातंगी भुवनेश्वरी ॥ कांता पतिव्रतासाक्षी सुचक्षुः कुण्डवासिनी ॥ १० ॥ उमा कुमारी लोकेशी सुकेशी पद्मरागिणी ॥ इन्द्राणी
ब्रह्मचाण्डाली चण्डिका वायुवल्लभा ॥ ११ ॥ सर्वधातुमयी मूर्तिर्जलरूपा जलोदरी ॥ आकाशी रणगा चैव नृकपालविभूषणा ॥
॥ १२ ॥ नर्मदा मोक्षदा चैव धर्म्मकामार्थदायिनी ॥ गायत्री चाथ सावित्री त्रिसंध्या तीर्थगामिनी ॥ १३ ॥ अष्टमी नवमी चैव
दशम्येकादशी तथा ॥ पौर्णमाणी कुहूरूपा तिथिमूर्तिस्वरूपिणी ॥ १४ ॥ सुरारिनाशकारी च उग्ररूपा च वत्सला ॥ अनला चार्द्ध
मात्रा च अरुणायतलोचना ॥ १५ ॥ लज्जा सरस्वती विद्या भवानी पापनाशिनी ॥ नागपाशधरा मूर्तिरगाधा धृतकुण्डला ॥ १६ ॥
क्षत्ररूपा क्षयकरी तेजस्विनी शुचिस्मिता ॥ अव्यक्ताव्यक्तलोका च शंभुरूपा मनस्विनी ॥ १७ ॥ मातंगी मत्तमातंगी महादेवप्रिया
सदा ॥ दैत्यघ्नी चैव वाराही सर्वशास्त्रमयी शुभा ॥ १८ ॥ य इदं पठते भक्त्या शृणुयाद्वा समाहितः ॥ अपुत्रो लभते पुत्रं निर्द्धनो धन
वान् भवेत् ॥ १९ ॥ मूर्खोऽपि लभते शास्त्रं चौरोऽपि लभते गतिम् ॥ वेदानां पाठको विप्रः क्षत्रियो विजयी भवेत् ॥ २० ॥ वैशस्तु
धनवान्भूयाच्छूद्रस्तु सुखमेधते ॥ अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः ॥ २१ ॥ ये पठंति सदा भक्त्या न ते वै दुःखभागिनः ॥
एककालं द्विकालं वा त्रिकालं वा चतुर्थकम् ॥ २२ ॥ ये पठंति सदा भक्त्या स्वर्गलोके च पूजिताः ॥ रुद्रं दृष्ट्वा यथा देवाः पन्नगा
गरुडं यथा ॥ शत्रवः प्रपलायंते तस्य वक्त्रविलोकनात् ॥ २३ ॥ इति श्री रुद्रयामले देवीश्वरसंवादे भुवनेश्वर्य्यष्टोत्तरशतनामस्तोत्रं
समाप्तम् ॥ अथ भुवनेश्वरीसहस्रनामस्तोत्रप्रारंभः ॥ ॐ अस्य श्रीभुवनेश्वरीसहस्रनामस्तोत्रमंत्रस्य सदाशिव ऋषिः। अनुष्टुप्छंदः। भुवनेश्वरी
देवता। लज्जा बीजम्। कमला शक्तिः। वाग्भवं कीलकम्। सर्वार्थसाधने पाठे विनियोगः ॥ ॐ भुवनेशी भुवाराध्या भवानी भयनाशिनी ॥
भवरूपा भवानन्दा भवसागरतारिणी ॥ १ ॥ भवोद्भवा भवरता भवभारनिवारिणी ॥ भव्यास्या भव्यनयना भव्यरूपा भवौषधिः ॥

॥ २ ॥ भव्यांगना भव्यकेशी भवपाशविमोचिनी ॥ भव्यासना भव्यवस्त्रा भव्याभरणभूषिता ॥ ३ ॥ भगरूपा भगानन्दा भगेशी भग
मालिनी ॥ भगविद्या भगवती भगक्लिन्ना भगावहा ॥ ४ ॥ भगांकुरा भगक्रीडा भगाढ्या भगमंगला ॥ भगलीला भगप्रीता भगरूप
द्भगेश्वरी ॥ ५ ॥ भगालया भगोत्साहा भगस्था भगपोषिणी ॥ भगोत्सवा भगविद्या भगमाता भगास्थिता ॥ ६ ॥ भगशक्तिर्भग
निधिर्भगपूजा भगेषणा ॥ भगस्वापा भगाधीशा भगार्च्या भगसुन्दरी ॥ ७ ॥ भगरेखा भगस्नेहा भगस्नेहविवर्धिनी ॥ भगिनी भगवी
जस्था भगभोगविलासिनी ॥ ८ ॥ भगाचारा भगाधारा भगाकारा भगाश्रया ॥ भगपुष्पा भगश्रीपा भगपुष्पनिवासिनी ॥ ९ ॥
भव्यरूपधरा भव्या भव्यपुष्पैरलंकृता ॥ भव्यलीला भव्यमाला भव्यांगी भव्यसुन्दरी ॥ १० ॥ भव्यशीला भव्यलीला भव्याक्षी
भव्यनाशिनी ॥ भव्यांगिका भव्यवाणी भव्यकांतिर्भगालिनी ॥ ११ ॥ भव्यत्रपा भव्यनदी भव्यभोगविहारिणी ॥ भव्यस्तनी भव्य
मुखी भव्यगोष्ठीभयापहा ॥ १२ ॥ भक्तेश्वरी भक्तिकर्त्री भक्तानुग्रहकारिणी ॥ भक्तिदा भक्तिजननी भक्तानन्दविवर्द्धिनी ॥ १३ ॥
भक्तिप्रिया भक्तिरता भक्तिभावविहारिणी ॥ भक्तिशीला भक्तिलीला भक्तेशा भक्तिपालिनी ॥ १४ ॥ भक्तिविद्या भक्तविद्या भक्तिर्भ
क्तिविनोदिनी ॥ भक्तिरीतिर्भक्तिप्रीतिर्भक्तिसाधनसाधिनी ॥ १५ ॥ भक्तिसाध्या भक्तसाध्या भक्तिराली भवेश्वरी ॥ भटविद्या भटा
नन्दा भटस्था भटरूपिणी ॥ १६ ॥ भटमान्या भटस्थान्या भटस्थाननिवासिनी ॥ भटिनी भटरूपेशी भटरूपविवर्द्धिनी ॥ १७ ॥
भटवेशी भटेशी च भगभाग्यवसुन्दरी ॥ भटप्रीत्या भटरीत्या भटानुग्रहकारिणी ॥ १८ ॥ भटराध्या भटबोध्या भटबोधविनोदिनी ॥
भटैः सेव्या भटवरा भटार्च्या भटबोधिनी ॥ १९ ॥ भटकीर्त्या भटकला भटपा भटपालिनी ॥ भटैश्वर्य्या भटाधीशा भटेक्षा भट
तोषिणी ॥ २० ॥ भटेशी भटजननी भटभाग्यविवर्द्धिनी ॥ भटभुक्तिर्भटयुक्तिर्भटप्रीतिविवर्द्धिनी ॥ २१ ॥ भाग्येशी भाग्यजननी
भाग्यस्था भाग्यरूपिणी ॥ भावनाभावकुशला भावदा भाववर्द्धिनी ॥ २२ ॥ भावरूपा भावरसा भवांतरविहारिणी ॥ भवांकुरा भव
कला भावस्थाननिवासिनी ॥२३॥ भावातुरा भावधृता भावमध्यव्यवस्थिता ॥ भावर्द्धिर्भावसिद्धिर्भावादिर्भावभाविनी ॥ २४ ॥ भावा

लया भावपरा भावसाधनतत्परा ॥ भावेश्वरी भावगम्या भावस्था भावगर्विता ॥ २५ ॥ भाविनी भावरमणी भारती भारतेश्वरी ॥
भागीरथी भाग्यवती भाग्योदयकरी कला ॥ २६ ॥ भाग्याश्रया भाग्यमयी भाग्या भाग्यफलप्रदा ॥ भाग्याचारा भाग्यसारा भाग्य
धारा च भाव्यदा ॥ २७ ॥ भाग्येश्वरी भाग्यनिधिर्भाग्या भाग्यसुमातृका ॥ भाग्येक्षा भाग्यना भाग्यभाग्यदा भाग्यमातृका ॥ २८ ॥
भाग्येक्षा भाग्यमनसा भाग्यादिर्भाग्यमध्यगा ॥ भ्रात्रीश्वरी भ्रातृमती भ्रात्रंबा भ्रातृपालिनी ॥२९॥ भ्रातृस्था भ्रातृकुशला भ्रामरी
भ्रमराम्बिका ॥ भिल्लरूपा भिल्लवती भिल्लस्था भिल्लपालिनी ॥ ३० ॥ भिल्लमाता भिल्लधात्री भिल्लिनी भिल्लकेश्वरी ॥ भिल्लकीर्ति
भिल्लकला भिल्लमन्दरवासिनी ॥ ३१ ॥ भिल्लक्रीडा भिल्ललीला भिल्लाच्र्या भिल्लवल्लभा ॥ भिल्लस्नुषा भिल्लपुत्री भिल्लिनी भिल्लपोषिणी
॥ ३२ ॥ भिल्लपौत्री भिल्लगोष्ठी भिल्लाचारनिवासिनी ॥ भिल्लपूज्या भिल्लवाणी भिल्लाणी भिल्लभीतिहा ॥ ३३ ॥ भीतस्था भीत
जननी भीतिर्भीतिविनाशिनी ॥ भीतिदा भीतिहा भीत्या भीत्याकारविहारिणी ॥ ३४ ॥ भीतेशी भीतिशमनी भीतस्थाननिवासिनी ॥
भीतिरीत्या भीतिकला भीतीक्षा भीतिहारिणी ॥ ३५ ॥ भीमेशी भीमजनी भीमा भीमनिवासिनी ॥ भीमेश्वरी भीमरता भीमांगी
भीमपालिनी ॥ ३६ ॥ भीमनादा भीमतंत्री भीमैश्वर्य्यविवर्द्धिनी ॥ भीमगोष्ठी भीमधात्री भीमविद्याविनोदिनी ॥ ३७ ॥ भीमविक्रमदात्री च
भीमविक्रमवासिनी ॥ भीमानन्दकरी देवी भीमानन्दविहारिणी ॥३८॥ भीमोपदेशिनी नित्या भीमभाग्यप्रदायिनी ॥ भीमसिद्धिर्भीमऋद्धि
र्भीमभक्तिविवर्द्धिनी ॥ ३९ ॥ भीमस्था भीमवरदा भीमधर्मोपदेशिनी ॥ भीष्मेश्वरी भीष्मभूतिर्भीष्मबोधप्रबोधिनी ॥ ४० ॥
भीष्मश्रीर्भीष्मजननी भीष्मज्ञानोपदेशिनी ॥ भीष्मस्था भीष्मतपसा भीष्मेशी भीष्मतारिणी ॥ ४१ ॥ भीष्मलीला भीष्मशीला भीष्म
रोधोनिवासिनी ॥ भीष्माश्रया भीष्मवरा भीष्महर्षविवर्द्धिनी ॥ ४२ ॥ भुवना भुवनेशानी भुवनानन्दकारिणी ॥ भुविस्था भुविरूपा
च भुविभारनिवारिणी ॥ ४३ ॥ भुक्तिस्था भुक्तिदा भुक्तिर्भुक्तेशी भुक्तिरूपिणी ॥ भुक्तेश्वरी भुक्तिदात्री भुक्तिराकाररूपिणी ॥ ४४ ॥
भुजंगस्था भुजंगेशी भुजंगाकाररूपिणी ॥ भुजंगी भुजगावासा भुजंगानन्ददायिनी ॥ ४५ ॥ भूतेशी भूतजननी भूतस्था भूत

रूपिणी ॥ भूतेश्वरी भूतलीला भूतवेषकरी सदा ॥ ४६ ॥ भूतदात्री भूतकेशी भूतधात्री महेश्वरी ॥ भूतरीस्या भूतपत्नी भूतलोक निवासिनी ॥ ४७ ॥ भूतसिद्धिर्भूतऋद्धिर्भूतानन्दानिवासिनी ॥ भूतकीर्तिर्भूतलक्ष्मीर्भूतभाग्यविवर्द्धिनी ॥ ४८ ॥ भूतार्च्या भूतरमणी भूतविद्याविनोदिनी ॥ भूतपौत्री भूतपुत्री भूतभार्य्याविधीश्वरी ॥ ४९ ॥ भूतस्था भूतरमणी भूतेशी भूतपालिनी ॥ भूपमाता भूप निभा भूपैश्वर्य्यप्रदायिनी ॥ ५० ॥ भूपचेष्टा भूपनेष्टा भूपभावविवर्द्धिनी ॥ भूपस्वसा भूपभूरी भूपपौत्री तथा वधूः ॥ ५१ ॥ भूपकीर्तिर्भूपनीतिर्भूपभाग्यविवर्द्धिनी ॥ भूपक्रिया भूपक्रीडा भूपमन्दरवासिनी ॥ ५२ ॥ भूपार्च्या भूपसंराध्या भूपभोगविवर्द्धिनी ॥ भूपाश्रया भूपकला भूपकौतुकदण्डिनी ॥ ५३ ॥ भूषणस्था भूषणेशी भूषा भूषणधारिणी ॥ भूषणाधारधर्मेशी भूषणाकाररूपिणी ॥ ॥ ५४ ॥ भूपताचारनिलया भूपताचारभूषिता ॥ भूपताचाररचना भूपताचारमण्डिता ॥ ५५ ॥ भूपताचारधर्मेशी भूपताचार कारिणी ॥ भूपताचारचरिता भूपताचारवर्जिता ॥ ५६ ॥ भूपताचारवृद्धिस्था भूपताधरवृद्धिदा ॥ भूपताचारकरणा भूपताचारकर्मदा ॥ ॥ ५७ ॥ भूपताचारकर्मेशी भूपताचारकर्मदा । भूपताचारदेहस्था भूपताचारकर्मिणी ॥ ५८ ॥ भूपताचारसिद्धिस्था भूपता चारसिद्धिदा ॥ भूपताचारधर्माणी भूपताचारधारिणी ॥ ५९ ॥ भूपतानन्दलहरी भूपतेश्वररूपिणी ॥ भूपतेर्नीतिर्नीतिस्था भूपति स्थानवासिनी ॥ ६० ॥ भूपतिस्थानगीर्वाणा पतेर्वरधारिणी ॥ भेषजानन्दलहरी भेषजानन्दरूपिणी ॥ ६१ ॥ भेषजानन्द महिषी भेषजानन्दधारिणी ॥ भेषजानन्दकर्मेशी भेषजानन्ददायिनी ॥ ६२ ॥ भेषजी भेषजाकन्दा भेषजस्थानवासिनी ॥ भेषजेश्वर रूपा च भेषजेश्वरसिद्धिदा ॥ ६३ ॥ भेषजेश्वरधर्मेशी भेषजेश्वरकर्मदा ॥ भेषजेश्वरकर्मेशी भेषजेश्वकर्मिणी ॥ ६४ ॥ भेषजाधीश जननी भेषजाधीशपालिनी ॥ भेषजाधीशरचना भेषजाधीशमंगला ॥ ६५ ॥ भेषजारण्यमध्यस्था भेषजारण्यरक्षिणी ॥ भैषज्यविद्या भैषज्या भैषज्येप्सितदायिनी ॥ ६६ ॥ भैषजस्था भैषजेशी भैषज्यानन्दवर्द्धिनी ॥ भैरवी भैरवाचारा भैरवाकाररूपिणी ॥ ६७ ॥ भैरवाचारचतुरा भैरवाचारमण्डिता ॥ भैरवा च भैरवेशी भैरवानन्ददायिनी ॥ ६८ ॥ भैरवानन्दरूपेशी भैरवानन्दरूपिणी ॥ भैरवा

नन्दनिपुणा भैरवानन्दमंदिरा ॥ ६९ ॥ भैरवानन्दतत्त्वज्ञा भैरवानन्दतत्परा ॥ भैरवानन्दकुशला भैरवानन्दनीतिदा ॥ ७० ॥ भैर
वानन्दप्रीतिस्था भैरवानन्दप्रीतिदा ॥ भैरवानन्दमहिषी भैरवानन्दमालिनी ॥ ७१ ॥ भैरवानन्दमतिदा भैरवानन्दमातृका ॥
भैरवाधारजननी भैरवाधाररक्षिणी ॥ ७२ ॥ भैरवाधाररूपेशी भैरवाधाररूपिणी ॥ भैरवाधारनिचया भैरवाधारनिश्चया ॥ ७३ ॥
भैरवाधारतत्त्वज्ञा भैरवाधारतत्त्वदा ॥ भैरवाश्रयतंत्रेशी भैरवाश्रयमंत्रिणी ॥ ७४ ॥ भैरवाश्रयरचना भैरवाश्रयरञ्जिता ॥ भैरवाश्रय
निर्धारा भैरवाश्रयनिर्भरा ॥ ७५ ॥ भैरवाश्रयनिर्धारा भैरवाश्रयनिर्धरा ॥ भैरवानन्दबोधेशी भैरवानन्दबोधिनी ॥ ७६ ॥ भैर
वानन्दबोधस्था भैरवानन्दबोधदा ॥ भैरव्यैश्वर्य्यवरदा भैरव्यैश्वर्य्यदायिनी ॥ ७७ ॥ भैरव्यैश्वर्य्यरचना भैरव्यैश्वर्य्यवर्द्धिनी ॥
भैरव्यैश्वर्य्यसिद्धिस्था भैरव्यैश्वर्य्यसिद्धिदा ॥ ७८ ॥ भैरव्यैश्वर्य्यसिद्धेशी भैरव्यैश्वर्य्यरूपिणी ॥ भैरव्यैश्वर्य्यसुपथा भैरव्यै
श्वर्य्यसुप्रभा ॥ ७९ ॥ भैरव्यैश्वर्य्यवृद्धिस्था भैरव्यैश्वर्य्यवृद्धिदा ॥ भैरव्यैश्वर्य्यकुशला भैरव्यैश्वर्य्यकामदा ॥ ८० ॥
भैरव्यैश्वर्य्यसुलभा भैरव्यैश्वर्य्यसम्प्रदा ॥ भैरव्यैश्वर्य्यविशदा भैरव्यैश्वर्य्यविक्रया ॥ ८१ ॥ भैरव्यैश्वर्य्यविनया भैरव्यैश्वर्य्यवेदिता ॥
भैरव्यैश्वर्य्यमहिमा भैरव्यैश्वर्य्यमानिनी ॥ ८२ ॥ भैरव्यैश्वर्य्यनिरता भैरव्यैश्वर्य्यनिर्मिता ॥ भोगेश्वरी भोगमाता भोगस्था भोग
रक्षिणी ॥ ८३ ॥ भोगक्रीडा भोगलीला भोगेशी भोगवर्द्धिनी ॥ भोगांगी भोगरमणी भोगाचारविचारिणी ॥ ८४ ॥ भोगाश्रया
भोगवती भोगिनी भोगरूपिणी ॥ भोगांकरा भोगविधा भोगाधारनिवासिनी ॥ ८५ ॥ भोगाम्बिका भोगरता भोगसिद्धिविधायिनी ॥
भोजस्था भोजनिरता भोजनानन्ददायिनी ॥ ८६ ॥ भोजनानन्दलहरी भोजनांतर्विहारिणी ॥ भोजनानन्दमहिमा भोजनानन्द
भोग्यदा ॥ ८७ ॥ भोजनानन्दरचना भोजनानन्दहर्षिता ॥ भोजनाचारचतुरा भोजनाचारमण्डिता ॥ ८८ ॥ भोजनाचार
चरिता भोजनाचारचर्चिता ॥ भोजनाचारसम्पन्ना भोजनाचारसंयुता ॥ ८९ ॥ भोजनाचारचित्तस्था भोजनाचाररीतिदा ॥ भोजना
चारविभवा भोजनाचारविस्तृता ॥ ९० ॥ भोजनाचाररमणी भोजनाचाररक्षिणी ॥ भोजनाचारहारिणी भोजनाचारभक्षिणी ॥ ९१ ॥

भोजनाचारसुखदा भोजनाचारसुस्पृहा ॥ भोजनाहारसुरसा भोजनाहारसुन्दरी ॥ ९२ ॥ भोजनाहारचरिता भोजना हारचञ्चला ॥ भोजनास्वादविभवा भोजनास्वादवल्लभा ॥ ९३ ॥ भोजनास्वादसंतुष्टा भोजनास्वादसम्प्रदा ॥ भोजनास्वादसुपथा भोजनास्वादसंश्रया ॥ ९४ ॥ भोजनास्वादनिरता भोजनास्वादनिर्णिता ॥ भौक्षरा भौक्षरेशानी भौकाराक्षररूपिणी ॥ ९५ ॥ भौक्षरस्था भौक्षरादिर्भौक्षरस्थानवासिनी ॥ भङ्कारी भर्मिणी भर्मी भस्मेशी भस्मरूपिणी ॥ ९६ ॥ भंकारा भंचना भस्मा भस्मस्था भस्मवासिनी ॥ भक्षरी भक्षराकारा भक्षरस्थानवासिनी ॥ ९७ ॥ भक्षराढ्या भक्षरेशी भरूपा भस्वरूपिणी ॥ भूधरस्था भूधरेशी भूधरी भूधरेश्वरी ॥ ९८ ॥ भूधरानन्दरमणी भूधरानन्दपालिनी ॥ भूधरानन्दजननी भूधरानन्दवासिनी ॥ ९९ ॥ भूधरानन्दरमणी भूधरानन्दरक्षिता ॥ भूधरानन्दमहिमा भूधरानन्दमंदिरा ॥ १०० ॥ भूधरानन्दसर्वेशी भूधरानन्दसर्वसूः ॥ भूधरानन्दमहिषी भूधरानन्ददायिनी ॥ १०१ ॥ भूधराधीशधर्मेशी भूधरानन्दधर्मिणी ॥ भूधराधीशधर्म्मेशी भूधराधीशसिद्धिदा ॥ ॥ १०२ ॥ भूधराधीशकर्मेशी भूधराधीशकामिनी ॥ भूधराधीशनिरता भूधाराधीशनिर्णिता ॥ १०३ ॥ भूधराधीशनीतिस्था भूधराधीशनीतिदा ॥ भूधराधीशभाग्येशी भूधराधीशभामिनी ॥ १०४ ॥ भूधराधीशबुद्धिस्था भूधराधीशबुद्धिदा ॥ भूधराधीशवरदा भूधराधीशवन्दिता ॥ १०५ ॥ भूधराधीशसंराध्या भूधराधीशचार्चिता ॥ भंगेश्वरी भंगमयी भंगस्था भंगरूपिणी ॥ ॥ १०६ ॥ भंगाक्षता भंगरता भंगार्च्या भंगरक्षिणी ॥ भंगावती भंगलीला भंगभोगविलासिनी ॥ १०७ ॥ भंगरंगप्रतीकाशा भंगरंगनिवासिनी ॥ भंगाशिनी भंगमूली भंगभोगविधायिनी ॥ १०८ ॥ भंगाश्रया भंगबीजा भंगबीजांकुरेश्वरी ॥ भंगयंत्रचमत्कारा भंगयंत्रेश्वरी तथा ॥ १०९ ॥ भंगयंत्रविमोहस्था भंगयंत्रविनोदिनी ॥ भंगयंत्रविचारस्था भंगयंत्रविचारिणी ॥ ११० ॥ भंगयंत्ररसानन्दा भंगयंत्ररसेश्वरी ॥ भंगयंत्ररसस्वादा भंगयंत्ररसस्थिता ॥ १११ ॥ भंगयंत्ररसाधारा भंगयंत्ररसाश्रया ॥ भूधरात्मजरूपेशी भूधरात्मजरूपिणी ॥ ११२ ॥ भूधरात्मजयोगेशी भूधरात्मजपालिनी ॥ भूधरात्मजमहिमा भूधरात्मजमालिनी ॥ ११३ ॥

भूधरात्मजभूतेशी भूधरात्मजरूपिणी ॥ भूधरात्मजसिद्धिस्था भूधरात्मजसिद्धिदा ॥ ११४ ॥ भूधरात्मजभावेशी
भूधरात्मजभाविनी ॥ भूधरात्मजभोगस्था भूधरात्मजभोग्यदा ॥ ११५ ॥ भूधरात्मजभोगेशी भूधरात्मजभोगिनी ॥ भव्या
भव्यतरा भव्यभाविनी भववल्लभा ॥ ११६ ॥ भावातिभावा भावाख्या भातिभा भीतिभांतिका ॥ भासांतिभासा भासस्था
भासाभा भास्करोपमा ॥ ११७ ॥ भास्करस्था भास्करेशी भास्करैश्वर्य्यवर्द्धिनी ॥ भास्करानन्दजननी भास्करानन्ददायिनी ॥ ११८ ॥
भास्करानन्दमहिमा भास्करानन्दमातृका ॥ भास्करानन्दनैश्वर्य्या भास्करानन्दनेश्वरा ॥ ११९ ॥ भास्करानन्दसुपथा भास्करानन्द
सुप्रभा ॥ भास्करानन्दनिचया भास्करानन्दनिर्मिता ॥ १२० ॥ भास्करानन्दनीतिस्था भास्करानन्दनीतिदा ॥ भास्करोदय
मध्यस्था भास्करोदयमध्यगा ॥ १२१ ॥ भास्करोदयतेजःस्था भास्करोदयतेजसा ॥ भास्कराचारचतुरा भास्कराचारचन्द्रिका ॥
॥ १२२ ॥ भास्कराचारपरमा भास्कराचारचण्डिका ॥ भास्कराचारपरमा भास्कराचारपारदा ॥ १२३ ॥ भास्कराचारमुक्तिस्था
भास्कराचारमुक्तिदा ॥ भास्कराचारसिद्धिस्था भास्कराचारसिद्धिदा ॥ १२४ ॥ भास्कराचरणाधारा भास्कराचरणाश्रिता ॥
भास्कराचारमंत्रेशी भास्कराचारमंत्रिगी ॥ १२५ ॥ भास्कराचारवित्तेशी भास्कराचारचित्रिणी ॥ भास्कराधारधर्म्मेशी भास्कराधार
धारिणी ॥ १२६ ॥ भास्कराधाररचना भास्कराधाररक्षिता ॥ भास्कराधारकर्माणी भास्कराधारकर्म्मदा ॥ १२७ ॥ भास्करा
धाररूपेशी भास्कराधाररूपिणी ॥ भास्कराधारकाम्येशी भास्कराधारकामिनी ॥ १२८ ॥ भास्कराधारसांशेशी भास्कराधारसां
शिनी ॥ भास्कराधारधर्म्मेशी भास्कराधारधामिनी ॥ १२९ ॥ भास्कराधारचक्रस्था भास्कराधारचक्रिणी ॥ भास्करेश्वरक्षेत्रेशी
भास्करेश्वरक्षेत्रिणी ॥ १३० ॥ भास्करेश्वरजननी भास्करेश्वरपालिनी ॥ भास्करेश्वरसर्वेशी भास्करेश्वरशर्वरी ॥ १३१ ॥ भास्करे
श्वरसद्गीमा भास्करेश्वरसान्निभा ॥ भास्करेश्वरसुपथा भास्करेश्वरसुप्रभा ॥ १३२ ॥ भास्करेश्वरयुवती भास्करेश्वरसुन्दरी ॥ भास्क
रेश्वरमूर्तेशी भास्करेश्वरमूर्तिनी ॥१३३॥ भास्करेश्वरमित्रेशी भास्करेश्वरमंत्रिणी ॥ भास्करेश्वरसानन्दा भास्करेश्वरसाश्रया ॥१३४॥

भास्करेश्वरचित्रस्था भास्करेश्वराचित्रदा ॥ भास्करेश्वराचित्रेशी भास्करेश्वरचित्रिणी ॥ १३५ ॥ भास्करेश्वरभाग्यस्था भास्करेश्वरभाग्यदा ॥ भास्करेश्वरभाग्येशी भास्करेश्वरभाविनी ॥ १३६ ॥ भास्करेश्वरकीर्तेशी भास्करेश्वरकीर्तिनी ॥ भास्करेश्वरकीर्तिस्था भास्करेश्वरकीर्तिदा ॥ १३७ ॥ भास्करेश्वरकरुणा भास्करेश्वरकारिणी ॥ भास्करेश्वरगीर्वाणी भास्करेश्वरगारुडी ॥ ॥ १३८ ॥ भास्करेश्वरदेहस्था भास्करेश्वरदेहदा ॥ भास्करेश्वरनादस्था भास्करेश्वरनादिनी ॥ १३९ ॥ भास्करेश्वरनादेशी भास्करेश्वरनादिनी ॥ भास्करेश्वरकोशस्था भास्करेश्वरकोशदा ॥ १४० ॥ भास्करेश्वरकोशेशी भास्करेश्वरकोशिनी ॥ भास्करेश्वरशक्तिस्था भास्करेश्वरशक्तिदा ॥ १४१ ॥ भास्करेश्वरतोषेशी भास्करेश्वरतोषिणी ॥ भास्करेश्वरक्षत्रेशी भास्करेश्वरक्षत्रिणी ॥ ॥ १४२ ॥ भास्करेश्वरयागस्था भास्करेश्वरयोगदा ॥ भास्करेश्वरयोगेशी भास्करेश्वरयोगिनी ॥ १४३ ॥ भास्करेश्वरपद्मेशी भास्करेश्वरपद्मिनी ॥ भास्करेश्वरहृद्बीजा भास्करेश्वरहृद्वरा ॥ १४४ ॥ भास्करेश्वरहृद्योनिर्भास्करेश्वरहृद्द्युतिः ॥ भास्करेश्वरबुद्धिस्था भास्करेश्वरसद्विधा ॥ १४५ ॥ भास्करेश्वरसद्वाणी भास्करेश्वरसद्वरा ॥ भास्करेश्वरराज्यस्था भास्करेश्वरराज्यदा ॥ १४६ ॥ भास्करेश्वरराज्येशी भास्करेश्वरपोषिणी ॥ भास्करेश्वरज्ञानस्था भास्करेश्वरज्ञानदा ॥ १४७ ॥ भास्करेश्वरज्ञानेशी भास्करेश्वरगामिनी ॥ भास्करेश्वरलक्षेशी भास्करेश्वरक्षालिता ॥ १४८ ॥ भास्करेश्वरलक्षिता भास्करेश्वररक्षिता ॥ भास्करेश्वरखड्गस्था भास्करेश्वरखड्गदा ॥ १४९ ॥ भास्करेश्वरखड्गेशी भास्करेश्वरखड्गिनी ॥ भास्करेश्वरकार्य्येशी भास्करेश्वरकामिनी ॥ १५० ॥ भास्करेश्वरकायस्था भास्करेश्वरकायदा ॥ भास्करेश्वरचक्षुःस्था भास्करेश्वरचक्षुषा ॥ १५१ ॥ भास्करेश्वरसन्नाभा भास्करेश्वरसार्चिता ॥ भ्रूणहत्याप्रशमनी भ्रूणपापविनाशिनी ॥ १५२ ॥ भ्रूणदारिद्र्यशमनी भ्रूणरोगविनाशिनी ॥ भ्रूणशोकप्रशमनी भ्रूणदोषनिवारिणी ॥ १५३ ॥ भ्रूणसंतापशमनी भ्रूणविभ्रमनाशिनी ॥ भवाब्धिस्था भवाब्धीशा भवाब्धिभयनाशिनी ॥ १५४ ॥ भवाब्धिपारकरणी भवाब्धिसुखवर्द्धिनी ॥ भवाब्धिकार्य्यकरणी भवाब्धिकरुणानिधिः ॥ १५५ ॥ भवाब्धिकालशमनी भवाब्धिवरदायिनी ॥

भवाब्धिभजनस्थाना भवाब्धिभजनस्थिता ॥ १५६ ॥ भवाब्धिभजनाकारा भवाब्धिजननक्रिया ॥ भवाब्धिभजनाचारा भवाब्धि
भजनांकुरा ॥ १५७ ॥ भवाब्धिभजनानन्दा भवाब्धिभजनाधिपा ॥ भवाब्धिभजनैश्वर्य्या भवाब्धिभजनेश्वरी ॥ १५८ ॥
भवाब्धिभजनासिद्धिर्भवाब्धिभजनारतिः ॥ भवाब्धिभजनानित्या भवाब्धिभजनानिशा ॥ १५९ ॥ भवाब्धिभजनानिम्ना भवाब्धि
भवभीतिहा ॥ भवाब्धिभजनाकाम्या भवाब्धिभजनाकला ॥ १६० ॥ भवाब्धिभजनाकीर्तिर्भवाब्धिभजनाकृता ॥ भवाब्धिशुभदा
नित्या भवाब्धिशुभदायिनी ॥ १६१ ॥ भवाब्धिसकलानन्दा भवाब्धिसकलाकला ॥ भवाब्धिसकलासिद्धिर्भवाब्धिसकलानिधिः॥
॥ १६२ ॥ भवाब्धिसकलासारा भवाब्धिसकलार्थदा ॥ भवाब्धिभवनामूर्तिर्भवाब्धिभवनाकृतिः ॥ १६३ ॥ भवाब्धिभवना
भव्या भवाब्धिभवनांभसा ॥ भवाब्धिमदनारूपा भवाब्धिमदनातुरा ॥ १६४ ॥ भवाब्धिमदनेशानी भवाब्धिमदनेश्वरी ॥ भवाब्धि
भाग्यरचना भवाब्धिभाग्यदा सदा ॥ १६५ ॥ भवाब्धिभाग्यदाकला भवाब्धिभाग्यनिर्भरा ॥ भवाब्धिभाग्यनिरता भवाब्धिभाग्य
भाविता ॥ १६६ ॥ भवाब्धिभाग्यसंचारा भवाब्धिभाग्यसंचिता ॥ भवाब्धिभाग्यसुपथा भवाब्धिभाग्यसुप्रदा ॥ १६७ ॥
भवाब्धिभाग्यरीतिज्ञा भवाब्धिभाग्यनीतिदा ॥ भवाब्धिभाग्यरीतीशी भवाब्धिभाग्यरीतिनी ॥ १६८ ॥ भवाब्धिभोगनिपुणा भवा
ब्धिभोगसम्प्रदा ॥ भवाब्धिभाग्यगहना भवाब्धिभोग्यगुम्फिता ॥ १६९ ॥ भवाब्धिभोगगान्धारी भवाब्धिभोगगुम्फिता ॥ भवा
ब्धिभोगसुरसा भवाब्धिभोगसुस्पृहा ॥ १७० ॥ भवाब्धिभोगग्रंथिनी भवाब्धिभोगयोगिनी ॥ भवाब्धिभोगरसना भवाब्धिभोग
राजिता ॥ १७१ ॥ भवाब्धिभोगविभवा भवाब्धिभोगविस्तृता ॥ भवाब्धिभोगवरदा भवाब्धिभोगवन्दिता ॥ १७२ ॥ भवाब्धिभोग
कुशला भवाब्धिभोगशोभिता ॥ भवाब्धिभेदजननी भवाब्धिभेदपालिनी ॥ १७३ ॥ भवाब्धिभेदरचना भवाब्धिभेदरक्षिता ॥
भवाब्धिभेदनियता भवाब्धिभेदनिस्पृहा ॥ १७४ ॥भवाब्धिभेदरचना भवाब्धिभेदरोपिता ॥ भवाब्धिभेदराशिघ्नी भवाब्धिभेदराशिनी
॥ १७५ ॥ भवाब्धिभेदकर्मेशी भवाब्धिभेदकर्मिणी ॥ भद्रेशी भद्रजननी भद्रा भद्रनिवासिनी ॥ १७६ ॥ भद्रेश्वरी


भद्रवती भद्रस्था भद्रदायिनी ॥ भद्ररूपा भद्रमयी भद्रदा भद्रभाषिणी ॥ १७७ ॥ भद्रकर्णा भद्रवेषा भद्राम्बा भद्रमन्दिरा ॥ भद्रक्रिया भद्रकला भद्रिका भद्रवर्द्धिनी ॥ १७८ ॥ भद्रक्रीडा भद्रकला भद्रलीलाभिलाषिणी ॥ भद्रांकुरा भद्ररता भद्रांगी भद्रमंत्रिणी ॥ १७९ ॥ भद्रविद्याऽभद्रविद्या भद्रवाग्भद्रवादिनी ॥ भूपमंगलदा भूपा भूलता भूमिवाहिनी ॥ १८० ॥ भूपभोगा भूपशोभा भूपाशा भूपरूपदा ॥ भपाकृतिर्भूपरतिर्भूपश्रीर्भूपश्रेयसी ॥ १८१ ॥ भूपनीतिर्भूपरीतिर्भूपभीतिर्भयंकरी ॥ भवदानन्दलहरी भवदानन्दसुन्दरी ॥ १८२ ॥ भवदानन्दकरणी भवदानन्दवर्द्धिनी ॥ भवदानन्दरमणी भवदानन्ददायिनी ॥ भवदानन्दजननी भवदानन्दरूपिणी ॥ १८३ ॥ य इदं पठते स्तोत्रं प्रत्यहं भक्तिसंयुतः ॥ १८४ ॥ गुरुभक्तियुतो भूत्वा गुरुसेवापरायणः ॥ जितेन्द्रियः सत्यवादी ताम्बूलपूरिताननः ॥ १८५ ॥ दिवा रात्रौ च संध्यायां स भवेत्परमेश्वरः ॥ स्तवमात्रस्य पाठेन राजा वैश्यो भवेद्ध्रुवम् ॥ १८६ ॥ सर्वागमेषु विज्ञानी सर्वतंत्रे स्वयं हरः ॥ गुरोर्मुखात्समभ्यस्य स्थित्वा च गुरुसन्निधौ ॥ १८७ ॥ शिवस्थानेषु संध्यायां शून्यागारे चतुष्पथे ॥ यः पठेच्छृणुयाद्वापि स योगी नात्र संशयः ॥ १८८ ॥ सर्वस्वदक्षिणां दद्यात्स्त्रीपुत्रादिकमेव च ॥ स्वच्छन्दमानसो भूत्वा स्तवमेतं समुद्धरेत् ॥ १८९ ॥ एतत्स्तोत्ररतो देवि हररूपो न संशयः ॥ यः पठेच्छृणुयाद्वापि एकचित्तेन सर्वदा ॥ १९० ॥ स दीर्घायुः सुखी वाग्मी वाणी तस्य न संशयः ॥ गुरुपादरतो भूत्वा कामिनीनां भवेत्प्रियः ॥ १९१ ॥ धनवान्गुणवान् श्रीमान् धीमानिव गुरुः प्रिये ॥ सर्वेषां तु प्रियो भूत्वा पूजयेत्सर्वदा स्तवम् ॥ १९२ ॥ मंत्रसिद्धिः करस्थैव तस्य देवि न संशयः ॥ कुबेरत्वं भवेत्तस्य तस्याधीना हि सिद्धयः ॥ १९३ ॥ मृतपुत्रा च या नारी दौर्भाग्यपरिपीडिता ॥ वंध्या वा काकवंध्या वा मृतवत्सा च यांगना ॥ १९४ ॥ धनधान्यविहीना च रोगशोकाकुला च या ॥ ताभिरेतन्महादेवि भूर्जपत्रे विलिख्य वै ॥ १९५ ॥ सव्ये भुजे धारणीयं तेन सौख्यप्रदं भवेत् ॥ एवं पुनः पुनः प्रायाद्दुःखेन परिपीडिता ॥ १९६ ॥ सभायां व्यसने वाणीविवादे शत्रुसंकटे ॥ चतुरंगे तथा युद्धे सर्वत्रापदि पीडने ॥ १९७ ॥ स्मरणादस्य कल्याणि

संशया यांति दूरतः ॥ न देयं पराशिष्याय नाभकाय च दुर्जने ॥ १९८ ॥ दांभिकाय कुशीलाय कृपणाय सुरेश्वरि ॥ दयाच्छिष्याय शांताय विनीताय जितात्मने ॥ १९९ ॥ भक्ताय शांतियुक्ताय रजःपूजारताय च ॥ जन्मांतरसहस्रैस्तु वर्णितुं नैव शक्यते ॥ २०० ॥ स्तवमात्रस्य माहात्म्यं वक्त्रकोटिशतैरपि ॥ विष्णवे कथितं पूर्वं ब्रह्मणापि प्रियंवदे ॥ २०१ ॥ अधुनापि तव स्नेहात्कथितं परमेश्वरि ॥ गोपितव्यं पशुभ्यश्च सर्वथा न प्रकाशयेत् ॥ २०२ ॥ इति श्रीमहातंत्रार्णवे ईश्वरपार्वतीसंवादे भुवनेश्वरीभकारादिसहस्रनामस्तोत्रं समाप्तम् ॥ अथ भुवनेश्वरीहृदयप्रारंभः ॥ देव्युवाच ॥ भगवन् ब्रूहि तत्स्तोत्रं सर्वकामप्रसाधनम् ॥ यस्य श्रवणमात्रेण नान्यच्छ्रोतव्यमिष्यते ॥ १ ॥ यदि मेऽनुग्रहः कार्यः प्रीतिश्चापि ममोपरि ॥ तदिदं कथय ब्रह्मन् विमलं यन्महीतले ॥ २ ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि सर्वकामप्रसाधनम् ॥ हृदयं भुवनेश्वर्याः स्तोत्रमस्ति यशोदयम् ॥ ३ ॥ ॐ अस्य श्रीभुवनेश्वरीहृदयस्तोत्रमंत्रस्य शक्तिर्ऋषिः । गायत्री छन्दः । भुवनेश्वरी देवता । हकारो बीजम् । ईकारः शक्तिः । रेफः कीलकम् ॥ सकलमनोवांछिताछितासिद्ध्यर्थे पाठे विनियोगः ॥ ॐ ह्रीं हृदयाय नमः १ । ॐ श्रीं शिरसे स्वाहा २ । ॐ ऐं शिखायै वषट् ३ । ॐ ह्रीं कवचाय हुं ४ । ॐ श्रीं नेत्रत्रयाय वौषट् ५ । ॐ ऐं अस्त्राय फट् ६ ॥ इति हृदयादिषडङ्गन्यासः ॥ ॐ ह्रीं अंगुष्ठाभ्यां नमः १ । ॐ श्रीं तर्जनीभ्यां नमः २ । ॐ ऐं मध्यमाभ्यां नमः ३ । ॐ ह्रीं अनामिकाभ्यां नमः ४ । ॐ श्रीं कनिष्ठिकाभ्यां नमः ५ । ॐ ऐं करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ अथ ध्यानम्—ध्यायेद्ब्रह्मादिकानां कृतजनिजननीं योगिनीं योगयोनिं देवानां जीवनायोज्ज्वलितजयपरज्योतिरुग्राङ्गधात्रीम् ॥ शंखं चक्रं च बाणं धनुरपि दधतीं दोश्चतुष्कांबुजातैर्मायामाद्यां विशिष्टां भवभवभुवनां भूभुवाभारभूमिम् ॥ ४ ॥ यदाज्ञयेदं गगनाद्यशेषं सृजत्यजः श्रीपतिरौरसं वा ॥ ॥ बिभर्ति संहंति भवस्तदंते भजामहे श्रीभुवनेश्वरीं ताम् ॥ ५ ॥ जगज्जनानन्दकरीं जयाख्यां यशस्विनीं यंत्रसुयज्ञयोनिम् ॥ जितामितामित्रकृतप्रपंचां भजा० ॥ ६ ॥ हरौ प्रसुप्ते भुवनत्रयांते अवातरन्नाभिजपद्मजन्मा ॥ विधिस्ततोऽन्धे विदधार यत्पदं भजा० ॥ ७ ॥ न विद्यते क्वापि तु जन्म यस्या न वा स्थितिः


सान्ततिकीह यस्याः ॥ न वा निरोधेऽखिलकर्म्म यस्या भजा० ॥ ८ ॥ कटाक्षमोक्षाचरणोप्रवित्ता निवेशितार्णा करुणार्द्रचित्ता ॥ सुभक्तये एति समीप्सितं या भजा० ॥ ९ ॥ यतो जगज्जन्म बभूव योनेस्तदेव मध्ये प्रतिपाति या वा ॥ तदत्ति यांतेऽखिलमुग्रकाली भजा० ॥ १० ॥ सुषुप्तिकाले जनमध्ययंत्या यया जनः स्वप्नमवैति किंचित् ॥ प्रबुध्यते जाग्रति जीव एष भजा० ॥ ११ ॥ दयास्फुरत्कोरकटाक्षलाभान्नैकत्र यस्याः प्रलभंति सिद्धाः ॥ कवित्वमीशित्वमपि स्वतंत्रा भजा० ॥ १२ ॥ लसन्मुखाम्भोरुहमुत्स्फुरंतं हृदि प्रणिध्याय दिशि स्फुरंतः ॥ यस्याः कृपार्द्रं प्रविकाशयंति भजा० ॥ १३ ॥ यदानुरागानुगतालिचित्राश्चिरंतनप्रेमपरिप्लुताङ्गाः ॥ सुनिर्भयाः संति प्रमुच्य यस्याः भजा० ॥ १४ ॥ हरिर्विरंचिर्हर ईशितारः पुरोऽवतिष्ठंति प्रपन्नभङ्गाः ॥ यस्याः समिच्छंति सदानुकूल्यं भजा० ॥ १५ ॥ मनुं यदीयं हरमग्निसंस्थं ततश्च वामश्रुतिचन्द्रसक्तम् ॥ जपंति ये स्युर्हि सुवंदितास्ते भजा० ॥ १६ ॥ प्रसीदतु प्रेमरसार्द्रचित्ता सदा हि सा श्रीभुवनेश्वरी मे ॥ कृपाकटाक्षेण कुबेरकल्पा भवंति यस्याः पदभक्तिभाजः ॥ १७ ॥ मुदा सुपाठ्यं भुवनेश्वरीयं सदा सतां स्तोत्रमिदं सुसेव्यम् ॥ सुखप्रदं स्यात्कलिकल्मषघ्नं सुश्रृण्वतां संपठतां प्रशस्यम् ॥ १८ ॥ एतत्तु हृदयं स्तोत्रं पठेद्यस्तु समाहितः ॥ भवेत्तस्येष्टदा देवी प्रसन्ना भुवनेश्वरी ॥ १९ ॥ ददाति धनमायुष्यं पुण्यं पुण्यमतिं तथा ॥ नैष्ठिकीं देवभक्तिं च गुरुभक्तिं विशेषतः ॥ २० ॥ पूर्णिमायां चतुर्दश्यां कुजवारे विशेषतः ॥ पठनीयमिदं स्तोत्रं देवसद्मनि यत्नतः ॥ २१ ॥ यत्रकुत्रापि पाठेन स्तोत्रस्यास्य फलं भवेत् ॥ सर्वस्थानेषु देवेश्याः पूतदेहः सदा पठेत् ॥ २२॥ इति नीलसरस्वतीतंत्रे भुवनेश्वरीपटले श्रीदेवीश्वरसंवादे श्रीभुवनेश्वरीहृदयस्तोत्रं समाप्तम् ॥ इति श्रीमंत्रमहार्णवे मध्यखण्डे भुवनेश्वरीतंत्रे सप्तमस्तरङ्गः ॥ ७ ॥

॥ श्रीगणेशाय नमः ॥ अथ त्रिपुरभैरवीतंत्रप्रारंभः ॥ त्रिपुरभैरवीतंत्रे मंत्रो यथा–हसैं हसकरीं हसैं । इति मंत्रः ॥ अस्य विधानम्–अस्य त्रिपुरभैरवीमंत्रस्य दक्षिणामूर्तिर्ऋषिः । पंक्तिश्छंदः । त्रिपुरभैरवी देवता । ऐं बीजम् । ह्रीं शक्तिः । क्लीं कीलकम् । ममाभीष्टसिद्धये जपे विनियोगः ॥ ॐ दक्षिणामूर्तिऋषये नमः शिरसि १ । पंक्तिच्छंदसे नमः मुखे २ । श्रीत्रिपुरभैरवीदेवतायै नमः हृदि ३ । ऐं बीजाय नमः गुह्ये ४ । ह्रीं शक्तये नमः पादयोः ५ । क्लीं कीलकाय नमः सर्वांगे ६ ॥ इति ऋष्यादिन्यासः ॥ हसरां अंगुष्ठाभ्यां नमः १ । हसरीं तर्जनीभ्यां नमः । हसरूं मध्यमाभ्यां नमः ३ । हसरैं अनामिकाभ्यां नमः ४ । हसरौं कनिष्ठिकाभ्यां नमः ५ । हसरः करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ हसरां हृदयाय नमः १ । हसरीं शिरसे स्वाहा २ । हसरूं शिखायै वषट् ३ । हसरैं कवचाय हुं ४ । हसरौं नेत्रत्रयाय वौषट् ५ । हसरः अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ इति न्यासं कृत्वा ताराप्रयोगोक्तन्यासादिकं कुर्य्यात् ॥ अथ ध्यानम्–उद्यद्भानुसहस्रकांतिमरुणक्षौमां शिरोमालिकां रक्तालिप्तपयोधरां जपपरां विद्यामभीतिं वरम् ॥ हस्ताब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविन्दश्रियं देवीं बद्धहिमांशुरत्नमुकुटां वन्दे सुमन्दस्मिताम् ॥ १ ॥ एवं ध्यात्वा मानसोपचारैः संपूज्य पीठपूजां कुर्यात् ॥ तथा च–पीठादौ रचिते सर्वतोभद्रमण्डले मण्डूकादिपरतत्त्वांतपीठदेवताः पद्धति

श्रीत्रिपुरभैरव्यै नमः ।



मार्गेण संस्थाप्य 'ॐ मं मण्डूकादिपरतत्त्वांतपीठदेवताभ्यो नमः' इति संपूज्य नव पीठशक्तीः पूजयेत् । तथा च–पूर्वाद्यष्टदिक्षु ॐ इच्छायै नमः १। ॐ ज्ञानायै नमः २। ॐ क्रियायै नमः ३ । ॐ कामदायिन्यै नमः ४ । ॐ रत्यै नमः ५। ॐ रतिप्रियायै नमः । ६ ॐ नन्दायै नमः ७ । ॐ परायै नमः ८ । मध्ये ॐ अपरायै नमः ९ । इति पीठशक्तीः पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रपत्रं ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण प्रोञ्छ्य तदुपरि देव्या अष्टगंधेन नवयोन्यात्मकं यंत्रं तदुपरि अष्टदलं तदुपरि भूपुरं निर्माय ' हसौं सदाशिवमहाप्रेतपद्मासनाय नमः ' इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य पुनर्ध्यात्वा 'ऐं ह्रीं स ह स ष ह क्ले ह्रौं ' इति मंत्रेण बिन्दु चक्रे मूर्तिं संकल्प्य त्रिखण्डमुद्रया देवीं ध्यात्वा आवाहनादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा



आवरणपूजां कुर्यात् ॥ तथा च पुष्पाञ्जलिमादाय—ॐ संविन्मये परे देवि परामृतचरुप्रिये ॥ भैरव्यनुज्ञां त्वं देहि परिवारार्चनाय मे ॥ इति पठित्वा पुष्पांजलिं दद्यात् ॥ इत्याज्ञां गृहीत्वा आवरणपूजामारभेत । तथा च—केसरेषु अग्न्यादिकोणेषु मध्ये दिक्षु च पूर्वोक्तांगमंत्रेण खड्गं पूजयेत् । ततः पुष्पांजलिमादाय मूलमुच्चार्य्य—ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत इति प्रथमावरणम् ॥ १ ॥ ततः पूज्यपूजकयोरंतरालं प्राची तदनुसारेण अन्या दिशः प्रकल्प्य क्रमानुसारेण पूजयेत् ॥ तथा च–उत्तरे द्राँ द्राविण्यै नमः द्राविणीश्रीपादुकां पूजयामि तर्पयामि नमः । इति सर्वत्र १ ॥ द्रीं क्षोभिण्यै नमः क्षोभिणीश्रीपा० २ । दक्षिणे क्लीं वशीकारिण्यै नमः वशीकरिणीश्रीपा० ३ । प्लुं लोपाकर्षिण्यै नमः लोपाकर्षिणीश्रीपा०४ आग्नेय्यां स्त्रीं सम्मोहिन्यै

नमः सम्मोहिनीश्रीपा० ५ । एवमुत्तरे ह्रीं कामाय नमः कामश्रीपा० १ । क्लीं मन्मथाय नमः मन्मथश्रीपा० २ । दक्षिणे ऐं कन्दर्पाय नमः कंदर्पश्रीपा० ३ । प्लुं मकरध्वजाय नमः मकरध्वजश्रीपा० ४ । आग्नेय्यां स्त्रीं मीनकेतवे नमः मीनकेतुश्रीपा० ५ ॥ इति संपूज्य पुष्पाञ्जलिं दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततोऽष्टयोनिषु प्राच्यादिक्रमेण ऐं क्लीं स्त्रीं सः सुभगायै नमः सुभगाश्रीपा० १ । ऐं क्लीं स्त्रीं सः भगायै नमः भगाश्रीपा० २ । ऐं क्लीं स्त्रीं सः भगसर्पिण्यै नमः भगसर्पिणीश्रीपा० ३ । ऐं क्लीं स्त्रीं सः भगमालिन्यै नमः भगमालिनीश्रीपा०४ । ऐं क्लीं स्त्रीं सः अनङ्गायै नमः अनंगाश्रीपा० ५ । ऐं क्लीं स्त्रीं सः अनंगकुसुमायै नमः अनंगकुसुमाश्रीपा० ६ । ऐं क्लीं स्त्रीं सः अनंगमेखलायै नमः अनङ्गमेखलाश्रीपा० ७ । ऐं क्लीं स्त्रीं सः अनंगमदनायै नमः अनंगमदनाश्रीपा० ८ ॥ इत्यष्टौ पूजयित्वा पुष्पाञ्जलिं दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततोऽष्टदलेषु प्राचीक्रमेण ॐ असिताङ्गब्राह्मीभ्यां नमः असितांगब्राह्मीश्रीपा० १ । ॐ रुरुमाहेश्वरीभ्यां नमः रुरुमाहेश्वरीश्रीपा० २ । ॐ चण्डकौमारीभ्यां नमः चण्डकौमारीश्रीपा० ३ । ॐ क्रोधवैष्णवीभ्यां नमः क्रोधवैष्णवीश्रीपा० ४ । ॐ उन्मत्तवाराहीभ्यां नमः उन्मत्तवाराहीश्रीपा० ५ । ॐ कपालीन्द्राणीभ्यां नमः कपालीन्द्राणीश्रीपा० ६ । ॐ भिषणचामुण्डाभ्यां नमः भीषणचामुण्डाश्रीपा० ७ । ॐ संहारमहालक्ष्मीभ्यां नमः संहारमहालक्ष्मीश्रीपा० ८ ॥ इत्यष्टौ संपूज्य पुष्पांजलिं दद्यात् ॥ इति चतुर्थावरणम् ॥ ४ ॥ ततः पंचमावरणे इन्द्रादिदशदिग्पालान् वज्राद्यायुधानि च संपूज्य पुष्पांजलिं दद्यात् ॥ इति पंचमावरणम् ॥ ५ ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य नैवेद्यानंतरं श्रीविद्योक्तबलिचतुष्टयं दत्त्वा हस्तौ पादौ प्रक्षाल्य देवीं ध्यात्वा जपं कुर्यात् ॥ अस्य पुरश्चरणं चतुर्विंशतिलक्षजपः ॥ द्वादशसहस्रपुष्पैर्होमः ॥ तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्यात् ॥ एवं कृते मंत्रः सिद्धो भवति ॥ सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च–दीक्षां प्राप्य जपेन्मंत्रं तत्त्वलक्षं[1] जितेंद्रियः ॥ पुष्पैर्भानुसहस्रैस्तु जुहुयादक्षमक्षजैः ॥ १ ॥ इति भैरवीपटलं समाप्तम् ॥ अथ त्रिपुरभैरवी कवच

---

१ मतांतरेऽपि तत्त्वलक्षमित्यत्र दशलक्षमिति पाठः ।

प्रारंभः ॥ श्रीपार्वत्युवाच ॥ देवदेव महादेव सर्वशास्त्रविशारद ॥ कृपां कुरु जगन्नाथ धर्म्मज्ञोऽसि महामते ॥ १ ॥ भैरवी या पुरा
प्रोक्ता विद्या त्रिपुरपूर्विका ॥ तस्यास्तु कवचं दिव्यं मह्यं कथय तत्त्वतः ॥ २ ॥ तस्यास्तु वचनं श्रुत्वा जगाद जगदीश्वरः ॥ अद्भुतं
कवचं देव्या भैरव्या दिव्यरूपि वै ॥ ३ ॥ ईश्वर उवाच ॥ कथयामि महाविद्याकवचं सर्वदुर्लभम् ॥ शृणुष्व त्वं च विधिना श्रुत्वा
गोप्यं तवापि तत् ॥ ४ ॥ यस्याः प्रसादात्सकलं बिभर्मि भुवनत्रयम् ॥ यस्याः सर्वं समुत्पन्नं यस्यामद्यापि तिष्ठति ॥ ५ ॥ माता
पिता जगद्धन्या जगद्ब्रह्मस्वरूपिणी ॥ सिद्धिदात्री च सिद्धास्या ह्यसिद्धा दुष्टजंतुषु ॥ ६ ॥ सर्वभूतप्रियकरी सर्वभूतस्वरूपिणी ॥ ककारी
पातु मां देवी कामिनी कामदायिनी ॥ ७ ॥ एकारी पातु मां देवी मूलाधारस्वरूपिणी ॥ इकारी पातु मां देवी भूरिसर्वसुखप्रदा ॥ ८ ॥
लकारी पातु मां देवी इन्द्राणीवरवल्लभा ॥ ह्रींकारी पातु मां देवी सर्वदा शंभुसुन्दरी ॥ ९ ॥ एतैर्वर्णैर्महामाया शाम्भवी पातु मस्त
कम् ॥ ककारे पातु मां देवी शर्वाणी हरगेहिनी ॥ १० ॥ मकारे पातु मां देवी सर्वपापप्रणाशिनी ॥ ककारे पातु मां देवी काम
रूपधरा सदा ॥ ११ ॥ ककारे पातु मां देवी शम्बरारिप्रिया सदा ॥ पकारे पातु मां देवी धरा धरणिरूपधृक् ॥ १२ ॥ ह्रींकारी
पातु मां देवी अकारार्द्धशरीरिणी ॥ एतैर्वर्णैर्महामाया कामराहुप्रियाऽवतु ॥ १३ ॥ मकारः पातु मां देवि सावित्री सर्वदायिनी ॥
ककारः पातु सर्वत्र कलाम्बरस्वरूपिणी ॥ १४ ॥ लकारः पातु मां देवी लक्ष्मीः सर्वसुलक्षणा ॥ ह्रीं पातु मां तु सर्वत्र देवी त्रिभु
वनेश्वरी ॥ १५ ॥ एतैर्वर्णैर्महामाया पातु शक्तिस्वरूपिणी ॥ वाग्भवं मस्तकं पातु वदनं कामराजिका ॥ १६ ॥ शक्तिस्वरूपिणी
पातु हृदयं यंत्रसिद्धिदा ॥ सुन्दरी सर्वदा पातु सुन्दरी परिरक्षतु ॥ १७ ॥ रक्तवर्णा सदा पातु सुन्दरी सर्वदायिनी ॥ नानालं
कारसंयुक्ता सुन्दरी पातु सर्वदा ॥ १८ ॥ सर्वांगसुन्दरी पातु सर्वत्र शिवदायिनी ॥ जगदाह्लादजननी शम्भुरूपा च मां
सदा ॥ १९ ॥ सर्वमंत्रमयी पातु सर्वसौभाग्यदायिनी ॥ सर्वलक्ष्मीमयी देवी परमानन्ददायिनी ॥ २० ॥ पातु मां सर्वदा
देवी नानाशंखनिधिः शिवा ॥ पातु पद्मनिधिर्देवी सर्वदा शिवदायिनी ॥ २१ ॥ मां पातु दक्षिणामूर्तिर्ऋषिः सर्वत्र मस्तके ॥

पंक्तिच्छंदःस्वरूपा तु मुखे पातु सुरेश्वरी ॥ २२ ॥ गंधाष्टकात्मिका पातु हृदयं शाङ्करी सदा ॥ सर्वसम्मोहिनी पातु पातु संक्षोभिणी सदा ॥ २३ ॥ सर्वसिद्धिप्रदा पातु सर्वाकर्षणकारिणी ॥ क्षोभिणी सर्वदा पातु वशिनी सर्वदावतु ॥ २४ ॥ आकर्षिणी सदा पातु सम्मोहिनी सदावतु ॥ रतिर्देवी सदा पातु भगांगा सर्वदावतु ॥ २५ ॥ माहेश्वरी सदा पातु कौमारी सर्वदावतु ॥ सर्वाह्लादनकारी मां पातु सर्ववशंकरी ॥ २६ ॥ क्षेमंकरी सदा पातु सर्वांगसुन्दरी तथा ॥ सर्वांगयुवतिः सर्वा सर्वसौभाग्यदायिनी ॥ २७ ॥ वाग्देवी सर्वदा पातु वाणिनी सर्वदावतु ॥ वशिनी सर्वदा पातु महासिद्धिप्रदा सदा ॥ २८ ॥ सर्वविद्राविणी पातु गणनाथः सदावतु ॥ दुर्गा देवी सदा पातु वटुकः सर्वदावतु ॥ २९ ॥ क्षेत्रपालः सदा पातु पातु चावीरशांतिका ॥ अनंतः सर्वदा पातु वराहः सर्वदावतु ॥ ३० ॥ पृथिवी सर्वदा पातु स्वर्णसिंहासनं तथा ॥ रक्तामृतं च सततं पातु मां सर्वकालतः ॥ ३१ ॥ सुरार्णवः सदा पातु कल्पवृक्षः सदावतु ॥ श्वेतच्छत्रं सदा पातु रक्तद्वीपः सदावतु ॥ ३२ ॥ सततं नन्दनोद्यानं पातु मां सर्वसिद्धये ॥ दिक्पालाः सर्वदा पांतु द्वन्द्वौघाः सकलास्तथा ॥ ३३ ॥ वाहनानि सदा पांतु अस्त्राणि पांतु सर्वदा ॥ शस्त्राणि सर्वदा पांतु योगिन्यः पांतु सर्वदा ॥ ॥ ३४ ॥ सिद्धाः पांतु सदा देवी सर्वसिद्धिप्रदावतु ॥ सर्वांगसुन्दरी देवी सर्वदा पातु मां तथा ॥ ३५ ॥ आनन्दरूपिणी देवी चित्स्वरूपा चिदात्मिका ॥ सर्वदा सुन्दरी पातु सुन्दरी भवसुन्दरी ॥ ३६ ॥ पृथग्देवालये घोरे संकटे दुर्गमे गिरौ ॥ अरण्ये प्रांतरे वापि पातु मां सुन्दरी सदा ॥ ३७ ॥ इदं कवचमित्युक्तो मंत्रोद्धारश्च पार्वति ॥ यः पठेत्प्रयतो भूत्वा त्रिसंध्यं नियतः शुचिः ॥ ३८ ॥ तस्य सर्वार्थसिद्धिः स्याद्यद्यन्मनसि वर्तते ॥ गोरोचनाकुंकुमेन रक्तचन्दनकेन वा ॥ ३९ ॥ स्वयंभूकुसुमैः शुक्लैर्भूमिपुत्रे शनौ सुरे ॥ श्मशाने प्रांतरे वापि शून्यागारे शिवालये ॥ ४० ॥ स्वशक्त्या गुरुणा यंत्रं पूजयित्वा कुमारिकाः ॥ तन्मनुं पूजयित्वा च गुरुपांक्तिं तथैव च ॥ ४१ ॥ देव्यै बलिं निवेद्याथ नरमार्जारसूकरैः ॥ नकुलैर्महिषैर्मेषैः पजयित्वा विधानतः ॥ ४२ ॥ धृत्वा सुवर्णमध्यस्थं कण्ठे वा दक्षिणे भुजे ॥ सुतिथौ शुभनक्षत्रे सूर्य्यस्योदयने तथा ॥ ४३ ॥ धारयित्वा च कवचं सर्वसिद्धिं

लभेन्नरः ॥ कवचस्य च माहात्म्यं नाहं वर्षशतैरपि ॥ ४४ ॥ शक्नोमि तु महेशानि वक्तुं तस्य फलं तु यत् ॥ न दुर्भिक्षफलं तत्र न चापि पीडनं तथा ॥ ४५ ॥ सर्वविघ्नप्रशमनं सर्वव्याधिविनाशनम् ॥ सर्वरक्षाकरं जंतोश्चतुर्वर्गफलप्रदम् ॥ ४६ ॥ मंत्रं प्राप्य विधानेन पूजयेत्सततं सुधीः ॥ तत्रापि दुर्लभं मन्ये कवचं देवरूपकम् ॥ ४७ ॥ गुरोः प्रसादमासाद्य विद्यां प्राप्य सुगोपिताम् ॥ तत्रापि कवचं दिव्यं दुर्लभं भुवनत्रये ॥ ४८ ॥ सर्वं वा श्लोकमेकं वा यः पठेत्प्रयतः शुचिः ॥ तस्य सर्वार्थसिद्धिः स्याच्छंकरेण प्रभाषितम् ॥ ४९ ॥ गुरुर्देवो हरः साक्षात्पत्नी तस्य च पार्वती ॥ अभेदेन भजेद्यस्तु तस्य सिद्धिरदूरतः ॥ ५० ॥ इति श्रीरुद्रयामले भैरवभैरवीसंवादे श्रीत्रिपुरभैरवीकवचं समाप्तम् ॥

॥ श्रीगणेशाय नमः ॥ अथ भैरवीकवचप्रारंभः ॥ श्रीदेव्युवाच ॥ भैरव्याः सकला विद्याः श्रुताश्चाधिगता मया ॥ सांप्रतं श्रोतुमिच्छामि कवचं यत्पुरोदितम् ॥ १ ॥ त्रैलोक्यविजयं नाम शस्त्रास्त्रविनिवारणम् ॥ त्वत्तः परतरो नाथ कः कृपां कर्तुमर्हति ॥ २ ॥ ईश्वर उवाच ॥ शृणु पार्वति वक्ष्यामि सुंदरि प्राणवल्लभे ॥ त्रैलोक्यविजयं नाम शस्त्रास्त्रविनिवारकम् ॥ ३ ॥ पठित्वा धारयित्वेदं त्रैलोक्यविजयी भवेत् ॥ जघान सकलान्दैत्यान् यद्धृत्वा मधुसूदनः ॥ ४ ॥ ब्रह्मा सृष्टिं वितनुते यद्धृत्वाभीष्टदायकम् ॥ धनाधिपः कुबेरोऽपि वासवस्त्रिदशेश्वरः ॥ ५ ॥ यस्य प्रसादादीशोऽहं त्रैलोक्यविजयी विभुः ॥ न देयं परशिष्येभ्योऽसाधकेभ्यः कदाचन ॥ ६ ॥ पुत्रेभ्यः किमथान्येभ्यो दद्याच्चेन्मृत्युमाप्नुयात् ॥ ऋषिस्तु कवचस्यास्य दक्षिणामूर्तिरेव च ॥ ७ ॥ विराट् छन्दो जगद्धात्री देवता बालभैरवी ॥ धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॥ ८ ॥ अधरो बिंदुमानाद्यः कामः शक्तिशशीयुतः ॥ भृगुर्मनुस्वरयुतः सर्गो बीजत्रयात्मकः ॥ ९ ॥ बालैषा मे शिरः पातु बिंदुनादयुतापि सा ॥ भालं पातु कुमारीशा सर्गहीना कुमारिका ॥ १० ॥ दृशौ पातु च वाग्बीजं कर्णयुग्मं सदावतु ॥ कामबीजं सदा पातु घ्राणयुग्मं परावतु ॥ ११ ॥ सरस्वतीप्रदा बाला जिह्वां पातु शुचिप्रभा ॥ हस्त्रैं कंठं हसकलरीं स्कंधौ पातु हस्त्रौं भुजौ ॥ १२ ॥ पंचमी भैरवी पातु करौ हसैं सदावतु ॥ हृदयं हसकलीं वक्षः पातु

हसौ स्तनौ मम ॥ १३ ॥ पातु सा भैरवी देवी चैतन्यरूपिणी मम ॥ हस्त्रैं पातु सदा पार्श्वयुग्मं हसकलरीं सदा ॥ १४ ॥ कुक्षिं पातु हसौर्मध्ये भैरवी भुवि दुर्लभा ॥ ऐंईंऔंवं मध्यदेशं बीजविद्या सदाऽवतु ॥ १५ ॥ हस्त्रैं पृष्ठं सदा पातु नाभिं हसकलह्रीं सदा ॥ पातु हसौं करौ पातु षट्कुटा भैरवी मम ॥ १६ ॥ सहस्त्रैं सक्थिनी पातु सहसकलरीं सदावतु ॥ गुह्यदेशं हस्त्रौं पातु जननी भैरवी मम ॥ ॥ १७ ॥ संपत्प्रदा सदा पातु हैं जंघे हसक्लीं पदौ ॥ पातु हंसोः सर्वदेहं भैरवी सर्वदावतु ॥ १८ ॥ हसैं मामवतु प्राच्यां हरक्लीं पावकेऽवतु ॥ हसौं मे दक्षिणे पातु भैरवी चक्रसंस्थिता ॥ १९ ॥ ह्रीं क्लीं ल्वें मां सदा पातु नैर्ऋत्यां चक्रभैरवी ॥ क्रीं क्रीं क्रीं पातु वायव्ये हूं हूं पातु सदोत्तरे ॥ २० ॥ ह्रीं ह्रीं पातु सदैशान्ये दक्षिणे कालिकावतु ॥ ऊर्द्ध्वं प्रागुक्तबीजानि रक्षंतु मामधःस्थले ॥ ॥ २१ ॥ दिग्विदिक्षु स्वाहा पातु कालिका खङ्गधारिणी ॥ ॐ ह्रीं स्त्रीं हूं फट् सा तारा सर्वत्र मां सदावतु ॥ २२ ॥ संग्रामे कानने दुर्गे तोये तरंगदुस्तरे ॥ खङ्गकर्त्रिधरा सोग्रा सदा मां परिक्षतु ॥ २३ ॥ इति ते कथितं देवि सारात्सारतरं महत् ॥ त्रैलोक्य विजयं नाम कवचं परमाद्भुतम् ॥ २४ ॥ यः पठेत्प्रयतो भूत्वा पूजायाः फलमाप्नुयात् ॥ स्पर्द्धामूद्धूय भवने लक्ष्मीर्वाणी वसेत्ततः ॥ ॥ २५ ॥ यः शत्रुभीतो रणकातरो वा भीतो वने वा सलिलालये वा ॥ वादे सभायां प्रतिवादिनो वा रक्षःप्रकोपाद् ग्रहसकुलाद्वा ॥२६॥ प्रचंडदंडाक्षमनाच्च भीतो गुरोः प्रकोपादपि कृच्छ्रसाध्यात् ॥ अभ्यर्च्य देवीं प्रपठेत्रिसंध्यं स स्यान्महेशप्रतिमो जयी च ॥ २७ ॥ त्रैलोक्यविजयं नाम कवचं मन्मुखोदितम् ॥ विलिख्य भूर्जगुटिकां स्वर्णस्थां धारयेद्यदि ॥ २८ ॥ कंठे वा दक्षिणे बाहौ त्रैलोक्य विजयी भवेत् ॥ तद्गात्रं प्राप्य शस्त्राणि भवंति कुसुमानि च ॥ २९ ॥ लक्ष्मीः सरस्वती तस्य निवसेद्भवने मुखे ॥ एतत्कवचमज्ञात्वा यो जपेद्भैरवीं पराम् ॥ बालां वा प्रजपेद्विद्वान्दरिद्रो मृत्युमाप्नुयात् ॥ ३० ॥ इति श्रीरुद्रयामले देवीश्वरसंवादे त्रैलोक्यविजयं नाम भैरवीकवचं समाप्तम् ॥ ॥ अथ त्रिपुरभैरवीसहस्रनामस्तोत्रप्रारंभः ॥ महाकालभैरव उवाच ॥ अथ वक्ष्ये महेशानि देव्या नाम सहस्रकम् ॥ यत्प्रसादान्महादेवि चतुर्वर्गफलं लभेत् ॥ १ ॥ सर्वरोगप्रशमनं सर्वमृत्युविनाशनम् ॥ सर्वसिद्धिकरं स्तोत्रं नातः पर तरः

स्तवः ॥ २ ॥ नातः परतरा विद्या तीर्थं नातः परं स्मृतम् ॥ यस्यां सर्वं समुत्पन्नं यस्यामद्यापि तिष्ठति ॥ ३ ॥ क्षयमेष्यति तत्सर्वं लयकाले महेश्वरी ॥ नमामि त्रिपुरां देवीं भैरवीं भयमोचिनीम् ॥ सर्वसिद्धिकरीं साक्षान्महापातकनाशिनीम् ॥ ४ ॥ ॐ अस्य श्रीत्रिपुरभैरवीसहस्रनामस्तोत्रस्य भगवानृषिः । पंक्तिश्छंदः । आद्या शक्तिः । भगवतीत्रिपुरभैरवी देवता । सर्वकामार्थसिद्ध्यर्थे जपे विनियोगः ॥ ॐ त्रिपुरा परमेशानि योगसिद्धिनिवासिनी ॥ सर्वमंत्रमयी देवी सर्वसिद्धिप्रवर्तिनी ॥ १ ॥ सर्वाधारमयी देवी सर्वसम्पत्प्रदा शुभा ॥ योगिनी योगमाता च योगसिद्धिप्रवर्तिनी ॥२॥ योगिध्येया योगमयी योगियोगनिवासिनी ॥ हेला लीला तथा क्रीडा कालरूपप्रवर्तिनी ॥ ३ ॥ कालमाता कालरात्रिः काली कमलवासिनी ॥ कमला कांतिरूपा च कामराजेश्वरी क्रिया ॥ ४ ॥ कटुः कपटकेशा च कपटा कुटिलाकृतिः ॥ कुमुदा चर्चिका कांतिः कालरात्रिप्रिया सदा ॥ ५ ॥ घोराकारा घोरतरा धर्म्माधर्म्मप्रदा मतिः ॥ घण्टाघर्घरदा घण्टा घण्टानादप्रिया सदा ॥ ६ ॥ सूक्ष्मा सूक्ष्मतरा स्थूला अतिस्थूला सदामतिः ॥ अतिसत्या सत्यवती सत्यसङ्केतवासिनी ॥ ७ ॥ क्षमा भीमा तथाऽभीमा भीमनादप्रवर्तिनी ॥ भ्रमरूपा भयहरा भयदा भयनाशिनी ॥ ८ ॥ श्मशानवासिनी देवी श्मशानालयवासिनी ॥ शवासना शवाहारा शवदेहा शिवाऽशिवा ॥ ९ ॥ कंठदेशशवाहारा शवकंकणधारिणी ॥ दंतुरा सुदती सत्या सत्यसंकेतवासिनी ॥ १० ॥ सत्यदेहा सत्यहारा सत्यवादनिवासिनी ॥ सत्यालया सत्यसंगा सत्यसंगरकारिणी ॥ ११ ॥ असंगसंगरहिता सुसंगासंगमोहिनी ॥ माया मतिर्महामाया महामखविलासिनी ॥ १२ ॥ गलद्रुधिरधारा च मुखद्वयनिवासिनी ॥ सत्यायासा सत्यसंगा सत्यसंगतिकारिणी ॥ १३ ॥ असंगा संगनिरता सुसंगा संगवासिनी ॥ सदासत्या महासत्या मांसपाशा सुमांसका ॥ १४ ॥ मांसाहारा मांसधरा मांसाशी मांसभक्षका ॥ रक्तपाना रक्तरुचिरारक्ता रक्तवल्लभा ॥ १५ ॥ रक्ताहारा रक्तप्रिया रक्तानिन्दकनाशिनी ॥ रक्तपानाप्रिया बाला रक्तदेशा सुरक्तिका ॥ १६ ॥ स्वयंभूकुसुमस्था च स्वयंभूकुसुमोत्सुका ॥ स्वयंभूकुसुमाहारा स्वयंभूनिन्दकासना ॥१७॥ स्वयंभूपुष्पकप्रीता स्वयंभूपुष्पसम्भवा ॥ स्वयंभूपुष्पहाराढ्या स्वयंभूनिन्दकांतका ॥ १८ ॥ कुण्डगोल

विलासी च कुण्डगोलसदामतिः ॥ कुण्डगोलप्रियकरी कुण्डगोलसमुद्भवा ॥ १९ ॥ शुक्रात्मिका शुक्रकरा सुशुक्रा च सुशुक्तिका॥ शुक्रपूजकपूज्या च शुक्रनिन्दकनिन्दका ॥ २० ॥ रक्तमाल्या रक्तपुष्पा रक्तपुष्पकपुष्पका ॥ रक्तचन्दनसिक्तांगी रक्तचन्दन निन्दका ॥ २१ ॥ मत्स्या मत्स्यप्रिया मान्या मत्स्यभक्षा महोदया ॥ मत्स्याहारा मत्स्यकामा मत्स्यनिन्दकनाशिनी ॥ २२ ॥ केकराक्षी तथा क्रूरा क्रूरसैन्यविनाशिनी ॥ क्रूरांगी कुलिशांगी च चक्रांगी चक्रसम्भवा ॥ २३ ॥ चक्रदेहा चक्रहारा चक्रकंकाल वासिनी ॥ निम्ननाभिर्भीतिहरा भयदा भयहारिका ॥ २४ ॥ भयप्रदा भया भीता अभीमा भीमनादिनी ॥ सुन्दरी शोभना सत्या क्षेम्या क्षेमकरी तथा ॥ २५ ॥ सिंदूराञ्चितसिन्दूरा सिन्दूरसदृशाकृतिः ॥ रक्तारंजितनासा च सुनासा निम्ननासिका ॥ २६ ॥ खर्वा लम्बोदरी दीर्घा दीर्घघोणा महाकुचा ॥ कुटिला चञ्चला चण्डी चण्डनादप्रचण्डिका ॥ २७ ॥ अतिचण्डा महाचण्डा श्रीचण्डा चण्डवेगिनी ॥ चाण्डाली चण्डिका चण्डशब्दरूपा च चञ्चला ॥ २८ ॥ चम्पा चम्पावती चोस्ता तीक्ष्णतीक्ष्णा प्रिया क्षतिः ॥ जलदा जयदा योगा जगदानन्दकारिणी ॥ २९ ॥ जगद्वन्द्या जगन्माता जगती जगतः क्षमा ॥ जन्या जयजनेत्री च जयिनी जयदा तथा ॥ ३० ॥ जननी च जगद्धात्री जयाख्या जयरूपिणी ॥ जगन्माता जगन्मान्या जयश्रीर्जयकारिणी ॥ ३१ ॥ जयिनी जयमाला च जया च विजया तथा ॥ खड्गिनी खड्गरूपा च सुसंगा खड्गधारिणी ॥ ३२ ॥ खड्गरूपा खड्गकरा खड्गिनी खड्गवल्लभा ॥ खड्गदा खड्गभावा च खड्गदेहसमुद्भवा ॥ ३३ ॥ खड्गा खड्गधरा खेला खड्गिनी खड्गमण्डिनी ॥ शंखिनी चापिनी देवी वज्रिणी शूलिनी मतिः ॥ ३४ ॥ बलिनी भिन्दिपाली च पाशिनी चांकुशी शरी ॥ धनुषी चटकी चर्म्मा दंती च कर्णनालिकी ॥ ३५ ॥ मुसली हलरूपा च तूणीरगणनासिनी ॥ तूणालया तूणहरा तूणसंभवरूपिणी ॥ ३६ ॥ सुतूणी तूण खेदा च तूणांगी तूणवल्लभा ॥ नानास्त्रधारिणी देवी नानाशस्त्रसमुद्भवा ॥ ३७ ॥ लाक्षा लक्षहरा लाभा सुलाभा लाभनाशिनी ॥ लाभहारा लाभकरा लाभिनी लाभरूपिणी ॥ ३८ ॥ धरित्री धनदा धान्या धान्यरूपा धरा धनुः ॥ धुरशब्दा धुरा मान्या धरांगी

धननाशिनी ॥ ३९ ॥ धनहा धनलाभा च धनलभ्या महाधनुः ॥ अशांता शांतिरूपा च श्वासमार्गनिवासिनी ॥ ४० ॥ गगणा गणसेव्या च गणांगा वागवल्लभा ॥ गणदा गणहा गम्या गमनागमसुन्दरी ॥ ४१ ॥ गम्यदा गणनाशी च गदहा गद वर्द्धिनी ॥ स्थैर्य्या च स्थैर्य्यनाशा च स्थैर्य्यांतकारिणी कुला ॥ ४२ ॥ दात्री कर्त्रीप्रिया प्रेमा प्रियदा प्रियवर्द्धिनी ॥ प्रियहा प्रिय भव्या च प्रियप्रेमांघ्रिपा तनुः ॥ ४३ ॥ प्रियजा प्रियभव्या च प्रियस्था भवनस्थिता ॥ सुस्थिरा स्थिररूपा च स्थिरदा स्थैर्य्यबर्हिणी ॥ ॥ ४४ ॥ चञ्चला चपला चोला चपलांगनिवासिनी ॥ गौरी काली तथा च्छिन्ना माया मायाहरप्रिया ॥ ४५ ॥ सुन्दरी त्रिपुरा भव्या त्रिपुरेश्वरवासिनी ॥ त्रिपुरनाशिनी देवी त्रिपुरप्राणहारिणी ॥ ४६ ॥ भैरवी भैरवस्था च भैरवस्य प्रिया तनुः ॥ भवांगी भैरवा कारी भैरवप्रियवल्लभा ॥ ४७ ॥ कालदा कालरात्रिश्च कामा कात्यायनी क्रिया ॥ क्रियदा क्रियहा क्लैव्या प्रियप्राणक्रिया तथा ॥ ॥ ४८ ॥ क्रींकारी कमला लक्ष्मीः शक्तिः स्वाहा विभुः प्रभुः ॥ प्रकृतिः पुरुषश्चैव पुरुषा पुरुषाकृतिः ॥ ४९ ॥ परमः पुरुष श्चैव माया नारायणी मतिः ॥ ब्राह्मी महेश्वरी चैव कौमारी वैष्णवी तथा ॥ ५० ॥ वाराही चैव चामुण्डा इन्द्राणी हरवल्लभा ॥ भार्गी माहेश्वरी कृष्णा कात्यायन्यपि पूतना ॥ ५१ ॥ राक्षसी डाकिनी चित्रा विचित्रा विभ्रमा तथा ॥ हाकिनी राकिनी भीता गंधर्वा गंधवाहिनी ॥ ५२ ॥ केकरी कोटराक्षी च निर्मांसा लूकमांसिका ॥ ललजिह्वा सुजिह्वा च बालदा बालदायिनी ॥ ५३ ॥ चन्द्रा चन्द्रप्रभा चान्द्री चन्द्रकांतिसुतत्परा ॥ अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः ॥ ५४ ॥ शशिनी चन्द्रिका कांतिर्ज्योत्स्ना श्रीः प्रीतिरंगदा ॥ पूर्णा पूर्णामृता कल्पलतिका कल्पदानदा ॥ ५५ ॥ सुकल्पा कल्पहस्ता च कल्पवृक्षकरी हनुः ॥ कल्पाख्या कल्पभव्या च कल्पानन्दकवन्दिता ॥ ५६ ॥ सूचीमुखी प्रेतमुखी उल्कामुखी महासुखी ॥ उग्रमुखी च सुमुखी काकास्या विकटानना ॥ ५७ ॥ कृकलास्या च संध्यास्या मुकुलीशा रमाकृतिः ॥ नानामुखी च नानास्था नानारूपप्रधारिणी ॥ ५८ ॥ विश्वार्च्या विश्वमाता च विश्वाख्या विश्वभाविनी ॥ सूर्य्या सूर्य्यप्रभा शोभा सूर्य्यमण्डलसंस्थिता ॥ ५९ ॥ सूर्य्यकांतिः सूर्य्यकरा

सूर्य्याख्या सूर्य्यभावना ॥ तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः ॥ ६० ॥ सुरदा भोगदा विश्वा बोधिनी धारिणी क्षमा ॥
युगदा योगहा योग्या योग्यहा योगवर्द्धिनी ॥ ६१ ॥ वह्निमण्डलसंस्था च वह्निमण्डलमध्यगा ॥ वह्निमण्डलरूपा च वह्निमण्डल
संज्ञका ॥ ६२ ॥ वह्नितेजा वह्निरागा वह्निदा वह्निनाशिनी ॥ वह्निक्रिया वह्निभुजा कला वह्निस्थिता सदा ॥ ६३ ॥ धूम्रार्चिषा
चोज्ज्वलिनी तथा वै विस्फलिंगिनी ॥ शूलिनी वै स्वरूपा च कपिला हव्यवाहिनी ॥ ६४ ॥ नानातेजस्विनी देवी परब्रह्मकुटु
म्बिनी ॥ ज्योतिर्ब्रह्ममयी देवी परब्रह्मस्वरूपिणी ॥ ६५ ॥ परमात्मा परा पुण्या पुण्यदा पुण्यवर्द्धिनी ॥ पुण्यदा पुण्यनाम्नी च
पुण्यगंधा प्रिया तनुः ॥ ६६ ॥ पुण्यदेहा पुण्यकरा पुण्यनिन्दकनिन्दका ॥ पुण्यकालकरा पुण्या सुपुण्या पुण्यमालिका ॥ ६७ ॥
पुण्यखेला पुण्यकेली पुण्यनामसमा पुरा ॥ पुण्यसेव्या पुण्यखेल्या पुराणपुण्यवल्लभा ॥ ६८ ॥ पुरुषा पुरुषप्राणा पुरुषात्मस्वरू
पिणी ॥ पुरुषांगी च पुरुषी पुरुषस्य कला सदा ॥ ६९ ॥ सुपुष्पा पुष्पकप्राणा पुष्पहा पुष्पवल्लभा ॥ पुष्पप्रिया पुष्पहारा पुष्प
वन्दकवन्दका ॥ ७० ॥ पुष्पहा पुष्पमाला च पुष्पनिन्दकनाशिनी ॥ नक्षत्रप्राणहंत्री च नक्षत्रालक्ष्यवन्दका ॥ ७१ ॥ लक्षमाल्या
लक्षहारा लक्ष्यालक्ष्यस्वरूपिणी ॥ नक्षत्राणी सुनक्षत्रा नक्षत्राहा महोदया ॥ ७२ ॥ महामाल्या महामान्या महती मातृपूजिता ॥
महामहाकनीया च महाकालेश्वरी महा ॥ ७३ ॥ महास्या वन्दनीया च महाशब्दनिवासिनी ॥ महाशंखेश्वरी मीना मत्स्यगंधा महो
दरी ॥ ७४ ॥ लम्बोदरी च लम्बोष्ठी लम्बनिम्नतनूदरी ॥ लम्बोष्ठी लम्बनासा च लम्बघोणा ललत्सुका ॥ ७५ ॥ अति
लम्बा महालम्बा सुलम्बा लम्बवाहिनी ॥ लम्बार्हा लम्बशक्तिश्च लम्बस्था लम्बपूर्विका ॥ ७६ ॥ चतुर्घण्टा महाघण्टा घण्टानाद
प्रिया सदा ॥ वाद्यप्रिया वाद्यरता सुवाद्या वाद्यनाशिनी ॥ ७७ ॥ रमा रामा सुबाला च रमणीयस्वभाविनी ॥ सुरम्या रम्यदा रम्भा
रम्भोरू रामवल्लभा ॥ ७८ ॥ कामप्रिया कामकरा कामांगी रमणी रतिः ॥ रतिप्रिया रतिरती रतिसेव्या रतिप्रिया ॥ ७९ ॥
सुरभिः सुरभीशोभा दिक्शोभाऽशुभनाशिनी ॥ सुशोभा च महाशोभाऽतिशोभा प्रेततापिनी ॥ ८० ॥ लोभिनी च महालोभा सुलोभा

लोभवर्द्धिनी ॥ लोभांगी लोभवंद्या च लोभाही लोभवासका ॥ ८१ ॥ लोभप्रिया महालोभा लोभनिन्दकनिन्दका ॥ लोभांग
वासिनी गंधा विगंधा गंधनाशिनी ॥८२ ॥ गंधाङ्गी गंधपुष्टा च सुगंधा प्रेमगंधिका ॥ दुर्गंधा पूतिगंधा च विगंधा चातिगंधिका ॥ ८३ ॥
पद्मांतिका पद्मवहा पद्मप्रियप्रियंकरी ॥ पद्मनिन्दकनिन्दा च पद्मसंतोषवाहना ॥ ८४ ॥ रक्तोत्पलवरा देवी रक्तोत्पलप्रिया
सदा ॥ रक्तोत्पलसुगंधा च रक्तोत्पलनिवासिनी ॥ ८५ ॥ रक्तोत्पलमहामाला रक्तोत्पलमनोहरा ॥ रक्तोत्पलसुनेत्रा च रक्तोत्पल
स्वरूपधृक् ॥ ८६ ॥ वैष्णवी विष्णुपूज्या च वैष्णवांगनिवासिनी ॥ विष्णुपूजकपूज्या च वैष्णवे संस्थिता तनुः ॥ ८७ ॥
नारायणस्य देहस्था नारायणमनोहरा ॥ नारायणस्वरूपा च नारायणमनःस्थिता ॥ ८८ ॥ नारायणांगसंभूता नारायणप्रिया तनुः ॥
नारी नारायणी गण्या नारायणगृहप्रिया ॥ ८९ ॥ हरपूज्या हरश्रेष्ठा हरस्य वल्लभा क्षमा ॥ संहारी हरदेहस्था हरपूजनतत्परा ॥
॥ ९० ॥ हरदेहसमुद्भूता हरांगवासिनी कुहूः ॥ हरपूजकपूज्या च हरवन्दकतत्परा ॥ ९१ ॥ हरदेहसमुत्पन्ना हरक्रीडासदागतिः ॥
सुगणा संगरहिता असंगा संगनाशिनी ॥ ९२ ॥ निर्जना विजना दुर्गा दुर्गक्लेशनिवारिणी ॥ दुर्गदेहांतका दुर्गारूपिणी दुर्गतस्थिता ॥
॥ ९३ ॥ प्रेतप्रिया प्रेतकरा प्रेतदेहसमुद्भवा ॥ प्रेतांगवासिनी प्रेता प्रेतदेहविमर्द्दिका ॥ ९४ ॥ डाकिनी योगिनी कालरात्रिः
कालप्रिया सदा ॥ कालरात्रिहरा काली कृष्णदेहा महातनुः ॥ ९५ ॥ कृष्णांगी कुटिलांगी च वज्रांगी वज्ररूपधृक् ॥ नाना
देहधरा धन्या षट्चक्रक्रमवासिनी ॥ ९६ ॥ मूलाधारनिवासा च मूलाधारस्थिता सदा ॥ वायुरूपा महारूपा वायुमार्गनिवा
सिनी ॥ ९७ ॥ वायुयुक्ता वायुकरा वायुपूरकपूरका ॥ वायुरूपधरा देवी सुषुम्नामार्गगामिनी ॥ ९८ ॥ देहस्था देहरूपा च
देहध्येया सुदेहिका ॥ नाडीरूपा महीरूपा नाडीस्थाननिवासिनी ॥ ९९ ॥ इडा च पिंगला चैव सुषुम्नामध्यवासिनी ॥ सदाशिव
प्रियकरी मूलप्रकृतिरूपधृक् ॥ १०० ॥ अमृतेशी महाशाली शृंगारांगनिवासिनी ॥ उत्पत्तिस्थितिसंहारप्रलया पदवासिनी ॥
॥ १०१ ॥ महाप्रलययुक्ता च सृष्टिसंहारकारिणी ॥ स्वधा स्वाहा हव्यवाहा हव्या हव्यप्रिया सदा ॥ १०२ ॥ हव्यस्था हव्य

भक्षा च हव्यदेहसमुद्भवा ॥ हव्यक्रीडा कामधेनुस्वरूपा रूपसम्भवा ॥ १०३ ॥ सुरभिर्नन्दिनी पुण्या यज्ञांगी यज्ञसम्भवा । यज्ञस्था यज्ञदेहा च योनिजा योनिवासिनी ॥ १०४ ॥ अयोनिजा सती सत्या असती कुटिला तनुः ॥ अहल्या गौतमी गम्या विदेहा देहनाशिनी ॥ १०५ ॥ गांधारी द्रौपदी दूती शिवप्रिया त्रयोदशी ॥ पौर्णमासी पञ्चदशी पञ्चमी च चतुर्दशी ॥ १०६ ॥ षष्ठी च नवमी चैव अष्टमी दशमी तथा ॥ एकादशी द्वादशी च द्वाररूपाऽभयप्रदा ॥ १०७ ॥ संक्रांतिः सामरूपा च कुलीना कुलनाशिनी ॥ कुलकांता कृशा कुम्भा कुम्भदेहविवर्द्धिनी ॥ १०८ ॥ विनीता कुलवत्यर्था अंतरी चानुगाप्युषा ॥ नदीसागरदा शांतिः शांतिरूपा सुशांतिका ॥ १०९ ॥ आशा तृष्णा क्षुधा क्षोभ्या क्षोभरूपनिवासिनी ॥ गङ्गासागरगा कांतिः श्रुतिः स्मृतिर्धृतिर्मही ॥ ॥ ११० ॥ दिवा रात्रिः पंचभूतदेहा चैव सुदेहिका ॥ तण्डुला च्छिन्नमस्ता च नागयज्ञोपवीतिनी ॥ १११ ॥ वर्णिनी डाकिनी शक्तिः कुरुकुल्ला सुकुल्लका ॥ प्रत्यंगिराऽपरा देवी अजिता जयदायिनी ॥ ११२ ॥ जया च विजया चैव महिषासुरघातिनी ॥ मधुकैटभहंत्री च चण्डमुण्डविनाशिनी ॥ ११३ ॥ निशुंभशुंभहननी रक्तबीजक्षयंकरी ॥ काशी काशीनिवासा च मधुरा पार्वती परा ॥ ११४ ॥ अपर्णा चण्डिका देवी मृडानी चाम्बिका कला ॥ शुक्ला कृष्णा वर्ण्यवर्णा शरदिन्दुकलाकृतिः ॥ ११५ ॥ रुक्मिणी राधिका चैव भैरव्याः परिकीर्तितम् ॥ अष्टाधिकसहस्रं तु देवीनामानुकीर्त्तनात् ॥ ११६ ॥ महापातकयुक्तोऽपि मुच्यते नात्र संशयः ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ ११७ ॥ महापातककोटयस्तु तथा चैवोपपातकम् ॥ स्तोत्रेण भैरवोक्तेन सर्वं नश्यति तत्क्षणात् ॥ ११८ ॥ सर्वं वा श्लोकमेकं वा पठनात्स्मरणादपि ॥ पठेद्वा पाठयेद्वापि सद्यो मुच्येत बन्धनात् ॥ ११९ ॥ राजद्वारे रणे दुर्गे संकटे गिरिदुर्गमे ॥ प्रांतरे पर्वते वापि नौकायां वा महेश्वरि ॥ १२० ॥ वह्निदुर्गभये प्राप्ते सिंहव्याघ्रभयाकुले ॥ पठनात् स्मरणान्मर्त्यो मुच्यते सर्वसंकटात् ॥ १२१ ॥ अपुत्रो लभते पुत्रं दरिद्रो धनवान्भवेत् ॥ सर्वशास्त्रपरो विप्रः सर्वयज्ञफलं लभेत् ॥ १२२ ॥ अग्निवायुजलस्तंभं गतिस्तंभं विवस्वतः ॥ मारणे द्वेषणे चैव तथोच्चाटे महेश्वरि ॥ १२३ ॥ गोरोचनाकुंकुमेन

लिखेत्स्तोत्रमनन्यधीः ॥ गुरुणा वैष्णवैर्वापि सर्वयज्ञफलं लभेत् ॥ १२४ ॥ वशीकरणमंत्रैर्वा जायंते सर्वसिद्धयः ॥ प्रातःकाले शुचि भूत्वा मध्याह्ने च निशामुखे ॥ १२५ ॥ पठेद्वा पाठयेद्वापि सर्वयज्ञफलं लभेत् ॥ वादी मूको भवेद्दुष्टो राजा च सेवको यथा ॥ १२६ ॥ आदित्यमंगलदिने गुरौ वापि महेश्वरि ॥ गोरोचनाकुंकुमेन लिखेत्स्तोत्रमनन्यधीः ॥ १२७ ॥ धृत्वा सुवर्णमध्यस्थं सर्वान् कामानवाप्नुयात् ॥ स्त्रीभिर्वामकरे धार्य्यं पुंभिर्दक्षकरे तथा ॥ १२८ ॥ आदित्यमंगलदिने गुरौ वापि महेश्वरि ॥ शनैश्चरे लिखे द्वापि सर्वसिद्धिं लभेद्ध्रुवम् ॥ १२९ ॥ प्रांतरे वा श्मशाने वा निशायामर्द्धरात्रके ॥ शून्यागारे च देवेशि लिखेद्यत्नेन साधकः ॥ ॥ १३० ॥ सिंहराशौ गुरुगते कर्कटस्थे दिवाकरे ॥ मीनराशौ गुरुगते लिखेद्यत्नेन साधकः ॥ १३१ ॥ रजस्वलाभगं दृष्ट्वा तत्रस्थो विलिखेत्सदा ॥ सुगंधिकुसुमैः शुक्लैः सुगन्धिगंधचन्दनैः ॥ १३२ ॥ मृगनाभिमृगमदैर्वापिलिखेद्यत्नपूर्वकम् ॥ लिखित्वा च पठित्वा च धारयेच्चाप्यनन्यधीः ॥ १३३ ॥ कुमारीं पूजयित्वा च नारीश्चापि प्रपूजयेत् ॥ पूजयित्वा च कुसुमैर्गंधचन्दनवस्त्रकैः ॥ ॥ १३४ ॥ सिंदूररक्तकुसुमैः पूजयेद्भक्तियोगतः ॥ अथवा पूजयेद्देवि कुमारीर्दश नान्यधीः ॥ १३५ ॥ सर्वाभीष्टफलं तत्र लभते तत्क्षणादपि ॥ नात्र सिद्धयाद्यपेक्षास्ति न वा मित्रारिदूषणम् ॥ १३६ ॥ न विचार्य्यं च देवेशि जपमात्रेण सिद्धिदम् ॥ सर्वदा सर्व कालेषु षट्साहस्रप्रमाणतः ॥ १३७ ॥ बालिं दत्त्वा विधानेन प्रत्यहं पूजयेच्छिवाम् ॥ स्वयंभूकुसुमैः पुष्पैर्बलिदानं दिवानिशम् ॥ ॥ १३८ ॥ पूजयेत्पार्वतीं देवीं भैरवीं त्रिपुरात्मिकाम् ॥ ब्राह्मणान्भोजयेन्नित्यं दश वा द्वादशं तथा ॥ १३९ ॥ अनेन विधिना देवि बालां नित्यं प्रपूजयेत् ॥ मासमेकं पठेद्यस्तु त्रिसंध्यं विधिनाऽमुना ॥ १४० ॥ अपुत्रो लभते पुत्रं निर्द्धनो धनवान्भवेत् ॥ सदा चानेन विधिना तथा मासत्रयेण च ॥ १४१ ॥ कृतकार्यो भवेद्देवि तथा मासचतुष्टये ॥ दीर्घरोगात्प्रमुच्येत पञ्चमे कविराड् भवेत् ॥ ॥ १४२ ॥ सर्वैश्वर्य्यं लभेद्देवि मासषट्के तथैव च ॥ सप्तमे खेचरत्वं च अष्टमे च बृहद्द्युतिः ॥ १४३ ॥ नवमे सर्वसिद्धिः स्या द्दशमे लोकपूजितः ॥ एकादशे राजवश्यो द्वादशे तु पुरन्दरः ॥ १४४ ॥ वारमेकं पठेद्यस्तु प्राप्नुयात् पूजने फलम् ॥ समग्रं श्लोकमेकं

वा यः पठेत्प्रयतः शुचिः ॥ १४५ ॥ स पूजाफलमाप्नोति भैरवेण च भाषितम् ॥ आयुष्मत्प्रीतियोगे च ब्राह्मैन्द्रे च विशेषतः ॥ १४६ ॥ पंचम्यां च तथा षष्ठ्यां यत्र कुत्रापि तिष्ठति ॥ शंका न विद्यते तत्र न च मायादिदूषणम् ॥ १४७ ॥ वारमेकं पठेन्मर्त्यो मुच्यते सर्वसंकटात् ॥ किमन्यद्बहुना देवि सर्वाभीष्टफलं भवेत् ॥१४८॥ इति श्रीविश्वसारे महाकालविरचितं श्रीमत्त्रिपुरभैरवीसहस्रनामस्तोत्रं समाप्तम्॥


अथ भैरवीस्तवराजप्रारंभः ॥ ब्रह्मादयः स्तुतिशतैरपि सूक्ष्मरूपं जानंति नैव जगदादिमनादिमूर्तिम् ॥ तस्माद्वयं कुचनतां नवकुंकुमाभां स्थूलां स्तुमः सकलवाङ्मयमातृभूताम् ॥ १ ॥ सद्यः समुद्यतसहस्रदिवाकराभां विद्याक्षसूत्रवरदाभयचिह्नहस्ताम् ॥ नेत्रोत्पलैस्त्रिभिरलंकृतवक्त्रपद्मां त्वां तारहाररुचिरां त्रिपुरे भजामः ॥ २ ॥ सिंदूरपूररुचिरं कुचभारनम्रं जन्मांतरेषु कृतपुण्यफलैकगम्यम् ॥ अन्योन्यभेदकलहाकुलमानसास्ते जानंति किं जडधियस्तवरूपमंब ॥ ३ ॥ स्थूलां वदंति मुनयः श्रुतयो गृणंति सूक्ष्मां वदंति वचसामधिवासमन्ये ॥ त्वां मूलमाहुरपरे जगतां भवानि मन्यामहे वयमपारकृपांबुराशिम् ॥ ४ ॥ चन्द्रावतंसकलितां शरदिंदुशुभ्रां पंचाशदक्षरमयीं हृदि भावयंतीम् ॥ त्वां पुस्तकं जपवटीममृताम्बुकुंभं व्याख्यां च हस्तकमलैर्दधतीं त्रिनेत्राम् ॥ ५ ॥ शंभुस्त्वमद्रितनयाकलितार्द्धभागो विष्णुस्त्वमंब कमलापरिरब्धदेहः ॥ पद्मोद्भवस्त्वमपि वागधिवासभूमिस्तेषां क्रियाश्च जगति त्रिपुरे त्वमेव ॥ ६ ॥ आश्रित्य वाग्भवभवांश्चतुरः परादीन् भावान्पदेषु विहितान्समुदीरयंतीम् ॥ कंठादिभिश्च करणैः परदेवतां त्वां संविन्मयीं हृदि कदापि न विस्मरामि ॥ ७ ॥ आकुंच्य वायुमवजित्य च वैरिषट्कमालोक्य निश्चलधिया निजनासिकाग्रम् ॥ ध्यायंति मूर्ध्नि कलितेंदुकलावसंतं त्वद्रूपमंब कृतिनस्तरुणार्कमित्रम् ॥ ८ ॥ त्वं प्राप्य मन्मथरिपोर्वपुरर्द्धभागं सृष्टिं करोषि जगतामिति वेदवादः ॥ सत्यं तदद्रितनये जगदेकमातर्नो चेदशेषजगतः स्थितिरेव न स्यात् ॥ ९ ॥ पूजां विधाय कुसुमैः सुरपादपानां पीठे तवाम्ब कनकाचलगह्वरेषु ॥
गायंति सिद्धवनिताः सह किंनरीभिरास्वादितासवरसारुणनेत्रपद्माः ॥ १० ॥ विद्युद्विलासवपुषः श्रियमुद्वहंतीं यांतीं स्ववासभवनाच्छिवराजधानीम् ॥ सौषुम्नवर्त्मकमलानि विकासयंतीं देवीं भजे हृदि परामृतसिक्तगात्राम् ॥ ११ ॥ आनंदजन्मभवनं भवनं श्रुतीनां

चैतन्यमात्रतनुमंब तवाश्रयामि ॥ ब्रह्मेशविष्णुभिरुपासितपादपद्मां सौभाग्यजन्मवसतिं त्रिपुरे यथावत् ॥ १२ ॥ शब्दार्थभावि भवनं सृजतीन्दुरूपा या तद्बिभर्ति पुनरर्कतनुः स्वशक्त्या ॥ ब्रह्मात्मिका हरति तत्सकलं युगांते तां शारदां मनसि जातु न विस्मरामि ॥१३॥ नारायणीति नरकार्णवतारिणीति गौरीति खेदशमनीति सरस्वतीति ॥ ज्ञानप्रदेति नयनत्रयभूषितेति त्वामद्रिराजतनये बहुधा वदंति ॥ ॥ १४ ॥ ये स्तुवंति जगन्मातः श्लोकैर्द्वादशभिः क्रमात् ॥ त्वामनुप्राप्य वाक्सिद्धिं प्राप्नुयुस्ते नराः श्रियम् ॥ १५ ॥ इति रुद्रयामले भैरवीस्तोत्रं समाप्तम् ॥ अथ भैरव्यष्टोत्तरशतनामस्तोत्रप्रारंभः ॥ श्रीदेव्युवाच ॥ कैलासवासिन्भगवन्प्राणेश्वर कृपानिधे ॥ भक्तवत्सल भैरव्या नाम्नामष्टोत्तरं शतम् ॥ १ ॥ न श्रुतं देवदेवेश वद मां दीनवत्सल ॥ श्रीशिव उवाच ॥ शृणु प्रिये महागोप्यं नाम्नामष्टोत्तरं शतम् ॥ २ ॥ भैरव्याः शुभदं सेव्यं सर्वसम्पत्प्रदायकम् ॥ यस्यानुष्ठानमात्रेण किं न सिद्ध्यति भूतले ॥ ३ ॥ ॐ भैरवी भैरवाराध्या भूतिदा भूतभावना ॥ कार्य्या ब्राह्मी कामधेनुः सर्वसम्पत्प्रदायिनी ॥ ४ ॥ त्रैलोक्यवन्दिता देवी महिषासुरमर्दिनी ॥ मोहघ्नी मालतीमाला महापातकनाशिनी ॥ ५ ॥ क्रोधिनी क्रोधनिलया क्रोधरक्तेक्षणा कुहूः ॥ त्रिपुरा त्रिपुराधारा त्रिनेत्रा भीमभैरवी ॥ ६ ॥ देवकी देवमाता च देवदुष्टविनाशिनी ॥ दामोदरप्रिया दीर्घा दुर्गा दुर्गतिनाशिनी ॥ ॥ ७ ॥ लम्बोदरी लम्बकर्णा प्रलम्बितपयोधरा ॥ प्रत्यंगिरा प्रतिपदा प्रणतक्लेशनाशिनी ॥ ८ ॥ प्रभावती गुणवती गणमाता गुहेश्वरी ॥ क्षीराब्धितनया क्षेम्या जगत्त्राणविधायिनी ॥ ९ ॥ महामारी महामोहा महाक्रोधा महानदी ॥ महापातकसंहर्त्री महामोहप्रदायिनी ॥ १० ॥ विकराला महाकाला कालरूपा कलावती ॥ कपालखट्वांगधरा खड्गखर्प्परधारिणी ॥ ॥ ११ ॥ कुमारी कुंकुमप्रीता कुंकुमारुणरंजिता ॥ कौमोदकी कुमुदिनी कीर्त्या कीर्तिप्रदायिनी ॥ १२ ॥ नवीना नीरदा नित्या नन्दिकेश्वरपालिनी ॥ घर्घरा घर्घरारावा घोरा घोरस्वरूपिणी ॥ १३ ॥ कलिघ्नी कलिधर्मघ्नी कलिकौतुकनाशिनी ॥ किशोरी केशवप्रीता क्लेशसंघनिवारिणी ॥ १४ ॥ महोत्तमा महामत्ता महाविद्या महीमयी ॥ महायज्ञा महावाणी महामन्दरधारिणी ॥ १५ ॥

मोक्षदा मोहदा मोहा भुक्तिमुक्तिप्रदायिनी ॥ अट्टाट्टहासनिरता क्वणन्नूपुरधारिणी ॥ १६ ॥ दीर्घदंष्ट्रा दीर्घमुखी दीर्घघोणा च दीर्घिका ॥ दनुजांतकरी दुष्टा दुःखदारिद्र्यभंजिनी ॥ १७ ॥ दुराचारा च दोषघ्नी दमपत्नी दयापरा ॥ मनोभवा मनुमयी मनुवंशप्रवर्द्धिनी ॥ १८ ॥ श्यामा श्यामतनुः शोभा सौम्या शम्भुविलासिनी ॥ इति ते कथितं दिव्यं नाम्नामष्टोत्तर शतम् ॥ १९ ॥ भैरव्या देवदेवेश्यास्तव प्रीत्यै सुरेश्वरि ॥ अप्रकाश्यमिदं गोप्यं पठनीयं प्रयत्नतः ॥ २० ॥ देवीं ध्यात्वा सुरां पीत्वा मकारपञ्चकैः प्रिये ॥ पूजयेत्सततं भक्त्या पठेत्स्तोत्रमिदं शुभम् ॥ २१ ॥ षण्मासाभ्यंतरे सोऽपि गणनाथसमो भवेत् ॥ किमत्र बहुनोक्तेन त्वदग्रे प्राणवल्लभे ॥ २२ ॥ सर्वं जानासि सर्वज्ञे पुनर्मां परिपृच्छसि ॥ न देयं पराशिष्येभ्यो निन्दकेभ्यो विशेषतः ॥ २३ ॥ इति श्रीभैरव्यष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥ इति श्रीमंत्रमहार्णवे मध्यखण्डे त्रिपुरभैरवीतंत्रेऽष्टमस्तरंगः ॥ ८ ॥

॥ श्रीगणेशाय नमः ॥ अथ छिन्नमस्तातंत्रप्रारंभः ॥ तत्रादौ सप्तदशाक्षरमंत्रप्रयोगः ॥ मंत्रो यथा मंत्रमहोदधौ[2]–ॐ श्रीं ह्रीं ह्रीं क्लीं ऐं वज्रवैरोचनीये ह्रीं ह्रीं फट् स्वाहा ॥ इति सप्तदशाक्षरो मंत्रः[1]। अस्य विधानम्–अस्य शिरश्छिन्नामंत्रस्य भैरवऋषिः। सम्राट् छंदः। छिन्नमस्ता देवता। ह्रींकारद्वयं बीजम्। स्वाहाशक्तिः। अभीष्टसिद्धये जपे विनियोगः। ॐ भैरवऋषये नमः शिरसि १। सम्राट्छंदसे नमः मुखे २। छिन्नमस्तादेवतायै नमः हृदये ३। ह्रींह्रींबीजाय नमो गुह्ये ४। स्वाहाशक्तये नमः पादयोः ५। विनियोगाय नमः सर्वांगे ६ ॥ इति ऋष्यादिन्यासः ॥ ॐ आं खड्गाय स्वाहा अंगुष्ठयोः १। ॐ ईं सुखड्गाय स्वाहा तर्जन्योः २। ॐ ऊं वज्राय स्वाहा मध्यमयोः ३। ॐ ऐं पाशाय स्वाहा अनामिकयोः ४। ॐ औं अंकुशाय स्वाहा कनिष्ठयोः ५। ॐ अः सुरक्षरक्ष ह्रीं ह्रीं स्वाहा करतलकरयोः ६ ॥ इति करन्यासः ॥ ॐ आं खड्गाय हृदयाय नमः स्वाहा १। ॐ ईं सुखड्गाय शिरसे स्वाहा २। ॐ ऊँ वज्राय शिखायै वषट् स्वाहा ३। ॐ ऐं पाशाय कवचाय हुं स्वाहा ४। ॐ औं अंकुशाय नेत्रत्रयाय वौषट् स्वाहा ५। ॐ अः सुरक्षरक्ष ह्रीं ह्रीं अस्त्राय फट् स्वाहा ६॥ इति हृदयादिषडंगन्यासः ॥ ॐ श्रीं ह्रीं ह्रीं क्लीं ऐं

छिन्नमस्तादेव्यै नमः।



१ तंत्रतारेऽपि–लक्ष्मीः प्रथमबीजेऽस्ति लज्जाबीजे मनोभवः ॥ तृतीयेऽस्मिन् सदा देवी महापातकनाशिनी ॥ १॥ चतुर्थे तु गुणातीता मुक्तिविद्याप्रदायिका ॥ नकारे वरुणः साक्षाज्जकारे तु सुराधिपः ॥ २ ॥ रेफे हुताशनो देवो वकारे वसुधाधिपः ॥ यकारे त्रिपुरा देवी रेफे त्रिपुरसुन्दरी॥३॥त्रैलोक्यविजया देवी सदैवोकारसंस्थिता ॥ चकारे चन्द्रमा देवो नकारे हि विनायकः ॥ ४ ईकारे कमला साक्षाद्यकारे च सरस्वती ॥ मायायुग्मे सदा देवी प्रकृत्या सह संगता ॥ ५ ॥ वैखरी चैव फट्कारे स्वाकारे कुसुमायुधः ॥ हाकारे च रतिस्तिष्ठेदेवं मंत्रसमुच्चये ॥ ६ ॥ २ मंत्रमहोदधौ क्लींबीजाभावः ॥ ३ अस्याः संस्मरणात्सर्वे वज्रदेहा भवंति हि ॥ सर्वैश्वर्ययुतास्ते हि जीवन्मुक्ता दशाब्दतः ॥ १ ॥

वज्रवैरोचनीये ह्रीं ह्रीं फट् स्वाहा मस्तकादिपादपर्यंतम् १। ॐ श्रीं ह्रीं ह्रीं क्लीं ऐं वज्रवैरोचनीये ह्रीं ह्रीं फट् स्वाहा पादादिमस्तकांतम् २ ॥ इति त्रिवारं न्यसेत् ॥ अथ ध्यानम्—ॐ भास्वन्मण्डलमध्यगां निजशिरश्छिन्नं विकीर्णालकं स्फारास्यं प्रपिबद्गलात्स्वरुधिरं वामे करे बिभ्रतीम् ॥ याभासक्तरतिस्मरोपरिगतां सख्यौ निजे डाकिनीवर्णिन्यौ परिदृश्य मोदकलितां श्रीछिन्नमस्तां भजे ॥ १ ॥ तंत्रांतरेऽपि—प्रत्यालीढपदां सदैव दधतीं छिन्नं शिरः कर्त्रिकां दिग्वस्त्रां स्वकबंधशोणितसुधाधारां पिबंतीं मुदा ॥ नागाबद्धशिरोमणिं त्रिनयनां हृद्युत्पलालंकृतां रत्यासक्तमनोभवोपरि दृढां ध्यायेजवासन्निभाम् ॥ १ ॥ दक्षे चातिसिता विमुक्तचिकुरा कर्त्रीं तथा खर्परं हस्ताभ्यां दधती रजोगुणभवा नाम्नापि सा वर्णिनी ॥ देव्याश्छिन्नकबंधतः पतदसृग्धारां पिबंती मुदा नागाबद्धशिरोमणिर्मनुविदा ध्येया सदा सा सुरैः ॥ ॥ २ ॥ प्रत्यालीढपदा कबंधविगलद्रक्तं पिबंती मुदा सैषा या प्रलये समस्तभुवनं भोक्तुं क्षमा तामसी ॥ शक्तिः सापि परात्परा भगवती नाम्ना परा डाकिनी ध्येया ध्यानपरैः सदा सविनयं भक्तेष्टभूतिप्रदा ॥ ३ ॥ अन्यत्रापि—स्वनाभौ नीरजं ध्यायेदर्द्धं विकसितं सितम् ॥ तत्पद्मकोशमध्ये तु मण्डलं चण्डरोचिषः ॥ १ ॥ जपाकुसुमसंकाशं रक्तबन्धूकसन्निभम् ॥ रजःसत्त्वतमोरेखायोनिमण्डलमण्डितम् ॥ ॥ २ ॥ मध्ये तु तां महादेवीं सूर्य्यकोटिसमप्रभाम् ॥ छिन्नमस्तां करे वामे धारयंतीं स्वमस्तकम् ॥ ३ ॥ प्रसारितमुखीं देवीं लेलिहानाग्रजिह्विकाम् ॥ पिबंतीं रौधिरीं धारां निजकण्ठविनिर्गताम् ॥ ४ ॥ विकीर्णकेशपाशां च नानापुष्पसमन्विताम् ॥ दक्षिणे च करे कर्त्रीं मुण्डमालाविभूषिताम् ॥ ५ ॥ दिगम्बरां महाघोरां प्रत्यालीढपदे स्थिताम् ॥ अस्थिमालाधरां देवीं नागयज्ञोपवीतिनीम् ॥ ॥ ६ ॥ रतिकामोपरिष्ठां च सदा ध्यायंति मंत्रिणः ॥ सदा षोडशवर्षीयां पीनोन्नतपयोधराम् ॥ ७ ॥ विपरीतरतासक्तौ ध्यायेद्रतिमनोभवौ ॥ डाकिनीवर्णिनीयुक्तां वामदक्षिणयोगतः ॥ ८ ॥ देवीगलोच्छलद्रक्तधारापानं प्रकुर्वतीम् ॥ वर्णिनीं लोहितां सौम्यां मुक्तकेशीं दिगम्बराम् ॥ ९ ॥ कपालकर्त्रिकाहस्तां वामदक्षिणयोगतः ॥ नागयज्ञोपवीताढ्यां ज्वलत्तेजोमयीमिव ॥ १० ॥ प्रत्यालीढपदां दिव्यां नानालंकारभूषिताम् ॥ सदा द्वादशवर्षीयामस्थिमालाविभूषिताम् ॥ ११ ॥ डाकिनी वामपार्श्वे तु कल्पसूर्य्यानलो

पमाम् ॥ विद्युज्जटां त्रिनयनां दंतपंक्तिबलाकिनीम् ॥ १२ ॥ दंष्ट्राकरालवदनां पीनोन्नतपयोधराम् ॥ महादेवीं महाघोरां मुक्तकेशीं दिगम्बराम् ॥ १३ ॥ लेलिहानमहाजिह्वां मुण्डमालाविभूषिताम् ॥ कपालकर्त्रिकाहस्तां वामदक्षिणयोगतः ॥ १४ ॥ देवीं गलोच्छलद्रक्तधारापानं प्रकुर्वतीम् ॥ करस्थितकपालेन भीषणेनातिभीषणाम् ॥ आभ्यां निषेवमाणां तां ध्यायेद्देवीं विचक्षणः ॥ ॥ १५ ॥ इति ध्यायेत्¹ ॥ ततः पीठादौ रचिते सर्वतोभद्रमंडले आधारशक्त्यादिपरतत्त्वांतपीठदेवताः संस्थाप्य ' ॐ आं आधारशक्त्यादिपरतत्त्वांतपीठदेवताभ्यो नमः' इति संपूज्याथवा पद्धतिमार्गेण स्वस्वनामभिः पूजयित्वा नव पीठशक्तीः पूजयेत् ॥ पूर्वाद्यष्टसु दिक्षु ॐ जयायै नमः १ । ॐ विजयायै नमः २ । ॐ अजितायै नमः ३ । ॐ अपराजितायै नमः ४ । ॐ नित्यायै नमः ५ । ॐ विलासिन्यै नमः ६ । दोग्ध्र्यै नमः ७ । ॐ अघोरायै नमः ८ । मध्ये ॐ मंगलायै नमः ९ ॥ इति पीठशक्तीः पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संप्रोञ्छ्य 'ॐ सर्वबुद्धिप्रदे वर्णनीये सर्वसिद्धिप्रदे डाकिनीये ॐ वज्रवैरोचनीये एह्येहि नमः ' इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा' ॐ सर्वसिद्धिवर्णनीये सर्वसिद्धिडाकिनीये वज्रवैरोचनीये इहागच्छागच्छ पुनः मंत्रमुच्चार्य इह तिष्ठ इह संन्निधेहि इह सान्निरुध्यस्व' इत्यनेनावाह्य हूंकारबीजेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः सम्पूज्य देव्याज्ञां गृहीत्वा प्रतिलोमक्रमेण² आवरणपूजां कुर्यात् ॥ तथा च पुष्पांजलिमादाय मूलमुच्चार्य–ॐ संविन्मये परे देवि परामृतरसप्रिये ॥ अनुज्ञां छिन्नके देहि परिवारार्चनाय मे ॥ १ ॥ इति पठित्वा पुष्पाञ्जलिं दद्यात् ॥ इत्याज्ञां गृहीत्वा आवरणपूजामारभेत ॥ तथा च–भूपुराद्बहिः पूर्वादिक्रमेण ॐ वं वज्राय नमः १ । ॐ शं शक्तये नमः २ । ॐ दं दंडाय नमः ३ । ॐ खं खड्गाय नमः ४ । ॐ पां पाशाय नमः ५ ।

---

१ ध्यानस्यावश्यकत्वमाह–प्रचण्डचण्डिकामेवमध्यात्वा यस्तु पूजयेत् ॥ सद्यस्तस्य शिरश्छित्त्वा देवी पिबति शोणितम् ॥ १ ॥ २–"बाह्यावरणमारभ्य पूजयेत्प्रतिलोमतः' इति मन्त्रमहोदधौ ॥


ॐ अं अंकुशाय नमः ६। ॐ गं गदायै नमः ७। ॐ त्रिं त्रिशूलाय नमः ८। इन्द्रेशानयोर्मध्ये ॐ पं पद्माय नमः ९। वरुणनिर्ऋति मध्ये ॐ चं चक्राय नमः १०॥ इत्यस्त्राणि पूजयेत् ॥ ततः पुष्पाञ्जलिमादाय मूलमुच्चार्य–ॐ अभीष्टसिद्धिं मे देहि शरणागत वत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पाञ्जलिं च दत्त्वा विशेषार्घ्याद्बिन्दुं निक्षिप्य पूजिता स्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ तत्समीपे ॐ लं इन्द्राय नमः १। ॐ रं अग्नये नमः २। ॐ मं यमाय नमः ३। ॐ क्षं निर्ऋतये नमः ४। ॐ वं वरुणाय नमः ५। ॐ यं वायवे नमः ६। ॐ कुं कुबेराय नमः ७। ॐ हं ईशानाय नमः ८। ॐ आं ब्रह्मणे नमः ९। ॐ ह्रीं अनंताय नमः १०॥ इति दश दिग्पालान् पूजयित्वा पुष्पाञ्जलिं दद्यात् ॥ इति द्वितीयावरणम् ॥ ॥ २ ॥ ततो भूपुराभ्यंतरे चतुर्दिक्षु पूर्वादिक्रमेण ॐ करालाय नमः। करालश्रीपादुकां पूजयामि तर्पयामि नमः। इति सर्वत्र १। ॐ विकरालाय नमः। विकरालश्रीपा० २। ॐ अतिकरालाय नमः। अतिकरालश्रीपा० ३। ॐ महाकालाय नमः। महाकाल श्रीपा० ४ ॥ इति द्वारपालान् संपूज्य पुष्पांजलिं दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततोऽष्टदलेषु पूज्यपूजकयोरंतरालं प्राची तद नुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण ॐ एकलिंगायै नमः। एकलिंगाश्रीपा० १। ॐ योगिन्यै नमः। योगिनी श्रीपा० २। ॐ डाकिन्यै नमः। डाकिनीश्रीपा० ३। भैरव्यै नमः। भैरवीश्रीपा० ४। ॐ महाभैरव्यै नमः। महाभैरवी श्रीपा० ५। ॐ इन्द्राक्ष्यै नमः। इन्द्राक्षीश्रीपा० ६। ॐ असितांग्यै नमः। असितांगीश्रीपा० ७। ॐ संहारिण्यै नमः। संहारिणीश्रीपा० ८॥ इत्यष्टौ शक्तीः पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति चतुर्थावरणम् ॥ ४ ॥ ततः षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च ॐ आं खड्गाय हृदयाय नमः स्वाहा हृदयश्रीपा० १। ॐ ईं सुखड्गाय शिरसे स्वाहा शिरःश्रीपा० २। ॐ ऊं वज्राय शिखायै वषट् स्वाहा शिखाश्रीपा० ३। ॐ ऐं पाशाय कवचाय हुं स्वाहा कवचश्रीपा० ४। ॐ औं अंकशाय नेत्रत्रयाय वौषट् स्वाहा नेत्रत्रयश्रीपा० ५। ॐ अः वसु रक्ष रक्ष ह्रीं ह्रीं अस्त्राय फट् स्वाहा अस्त्रश्रीपा० ६ ॥


इति हृदयादिषडंगानि संपूज्य पुष्पांजलिं दद्यात् ॥ इति पंचमावरणम् ॥ ५ ॥ ततस्त्रिकोणेषु ॐ ऐं छिन्नमस्तायै नमः छिन्नमस्ताश्रीपा० १ । देवीदक्षिणतः ॐ ऐं डाकिन्यै नमः । डाकिनीश्रीपा० २ । देवीवामे ॐ ऐं वर्णिन्यै नमः । वर्णिनीश्रीपा० ३ ॥ इति पूजयेत् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य "ॐ सर्वसिद्धिप्रदे वर्णिनीये सर्वसिद्धिप्रदे डाकिनीये वज्रवैरोचनीये एह्येहि इमं बलिं गृह्ण २ मम सिद्धिं देहि ह्रीं फट् स्वाहा" इति मंत्रेण [1]मत्स्यमांसादिकैस्तु बलिं दत्त्वा अर्द्धरात्रे बलिं निवेद्य जपं कुर्यात् ॥ अस्य पुरश्चरणं चतुर्लक्षजपः । पलाशबिल्वपुष्पैः फलैर्वा दशांशतो होमः । तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्यात् ॥ एवं कृते मंत्रः सिद्धो भवति । सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च—ध्यात्वैवं प्रजपेल्लक्षचतुष्कं तद्दशांशतः ॥ पलाशैर्बिल्वजैर्वापि जुहुयात्कुसुमैः फलैः ॥ १ ॥ एवं पूजादिभिः सिद्धे मंत्रे मंत्री मनोरथान् ॥ प्राप्नुयान्निखिलान्सद्यो दुर्लभांस्तत्प्रसादतः ॥ २ ॥ श्रीपुष्पैर्लभते लक्ष्मीं तत्फलैः स्वसमीहितम् ॥ वाक्सिद्धिं मालतीपुष्पैश्चंपकैर्हवनात्सुखम् ॥ ३ ॥ घृताक्तं छागमांसं यो जुहुयात् प्रत्यहं शतम् ॥ मासमेकं तु वशगास्तस्य स्युः सर्वपार्थिवाः ॥ ४ ॥ करवीरस्य कुसुमैः श्वेतैर्लक्षं जुहोति यः ॥ रोगजालं पराभूय सुखी जीवेच्छतं समाः ॥ ५ ॥ रक्तैस्तत्संख्यया हुत्वा वशयेन्मंत्रिणो नृपान् ॥ फलैर्हुत्वाप्नुयाल्लक्ष्मीमुदुंबरपलाशजैः ॥ ६ ॥ गोमायुमांसैस्तामेव कवितां पायसांधसा ॥ बंधूककुसुमैर्भाग्यं कार्णिकारैः समीहितम् ॥ ७ ॥ तिलतंडुलहोमेन वशयेन्निखिलाञ्जनान् ॥ नारीरजोभिराकृष्टिर्मृगमांसैः समीहितम् ॥ ८ ॥ स्तंभनं माहिषैर्मांसैः पंकजैः सघृतैरपि ॥ चिताग्नौ [2]परभृत्पक्षैर्जुहुयादरिमृत्यवे ॥ ९ ॥ [3]उन्मत्तकाष्ठदीप्ताग्नौ तत्फलं वायसच्छदैः ॥ द्यूते वने नृपद्वारे समरे वैरिसंकटे ॥ १० ॥ विजयं लभते मंत्री ध्यायन्देवीं जपन्मनुम् ॥ भुक्तौ मुक्तौ सितां ध्यायेदुच्चारे नीलरोचिषम् ॥ ११ ॥ रक्तां वश्ये मृतौ धूम्रां स्तंभने कनक

---

१ रात्रौ बलिः प्रदातव्यो मत्स्यमांससुरादिभिः ॥ अथवा मधुपानाद्यंमधुरावभवक्रमः ॥ २ परभृत्कोकिलः । ३ उन्मत्तो धत्तूरः तत्काष्ठज्वलितेऽग्नौ काकपक्षैर्होमात्फलमरिमृत्युरेव स्यात् ।

छिन्नमस्तापूजनयन्त्रम् ।





॥४९१॥

प्रभाम् ॥ निशि दद्याद्बलिं तस्यै सिद्धये मदिरादिना ॥ १२ ॥ गोपनीयः प्रयोगोऽथ प्रोच्यते सर्वसिद्धिदः ॥ भूताहे कृष्णपक्षस्य मध्यरात्रे तमोघने ॥ १३ ॥ स्नात्वा रक्तांबरधरो रक्तमाल्यानुलेपनः ॥ आनीय पूजयेन्नारीं छिन्नमस्तास्वरूपिणीम् ॥ १४ ॥ सुंदरीं यौवनाक्रांतां नरपंचकगामिनीम् ॥ सस्मितां मुक्तकबरीं भूषादानप्रतोषिताम् ॥ १५ ॥ विवस्त्रां पूजयित्वैनामयुतं प्रजपेन्मनुम् ॥ बलिं दत्त्वा निशां नीत्वा संप्रेष्य धनतोषिताम् ॥ १६ ॥ भोजयेद्विविधैरन्नैर्ब्राह्मणान्देवताधिया ॥ अनेन विधिना लक्ष्मीं पुत्रान्पौत्रान्यशः सुखम् ॥ १७ ॥ नारीमायुश्चिरं धर्म्ममिष्टमन्यदवाप्नुयात् ॥ तस्यां रात्रौ व्रतं कार्य्यं विद्याकामेन मंत्रिणा ॥ १८ ॥ मनोरथेषु चान्येषु गच्छेत्तां प्रजपन्मनुम् ॥ किं बहूक्तेन विद्याया अस्या विज्ञानमात्रतः ॥ १९ ॥ शास्त्रज्ञानं पापनाशः सर्वसौख्यं भवेद् ध्रुवम् ॥ उषस्युत्थाय शय्यायामुपविष्टो जपेच्छतम् ॥ २० ॥ षण्मासाभ्यंतरे मंत्री कवित्वेन जयेत् कविम् ॥ शिवेन कीलिता विद्या तदुत्कीलनमुच्यते ॥ २१ ॥ मायां तारपुटां मंत्री जप्यादष्टोत्तरं शतम् ॥ मंत्रस्यादौ तथैवांते भवेत्सिद्धिप्रदा तु सा ॥ २२ ॥ एष नूनं विधिर्गोप्यः सिद्धिकामेन मंत्रिणा ॥ उदिता छिन्नमस्तेयं कलौ शीघ्रमभीष्टदा ॥ २३ ॥ इति सप्तदशाक्षरीछिन्नमस्तामंत्रप्रयोगः ॥

॥ श्रीगणेशाय नमः ॥ अथ छिन्नमस्ताकवचप्रारंभः ॥ देव्युवाच ॥ कथिताश्छिन्नमस्ताया या या विद्याः सुगोपिताः ॥ त्वया नाथेन जीवेश श्रुताश्चाधिगता मया ॥ १ ॥ इदानीं श्रोतुमिच्छामि कवचं सर्वसूचितम् ॥ त्रैलोक्यविजयं नाम कृपया कथ्यतां प्रभो ॥ २ ॥ भैरव उवाच ॥ शृणु वक्ष्यामि देवेशि सर्वदेवनमस्कृते ॥ त्रैलोक्यविजयं नाम कवचं सर्वमोहनम् ॥ ३ ॥ सर्वविद्यामयं साक्षात्सुरासुरजयप्रदम् ॥ धारणात्पठनादीशस्त्रैलोक्यविजयी विभुः ॥ ४ ॥ ब्रह्मा नारायणो रुद्रो धारणात्पठनाद्यतः ॥ कर्ता पाता च संहर्ता भुवनानां सुरेश्वरि ॥ ५ ॥ न देयं परशिष्येभ्योऽभक्तेभ्योऽपि विशेषतः ॥ देयं शिष्याय भक्ताय प्राणेभ्योऽप्यधिकाय च ॥ ६ ॥ देव्याश्च छिन्नमस्तायाः कवचस्य च भैरवः ॥ ऋषिस्तु स्याद्विराट् छंदो देवता च्छिन्नमस्तका ॥ ७॥ त्रैलोक्यविजये मुक्तौ विनियोगः प्रकीर्तितः ॥ हुंकारो मे शिरः पातु छिन्नमस्ता बलप्रदा ॥ ८ ॥ ह्रां ह्रूं ऐं त्र्यक्षरी पातु भालं वक्त्रं दिगंबरा ॥ श्रीं ह्रीं ह्रूं ऐं दृशौ पातु मुंडं कर्त्रि

धरापि सा ॥ ९ ॥ सा विद्या प्रणवाद्यंता श्रुतियुग्मं सदाऽवतु ॥ वज्रवैरोचनीये हुं फट् स्वाहा च भुवादिका ॥ १० ॥ प्राणं पातु च्छिन्न
मस्ता मुंडकर्त्रिविधारिणी ॥ श्रीमायाकूर्चवाग्बीजैर्वज्रवैरोचनीयहूं ॥ ११ ॥ हूं फट्स्वाहा महाविद्या षोडशी ब्रह्मरूपिणी ॥ स्वपार्श्वे
वर्णिनी चासृग्धारां पाययती मुदा ॥ १२ ॥ वदनं सर्वदा पातु च्छिन्नमस्ता स्वशक्तिका ॥ मुंडकर्त्रिधरा रक्ता साधकाभीष्टदायिनी ॥
॥ १३ ॥ वर्णिनी डाकिनीयुक्ता सापि मामभितोऽवतु ॥ रमाद्या पातु जिह्वां च लज्जाद्या पातु कंठकम् ॥ १४ ॥ कूर्चाद्या हृदयं
पातु वागाद्या स्तनयुग्मकम् ॥ रमया पुटिता विद्या पार्श्वौ पातु सुरेश्वरी ॥ १५ ॥ मायया पुटिता पातु नाभिदेशे दिगंबरा ॥ कूर्चेण
पुटिता देवी पृष्ठदेशे सदावतु ॥ १६ ॥ वाग्बीजपुटिता चैषा मध्यं पातु सशक्तिका ॥ ईश्वरी कूर्चवाग्बीजैर्वज्रवैरोचनीयहूं ॥ १७ ॥
हूंफट्स्वाहा महाविद्या कोटिसूर्य्यसमप्रभा ॥ छिन्नमस्ता सदा पायादुरुयुग्मं सशक्तिका ॥ १८ ॥ ह्रींहूंवर्णिनी जानुं श्रीं ह्रीं च
डाकिनी पदम् ॥ सर्वविद्यास्थिता नित्या सर्वांगं मे सदावतु ॥ १९ ॥ प्राच्यां पायादेकलिंगा योगिनी पावकेऽवतु ॥ डाकिनी दक्षिणे
पातु श्रीमहाभैरवी च माम् ॥ २० ॥ नैर्ऋत्यां सततं पातु भैरवी पश्चिमेऽवतु ॥ इन्द्राक्षी पातु वायव्येऽसितांगो पातु चोत्तरे ॥ २१ ॥
संहारिणी सदा पातु शिवकोणे सकर्त्रिका ॥ इत्यष्ट शक्तयः पांतु दिग्विदिक्षु सकर्त्रिकाः ॥ २२ ॥ क्रीं क्रीं क्रीं पातु सा पूर्वं ह्रीं ह्रीं
मां पातु पावके ॥ हूं हूं मां दक्षिणे पातु दक्षिणे कालिकावतु ॥ २३ ॥ क्रीं क्रीं क्रीं चैव नैर्ऋत्यां ह्रीं ह्रीं च पश्चिमेऽवतु ॥ हूं हूं पातु
मरुत्कोणे स्वाहा पातु सदोत्तरे ॥ २४ ॥ महाकाली खड्गहस्ता रक्षःकोणे सदावतु ॥ तारो माया वधूः कूर्चं फट्कारोऽयं महामनुः ॥
॥ २५ ॥ खड्गकर्त्रिधरा तारा चोर्द्ध्वदेशं सदावतु ॥ ह्रीं स्त्रीं हूं फट् च पाताले मां पातु चैकजटा सती ॥ तारा तु सहिता खेऽव्यान्महा
नीलसरस्वती ॥ २६ ॥ इति ते कथितं देव्याः कवचं मंत्रविग्रहम् ॥ यद्धृत्वा पठनाद्भीमः क्रोधाख्यो भैरवः स्मृतः ॥ २७ ॥ सुरासुर
मुनींद्राणां कर्ता हर्ता भवेत्स्वयम् ॥ यस्याज्ञया मधुमती याति सा साधकालयम् ॥ २८ ॥ भूतिन्याद्याश्च डाकिन्यो यक्षिण्याद्याश्च
खेचराः ॥ आज्ञां गृह्णंति तास्तस्य कवचस्य प्रसादतः ॥ २९ ॥ एतदेव परं ब्रह्मकवचं मन्मुखोदितम् ॥ देवीमभ्यर्च्य गंधाद्यैर्मूले

नैव पठेत्सकृत् ॥ ३० ॥ संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात् ॥ भूर्जे विलिखितं चैतद्गुटिकां कांचनस्थिताम् ॥ ३१ ॥ धारयेद्दक्षिणे बाहौ कंठे वा यदि वान्यतः ॥ सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यं वशमानयेत् ॥ ३२ ॥ तस्य गेहे वसेल्लक्ष्मीर्वाणी च वदनांबुजे ॥ ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रे यांति सौम्यताम् ॥ ३३ ॥ इदं कवचमज्ञात्वा यो भजेच्छिन्नमस्तकाम् ॥ सोऽपि शस्त्रप्रहारेण मृत्युमाप्नोति सत्वरम् ॥ ३४ ॥ इति भैरवतंत्रे भैरवभैरवीसंवादे त्रैलोक्यविजयं नाम छिन्नमस्ताकवचं समाप्तम् ॥ अथ छिन्नमस्तास्तोत्रप्रारंभः॥ (नाभौ शुभ्रारविन्दं तदुपरि विलसन्मण्डलं चण्डरश्मेः संसारस्यैकसारां त्रिभुवनजननीं धर्म्मकर्म्मार्थदात्रीम् ॥ तस्मिन्मध्ये त्रिभागे त्रितयतनुधारां छिन्नमस्तां प्रशस्तां तां वन्दे छिन्नमस्तां शमनभयहरां योगिनीं योगमुद्राम् ॥ १ ॥) नाभौ शुभ्रसरोजवक्त्रविलसद्बंधूकपुष्पारुणं भास्वद्भास्करमंडलं तदुदरे तद्योनिचक्रं महत् ॥ तन्मध्ये विपरीतमैथुनरतप्रद्युम्नसत्कामिनीपृष्ठस्थां तरुणार्ककोटिविलसत्तेजःस्वरूपां शिवाम् ॥ १ ॥ वामे छिन्नशिरोधरां तदितरे पाणौ महत्कर्त्रिकां प्रत्यालीढपदां दिगंतवसनामुन्मुक्तकेशव्रजाम् ॥ छिन्नात्मीयशिरःसमुच्छलदसृग्धारां पिबंतीं परां बालादित्यसमप्रकाशविलसन्नेत्रत्रयोद्भासिनीम् ॥ २ ॥ वामादन्यत्र नालं बहुगहनगलद्रक्तधाराभिरुच्चैः पायंतीमस्थिभूषां करकमललसत्कर्त्रिकामुग्ररूपाम् ॥ रक्ताभां रक्तकेशीमपगतवसनां वर्णिनीमात्मशक्तिं प्रत्यालीढोरुपादामरुणितनयनां योगिनीं योनिमुद्राम् ॥ ३ ॥ दिग्वस्त्रां मुक्तकेशीं प्रलयघनघटाघोररूपां प्रचण्डां दंष्ट्रादुष्प्रेक्ष्यवक्त्रोदरविवरलसल्लोलजिह्वाग्रभासाम् ॥ विद्युल्लोलाक्षियुग्मां हृदयतटलसद्भोगिनीमात्ममूर्तिं सद्यश्छिन्नात्मकंठप्रगलितरुधिरैर्डाकिनीं वर्द्धयंतीम् ॥ ४ ॥ ब्रह्मेशानाच्युताद्यैः शिरसि विनिहितां मंदपादारविंदैराज्ञैर्योगीन्द्रमुख्यैः प्रतिपदमनिशं चिंतितां चिंत्यरूपाम् ॥ संसारे सारभूतां त्रिभुवनजननीं छिन्नमस्तां प्रशस्तामिष्टां तामिष्टदात्रीं कलिकलुषहरां चेतसा चिंतयामि ॥ ५ ॥ उत्पत्तिस्थितिसंहृतीर्घटयितुं धत्ते त्रिरूपां तनुं त्रैगुण्याजगतो यदीयविकृतिर्ब्रह्माच्युतः शूलभृत् ॥ तामाद्यां प्रकृतिं स्मरामि मनसा सर्वार्थसंसिद्धये यस्याः स्मेरपदारविंदयुगले लाभं भजंतेऽमराः ॥ ६ ॥ अभिलषितपरस्त्रीयोगपूजापरोऽहं बहुविधजनभावारंभसंभावितोऽहम् ॥

पशुजनविमुखोऽहं भैरवीसंयुतोऽहं गुरुचरणपरोऽहं भैरवोऽहं शिवोऽहम् ॥ ७ ॥ इदं स्तोत्रं महापुण्यं ब्रह्मणा भाषितं पुरा ॥ सर्व
सिद्धिप्रदं साक्षान्महापातकनाशनम् ॥ ८ ॥ यः पठेत्प्रातरुत्थाय देव्याः सन्निहितो भवेत् ॥ तस्य सिद्धिर्भवेद्देवि वांछितार्थप्रदा
यिनी ॥ ९ ॥ धनं धान्यं सुतान् जायां हयं हस्तिनमेव च ॥ वसुंधरां महाविद्यामष्टसिद्धीर्लभेद्ध्रुवम् ॥ १० ॥ वैयाघ्राजिन
रंजितस्य जघने रम्ये प्रलंबोदरे खर्वानिर्वचनीयसर्वसुभगे मुंडावलीमंडिते ॥ कर्त्रीं कुंदरुचिं विचित्रकलितां ज्ञाने दधाने पदे
मातर्भक्तजनानुकंपिनि महामायेऽस्तु तुभ्यं नमः ॥ ११ ॥ इति श्रीब्रह्मविरचितं प्रचंडचंडिकास्तोत्रं समाप्तम् ॥ अथ प्रचंड
चंडिका-(छिन्नमस्ता) स्तोत्रप्रारंभः ॥ आनंदयित्रि परमेश्वरि वेदगर्भे मातः पुरंदरपुरांतरलब्धनेत्रे ॥ लक्ष्मीमशेषजगतां
परिभावयंतः सन्तो भजंति भवतीं धनदेशलब्ध्यै ॥ १ ॥ लज्जानुगां विमलविद्रुमकांतिकान्तां कान्तानुरागरसिकाः परमेश्वरि त्वाम् ॥
ये भावयन्ति मनसा मनुजास्त एते सीमन्तिनीभिरनिशं परिभाव्यमानाः ॥ २ ॥ मायामयीं निखिलपातककोटिकूटविद्राविणीं भृश
मसंशयिनो भजन्ति ॥ त्वां पद्मसुंदरतनुं तरुणारुणास्यां पाशांकुशाभयवराद्यकरां वरास्त्रैः ॥ ३ ॥ ते तर्ककर्कशधियः श्रुतिशास्त्र
शिल्पैश्छंदोऽभिशोभितमुखाः सकलागमज्ञाः॥ सर्वज्ञलब्धविभवाः कुमुदेन्दुवर्णां ये वाग्भवे च भवतीं परिभावयंति ॥४॥ वज्रप्रणुन्नहृदया
समयद्रुहस्ते वैरोचने मदनमंदिरगास्यमातः ॥ मायाद्वयानुगतविग्रहभूषिताऽसि दिव्यास्त्रवह्निवनितानुगताऽसि धन्ये ॥ ५ ॥ वृत्तत्रयाष्ट
दलवह्निपुरःसरस्य मार्तण्डमंडलगतां परिभावयन्ति ॥ ये वह्निकूटसदृशीं मणिपूरकान्तस्ते कालकंटकविडंबनचंचवः स्युः ॥ ६ ॥
कालागुरुभ्रमरचंदनकुंडगोलखंडैरनंगमदनोद्भवमादनीभिः ॥ सिंदूरकुंकुमपटीरहिमैर्विधाय सन्मंडलं तदुपरीह यजेन्मृडानीम् ॥ ७ ॥
चंचत्तडिन्मिहिरकोटिकरां विचेलामुद्यत्कबंधरुधिरां द्विभुजां त्रिनेत्राम् ॥ वामे विकीर्णकचशीर्षकरे परे तामीडे परं परमकर्त्रिकया समेताम् ॥
॥ ८ ॥ कामेश्वरांगनिलयां कलया सुधांशोर्विभ्राजमानहृदयामपरे स्मरंति ॥ सुप्ताहिराजसदृशीं परमेश्वरस्थां त्वामाद्रिराजतनये च
समानमानाः ॥ ९ ॥ लिंगत्रयोपरिगतामपि वह्निचक्रपीठानुगां सरसिजासनसन्निविष्टाम् ॥ सुप्तां प्रबोध्य भवतीं मनुजा गुरूक्तहूंकार

वायुवशिभिर्मनसा भजन्ति ॥ १० ॥ शुभ्रासि शान्तिककथासु तथैव पीता स्तम्भे रिपोरथ च शुभ्रतरासि मातः ॥ उच्चाटनेऽप्यसितकर्म सुकर्म्मणि त्वं संसेव्यसे स्फटिककांतिरनन्तचारे ॥ ११ ॥ त्वामुत्पलैर्मधुयुतैर्मधुनोपनीतैर्गव्यैः पयोविलुलितैः शतमेव कुंडे ॥ साज्यैश्च तोषयति यः पुरुषास्त्रिसंध्यं षण्मासतो भवति शक्रसमो हि भूमौ ॥ १२ ॥ जाग्रत्स्वपन्नपि शिवे तव मंत्रराजमेवं विचिंतयति यो मनसा विधिज्ञः ॥ संसारसागरसमुद्धरणे वहित्रं चित्रं न भूतजननेऽपि जगत्सु पुंसः ॥ १३ ॥ इयं विद्या वंद्या हरिहरविरंचिप्रभृतिभिः पुरारातेरन्तःपुरमिदमगम्यं पशुजनैः ॥ सुधामंदानंदैः पशुपतिसमानव्यसनिभिः सुधासेव्यैः सद्भिर्गुरुचरणसंसारचतुरैः ॥ १४ ॥ कुंडे वा मंडले वा शुचिरथ मनुना भावयत्येव मंत्री संस्थाप्योच्चैर्जुहोति प्रसवसुफलदैः पद्मपालाशकानाम् ॥ हैमं क्षीरैस्तिलैर्वा समधुककुसुमैर्मालतीबंधुजातीश्वेतैरब्धंसकानामपि वरसमिधा संपदे सर्वसिद्ध्यै ॥ १५ ॥ अंधः साज्यं समांसं दधियुतमथवा योऽन्वहं यामिनीनां मध्ये देव्यै ददाति प्रभवति गृहगा श्रीरमुष्यावखंडा ॥ आज्यं मांसं सरक्तं तिलयुतमथवा तंडुलं पायसं वा हुत्वा मांसं त्रिसंध्यं स भवति मनुजो भूतिभिर्भूतनाथः ॥ १६ ॥ इदं देव्याः स्तोत्रं पठति मनुजो यस्त्रिसमयं शुचिर्भूत्वा विश्वे भवति धनदो वासवसमः ॥ वशा भूपाः कांता निखिलरिपुहन्तुः सुरगणा भवंत्युच्चैर्वाचो यदिह ननु मासैस्त्रिभिरपि ॥ १७ ॥ इति श्रीशंकराचार्यविरचितः प्रचंडचंडिकास्तवराजः समाप्तः ॥ अथ छिन्नमस्ताष्टोत्तरशतनामस्तोत्रप्रारंभः ॥ श्रीपार्वत्युवाच ॥ नाम्नां सहस्रं परमं छिन्नमस्ताप्रियं शुभम् ॥ कथितं भवता शंभो सद्यः शत्रुनिकृन्तनम् ॥१॥ पुनः पृच्छाम्यहं देव कृपां कुरु ममोपरि ॥ सहस्रनामपठने ह्यशक्तो यः पुमान् भवेत् ॥२॥ तेन किं पठ्यते नाथ तन्मे ब्रूहि कृपामय ॥ श्रीसदाशिव उवाच ॥ अष्टोत्तरशतं नाम्नां पठ्यते तेन सर्वदा ॥३॥ सहस्रनामपाठस्य फलं प्राप्नोति निश्चितम् ॥ॐ अस्य श्रीच्छिन्नमस्ताष्टोत्तरशतनामस्तोत्रमंस्य सदाशिव ऋषिः।अनुष्टुप्छंदः। श्रीच्छिन्नमस्ता देवता । मम सकलसिद्धिप्राप्तये पाठे विनियोगः ॥ ॐ छिन्नमस्ता महाविद्या महाभीमा महोदरी ॥ चण्डेश्वरी चण्डमाता चण्डमुण्डप्रभंजिनी ॥ ४ ॥

१ चिन्त्योऽयं पाठः ।

महाचण्डा चण्डरूपा चण्डिका चण्डखण्डिनी ॥ क्रोधिनी क्रोधजननी क्रोधरूपा कुहूः कला ॥ ५ ॥ कोपातुरा कोपयुता कोप संहारकारिणी ॥ वज्रवैरोचनी वज्रा वज्रकल्पा च डाकिनी ॥ ६ ॥ डाकिनीकर्मनिरता डाकिनीकर्मपूजिता ॥ डाकिनीसङ्गनिरता डाकिनीप्रेमपूरिता ॥ ७ ॥ खट्वाङ्गधारिणी खर्वा खड्गखर्प्परधारिणी ॥ प्रेतासना प्रेतयुता प्रेतसङ्गविहारिणी ॥ ८ ॥ छिन्नमुण्ड धरा छिन्नचण्डविद्या च चित्रिणी ॥ घोररूपा घोरदृष्टिर्घोररावा घनोदरी ॥ ९ ॥ योगिनी योगनिरता जपयज्ञपरायणा ॥ योनिचक्र मयी योनिर्योनिचक्रप्रवर्तिनी ॥ १० ॥ योनिमुद्रा योनिगम्या योनियंत्रनिवासिनी ॥ यंत्ररूपा यंत्रमयी यंत्रेशी यंत्रपूजिता ॥ ॥ ११ ॥ कीर्त्या कपर्दिनी काली कङ्काली कलविकारणी ॥ आरक्ता रक्तनयना रक्तपानपरायणा ॥ १२ ॥ भवानी भूतिदा भूति र्भूतिदात्री च भैरवी ॥ भैरवाचारनिरता भूतभैरवसेविता ॥ १३ ॥ भीमा भीमेश्वरी देवी भीमनादपरायणा ॥ भवाराध्या भवनुता भवसागरतारिणी ॥ १४ ॥ भद्रकाली भद्रतनुर्भद्ररूपा च भद्रिका ॥ भद्ररूपा महाभद्रा सुभद्रा भद्रपालिनी ॥ १५ ॥ सुभव्या भव्यवदना सुमुखी सिद्धसेविता ॥ सिद्धिदा सिद्धिनिवहा सिद्धा सिद्धनिषेविता ॥ १६ ॥ शुद्धदा सुभगा शुद्धा शुद्धसत्त्वा शुभावहा ॥ श्रेष्ठा दृष्टिमयी देवी दृष्टिसंहारकारिणी ॥ १७ ॥ शर्वाणी सर्वगा सर्वा सर्वमङ्गलकारिणी ॥ शिवा शांता शांतिरूपा मृडानी मदना तुरा ॥ १८ ॥ इति ते कथितं देवि स्तोत्रं परमदुर्लभम् ॥ गुह्याद्गुह्यतरं गोप्यं गोपनीयं प्रयत्नतः ॥ १९ ॥ किमत्र बहुनोक्तेन त्वदग्रे प्राणवल्लभे ॥ मारणं मोहनं देवि ह्युच्चाटनमतः परम् ॥२० ॥ स्तंभनादिककर्माणि ऋद्धयः सिद्धयोऽपि च ॥ त्रिकालपठनादस्य सर्वे सिद्ध्यंत्यसंशयम् ॥ २१ ॥ महोत्तमं स्तोत्रमिदं वरानने मयेरितं नित्यमनन्यबुद्धयः ॥ पठंति ये भक्तियुता नरोत्तमा भवेन्न तेषां रिपुभिः पराजयः ॥ २२ ॥ इति श्रीच्छिन्नमस्ताष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥ अथ छिन्नामस्तासहस्रनामस्तोत्रप्रारंभः। श्रीदेव्युवाच ॥ देवदेव महादेव सर्वशास्त्रविदांवर ॥ कृपां कुरु जगन्नाथ कथयस्व मम प्रभो ॥ १ ॥ प्रचण्डचण्डिका देवी सर्वलोके हितैषिणी ॥ तस्याश्च कथितं सर्वं स्तवं च कवचादिकम् ॥ २ ॥ इदानीं छिन्नमस्ताया नाम्नां साहस्रकं शुभम् ॥ त्वं प्रकाशय मे देव

कृपया भक्तवत्सल ॥ ३ ॥ श्रीशिव उवाच ॥ शृणु देवि प्रवक्ष्यामि च्छिन्नायाः सुमनोहरम् ॥ गोपनीयं प्रयत्नेन यदीच्छेदात्मनो हितम् ॥ ४ ॥ न वक्तव्यं च कुत्रापि प्राणैः कण्ठगतैरपि ॥ तच्छृणुष्व महेशानि सर्वं तत्कथयामि ते ॥ ५ ॥ विना पूजां विना ध्यानं विना जाप्येन सिद्ध्यति ॥ विना ध्यानं तथा देवि विना भूतादिशोधनम् ॥ ६ ॥ पठनादेव सिद्धिः स्यात्सत्यं सत्यं वरानने ॥ पुरा कैलासशिखरे सर्वदेवसभालये ॥ ७ ॥ परिपप्रच्छ कथितं तथा शृणु वरानने ॥ ८ ॥ ॐ अस्य श्रीप्रचण्डचण्डिकासहस्र नामस्तोत्रस्य भैरव ऋषिः। सम्राट् छंदः। प्रचचण्डाण्डिका देवता। धर्म्मार्थकाममोक्षार्थे पाठे विनियोगः॥ॐ प्रचण्डचण्डिका चण्डा चण्ड देव्यविनाशिनी ॥ चामुण्डा च सुचण्डा च चपला चारुदेहिनी ॥ ९ ॥ ललजिह्वा चलद्रक्ता चारुचन्द्रनिभानना ॥ चकोराक्षी चण्डनादा चञ्चला च मनोन्मदा ॥ १० ॥ चेतना चितिसंस्था च चित्कला ज्ञानरूपिणी ॥ महाभयंकरी देवी वरदाभयधारिणी ॥ ११ ॥ भवाढ्या भवरूपा च भवबंधविमोचिनी ॥ भवानी भुवनेशी च भवसंसारतारिणी ॥ १२ ॥ भवाब्धिर्भवमोक्षा च भवबंधविघातिनी ॥ भागीरथी भगस्था च भाग्यभोग्यप्रदायिनी ॥ १३ ॥ कमला कामदा दुर्गा दुर्गबंधविमोचिनी ॥ दुर्द्दर्शना दुर्गरूपा दुर्ज्ञेया दुर्गनाशिनी ॥ १४ ॥ दीनदुःखहरा नित्या नित्यशोकविनाशिनी ॥ नित्यानन्दमया देवी नित्यं कल्याणकारिणी ॥ १५ ॥ सर्वार्थसाधनकरी सर्वसिद्धिस्वरूपिणी ॥ सर्वक्षोभणशक्तिश्च सर्वविद्राविणी परा ॥ १६ ॥ सर्वरञ्जनशक्तिश्च सर्वोन्मादस्वरूपिणी ॥ सर्वज्ञा सिद्धिदात्री च सिद्धविद्यास्वरूपिणी ॥ १७ ॥ सकला निष्कला सिद्धा कलातीता कलामयी ॥ कुलज्ञा कुलरूपा च चक्षुरानन्ददायिनी ॥ १८ ॥ कुलीना सामरूपा च कामरूपा मनोहरा ॥ कमलस्था कञ्जमुखी कुञ्जरेश्वर गामिनी ॥ १९ ॥ कुलरूपा कोटराक्षी कमलैश्वर्य्यदायिनी ॥ कुंती ककुद्मिनी कुल्ला कुरुकुल्ला करालिका ॥ २० ॥ कामेश्वरी काममाता कामतापविमोचिनी ॥ कामरूपा कामसत्त्वा कामकौतुककारिणी ॥ २१ ॥ कारुण्यहृदया क्रींक्रींमंत्ररूपा च कोटरा ॥ कौमोदकी कुमुदिनी कैवल्या कुलवासिनी ॥ २२ ॥ केशवी केशवाराध्या केशिदैत्यनिषूदिनी ॥ क्लेशहा क्लेशरहिता क्लेशसंघविना

शिनी ॥ २३ ॥ कराली च करालास्या करालासुरनाशिनी ॥ करालचर्मासिधरा करालकलनाशिनी ॥ २४ ॥ कंकिनी कंकनिरता कपालवरधारिणी ॥ खड्गहस्ता त्रिनेत्रा च खण्डमुण्डासिधारिणी ॥ २५ ॥ खलहा खलहंत्री च क्षरंती खगता सदा ॥ गङ्गा गौतमपूज्या च गौरी गंधर्ववासिनी ॥ २६ ॥ गंधर्वा गगणाराध्या गणा गंधर्वसेविता ॥ गणत्कारगणा देवी निर्गुणा च गुणात्मिका ॥ ॥ २७ ॥ गुणता गुणदात्री च गुणगौरवदायिनी ॥ गणेशमाता गम्भीरा गगणा ज्योतिकारिणी ॥ २८ ॥ गौराङ्गी च गया गम्या गौतमस्थानवासिनी ॥ गदाधरप्रिया ज्ञेया ज्ञानगम्या गुहेश्वरी ॥ २९ ॥ गायत्री च गुणवती गुणातीता गुणेश्वरी ॥ गणेशजननी देवी गणेशवरदायिनी ॥ ३० ॥ गणाध्यक्षनुता नित्या गणाध्यक्षप्रपूजिता ॥ गिरीशरमणी देवी गिरीशपरिवन्दिता ॥ ३१ ॥ गतिदा गतिहा गीता गौतमी गुरुसेविता ॥ गुरुपूज्या गुरुयुता गुरुसेवनतत्परा ॥ ३२ ॥ गंधद्वारा च गंधाढ्या गंधात्मा गंधकारिणी ॥ गीर्वाणपतिसम्पूज्या गीर्वाणपतितुष्टिदा ॥ ३३ ॥ गीर्वाणाधीशरमणी गीर्वाणाधीशवन्दिता ॥ गीर्वाणाधीशसंसेव्या गीर्वाणाधीश हर्षदा ॥ ३४ ॥ गानशक्तिर्गानगम्या गानशक्तिप्रदायिनी ॥ गानविद्या गानसिद्धा गानसंतुष्टमानसा ॥ ३५ ॥ गानातीता गान गीता गानहर्षप्रपूरिता ॥ गंधर्वपतिसंहृष्टा गंधर्वगुणमण्डिता ॥ ३६ ॥ गंधर्वगणसंसेव्या गंधर्वगणमध्यगा ॥ गंधर्वगणकुशला गंधर्व गणपूजिता ॥ ३७ ॥ गंधर्वगणनिरता गंधर्वगणभूषिता ॥ घर्घरा घोररूपा च घोरघुर्घुरनादिनी ॥ ३८ ॥ घर्मबिन्दुसमुद्भूता घर्म बिन्दुस्वरूपिणी ॥ घंटारवा घनरवा घनरूपा घनोदरी ॥ ३९ ॥ घोरसत्त्वा च घनदा घण्टानादविनोदनी ॥ घोरचाण्डालिनी घोरा घोरचण्डविनाशिनी ॥ ४० ॥ घोरदानवदमनी घोरदानवनाशिनी ॥ घोरकर्मादिरहिता घोरकर्म्मनिषेविता ॥ ४१ ॥ घोर तत्त्वमयी देवी घोरतत्त्वविमोचनी ॥ घोरकर्मादिरहिता घोरकर्मादिपूरिता ॥ ४२ ॥ घोरकर्मादिनिरता घोरकर्मप्रवर्द्धिनी ॥ घोरभूतप्रमथिनी घोरवेतालनाशिनी ॥ ४३ ॥ घोरदावाग्निदमनी घोरशत्रुनिषूदिनी ॥ घोरमंत्रयुता चैव घोरमंत्रप्रपूजिता ॥ ४४ ॥ घोरमंत्रमनोभिज्ञा घोरमंत्रफलप्रदा ॥ घोरमंत्रनिधिश्चैव घोरमंत्रकृतास्पदा ॥ ४५ ॥ घोरमंत्रेश्वरी देवी घोरमंत्रार्थमानसा ॥ घोर

मंत्रार्थतत्त्वज्ञा घोरमंत्रार्थपारगा ॥ ४६ ॥ घोरमंत्रार्थविभवा घोरमंत्रार्थबोधिनी ॥ घोरमंत्रार्थनिचया घोरमंत्रार्थजन्मभूः ॥ ॥ ४७ ॥ घोरमंत्रजपरता घोरमंत्रजपोद्यता ॥ ङकारवर्णनिलया ङकाराक्षरमण्डिता ॥ ४८ ॥ ङकारापररूपा च ङकाराक्षररूपिणी ॥ चित्ररूपा चित्रनाडी चारुकेशी चयप्रभा ॥ ४९ ॥ चञ्चला चञ्चलाकारा चारुरूपा च चण्डिका ॥ चतुर्वेदमयी चण्डा चण्डालगणमण्डिता ॥ ५० ॥ चाण्डालच्छेदिनी चण्डतपोनिर्मूलकारिणी ॥ चतुर्भुजा चण्डरूपा चण्डमुण्डविनाशिनी ॥ ५१ ॥ चन्द्रिका चन्द्रकीर्तिश्च चन्द्रकांतिस्तथैव च ॥ चन्द्रास्या चन्द्ररूपा च चन्द्रमौलिस्वरूपिणी ॥ ५२ ॥ चन्द्रमौलिप्रिया चन्द्रमौलिसंतुष्टमानसा ॥ चकोरबंधुरमणी चकोरबंधुपूजिता ॥ ५३ ॥ चक्ररूपा चक्रमयी चक्राकारस्वरूपिणी ॥ चक्रपाणिप्रिया चक्रपाणिप्रीतिप्रदायिनी ॥ ५४ ॥ चक्रपाणिरसाभिज्ञा चक्रपाणिवरप्रदा ॥ चक्रपाणिवरोन्मत्ता चक्रपाणिस्वरूपिणी ॥ ५५ ॥ चक्रपाणीश्वरी नित्यं चक्रपाणिनमस्कृता ॥ चक्रपाणिसमुद्भूता चक्रपाणिगुणास्पदा ॥ ५६ ॥ चन्द्रावली चन्द्रवती चन्द्रकोटिसमप्रभा ॥ चन्दनार्चितपादाब्जा चन्दनान्वितमस्तका ॥ ५७ ॥ चारुकीर्तिश्चारुनेत्रा चारुचन्द्रविभूषणा ॥ चारुभूषा चारुवेषा चारुवेषप्रदायिनी ॥ ५८ ॥ चारुभूषाभूषिताङ्गी चतुर्वक्त्रवरप्रदा ॥ चतुर्वक्त्रसमाराध्या चतुर्वक्त्रसमाश्रिता ॥ ५९ ॥ चतुर्वक्त्रचतुर्बाहा चतुर्थी च चतुर्दशी ॥ चित्रा चर्मण्वती चैत्री चन्द्रभागा च चम्पका ॥ ६० ॥ चतुर्दशयमाकारा चतुर्दशयमानुगा ॥ चतुर्दशयमप्रीता चतुर्दशयमप्रिया ॥ ६१ ॥ छलस्था च्छिद्ररूपा च छद्मदा छद्मराजिका ॥ छिन्नमस्ता तथा छिन्ना च्छिन्नमुण्डविधारिणी ॥ ६२ ॥ जयदा जयरूपा च जयंती जयमोहिनी ॥ जया जीवनसंस्था च जालंधरनिवासिनी ॥ ६३ ॥ ज्वालामुखी ज्वालदात्री जाज्वल्यदहनोपमा ॥ जगद्वंद्या जगत्पूज्या जगत्राणपरायणा ॥ ६४ ॥ जगती जगदाधारा जन्ममृत्युजरापहा ॥ जननी जन्मभूमिश्च जन्मदा जयशालिनी ॥ ६५ ॥ ज्वररोगहरा ज्वाला ज्वालामालाप्रपूरिता ॥ जंभारातीश्वरी जंभारातिवैभवकारिणी ॥ ॥ ६६ ॥ जंभारातिस्तुता जंभारातिशत्रुनिषूदिनी ॥ जयदुर्गा जयाराध्या जयकाली जयेश्वरी ॥ ६७ ॥ जयतारा जयातीता जयशङ्कर

वल्लभा ॥ जयदा जह्नुतनया जलधित्रासकारिणी ॥ ६८ ॥ जलधिव्याधिदमनी जलधिज्वरनाशिनी ॥ जंगमेशी जाड्यहरा जाड्य संघनिवारिणी ॥ ६९ ॥ जाड्यग्रस्तजनातीता जाड्यरोगनिवारिणी ॥ जन्मदात्री जन्महर्त्री जयघोषसमन्विता ॥ ७० ॥ जप योगसमायुक्ता जपयोगविनोदिनी ॥ जपयोगप्रिया जाप्या जपातीता जयस्वना ॥ ७१ ॥ जायाभावस्थिता जाया जायाभावप्रपूरणी ॥ जपाकुसुमसंकाशा जपाकुसुमपूजिता ॥ ७२ ॥ जपाकुसुमसम्प्रीता जपाकुसुमण्डिता ॥ जपाकुसुमवद्भासा जपाकुसुमरूपिणी ॥ ॥ ७३ ॥ जमदग्निस्वरूपा च जानकी जनकात्मजा ॥ झंझावातप्रमुक्ताङ्गी झोरझंकारवासिनी ॥ ७४ ॥ झंकारकारिणी झंझावात रूपा च झंकरी ॥ अक्काराणुस्वरूपा च टनटंकारनादिनी ॥ ७५ ॥ टंकारी टकुवाणी च ठकाराक्षररूपिणी ॥ डिण्डिमा च तथा डिम्भा डिण्डुडिण्डिमनादिनी ॥ ७६ ॥ ढक्कामयी ढिलमयी नृत्यशब्दा विलासिनी ॥ ढक्का ढक्केश्वरी ढक्काशब्दरूपा तथैव ॥ ७७ ॥ ढक्कानादप्रिया ढक्कानादसंतुष्टमानसा ॥ णकारा णाक्षरमयी णाक्षरादिस्वरूपिणी ॥ ७८ ॥ त्रिपुरा त्रिपुरमयी त्रिशक्तिस्त्रिगुणात्मिका ॥ तामसी च त्रिलोकेशी त्रिपुरा च त्रयीश्वरी ॥ ७९ ॥ त्रिविद्या च त्रिरूपा च त्रिनेत्रा च त्रिरूपिणी ॥ तारिणी तरला तारा तार कारिप्रपूजिता ॥ ८० ॥ तारकारिसमाराध्या तारकारिवरप्रदा ॥ तारकारिप्रसूस्तन्वी तरुणी तरलप्रभा ॥ ८१ ॥ त्रिरूपा च त्रिपुरगा त्रिशूलवरधारिणी ॥ त्रिशूलिनी तंत्रमयी तंत्रशास्त्रविशारदा ॥ ८२ ॥ तंत्ररूपा तपोमूर्तिस्तंत्रमंत्रस्वरूपिणी ॥ तडित्तडि ल्लताकारा तत्त्वज्ञानप्रदायिनी ॥ ८३ ॥ तत्त्वज्ञानेश्वरी देवी तत्त्वज्ञानप्रमोदिनी ॥ त्रयीमयी त्रयीसेव्या त्र्यक्षरी त्र्यक्षरेश्वरी ॥ ८४ ॥ तापविध्वंसिनी तापसंघनिर्मूलकारिणी ॥ त्रासकर्त्री त्रासहर्त्री त्रासदात्री च त्रासहा ॥ ८५ ॥ तिथीशा तिथिरूपा च तिथिस्था तिथिपूजिता ॥ तिलोत्तमा च तिलदा तिलप्रीता तिलेश्वरी ॥ ८६ ॥ त्रिगुणा त्रिगुणाकारा त्रिपुरी त्रिपुरात्मिका ॥ त्रिकुटा त्रिकुटा कारा त्रिकूटाचलमध्यगा ॥ ८७ ॥ त्रिजटा च त्रिनेत्रा च त्रिनेत्रवरसुन्दरी ॥ तृतीया च त्रिवर्षा च त्रिविधा त्रिमतेश्वरी ॥ ८८ ॥ त्रिकोणस्था त्रिकोणेशी त्रिकोणयंत्रमध्यगा ॥ त्रिसंध्या च त्रिसंध्यार्च्या त्रिपदा त्रिपदास्पदा ॥ ८९ ॥

मं०म० स्थानस्थिता स्थलस्था च धन्यस्थलनिवासिनी ॥ थकाराक्षररूपा च स्थूलरूपा तथैव च ॥ ९० ॥ स्थूलहस्ता तथा म० खं २
॥४९७॥ स्थूला स्थैर्य्यरूपप्रकाशिनी ॥ दुर्गा दुर्गार्तिहंत्री च दुर्गबंधविमोचिनी ॥ ९१ ॥ देवी दानवसंहंत्री दनुजेष्टनिषूदिनी ॥ छि० म० तं०
दारापत्यप्रदा नित्या शंकरार्द्धाङ्गधारिणी ॥ ९२ ॥ दिव्याङ्गी देवमाता च देवदुष्टविनाशिनी ॥ दीनदुःखहरा दीनताप तरं० ९
निर्मूलकारिणी ॥ ९३ ॥ दीनमाता दीनसेव्या दीनदंभविनाशिनी ॥ दनुजध्वंसिनी देवी देवकी देववल्लभा ॥ ९४ ॥ दानवारिप्रिया
दीर्घा दानवारिप्रपूजिता ॥ दीर्घस्वरा दीर्घतनुर्दीर्घदुर्गतिनाशिनी ॥ ९५ ॥ दीर्घनेत्रा दीर्घचक्षुर्दीर्घकेशी दिगम्बरा ॥ दिगम्बरप्रिया
दांता दिगम्बरस्वरूपिणी ॥ ९६ ॥ दुःखहीना दुःखहरा दुःखसागरतारिणी ॥ दुःखदारिद्र्यशमनी दुःखदारिद्र्यकारिणी ॥ ९७ ॥
दुःखदा दुस्सहा दुष्टखण्डनैकस्वरूपिणी ॥ देववामा देवसेव्या देवशक्तिप्रदायिनी ॥ ९८ ॥ दामिनी दामिनीप्रीता दामिनीशतसुन्दरी ॥
दामिनीशतसंसेव्या दामिनीदामभूषिता ॥ ९९ ॥ देवताभावसंतुष्टा देवताशतमध्यगा ॥ दयार्द्रा च दयारूपा दयादानपरायणा ॥१००॥
दयाशीला दयासारा दयासागरसंस्थिता ॥ दशविद्यात्मिका देवी दशविद्यास्वरूपिणी ॥ १०१ ॥ धरणी धनदा धात्री धन्या धन्यपरा
शिवा ॥ धर्म्मरूपा धनिष्ठा च धेया च धीरगोचरा ॥ १०२ ॥ धर्म्मराजेश्वरी धर्म्मकर्म्मरूपा धनेश्वरी ॥ धनुर्विद्या धनुर्गम्या धनु
र्द्धरवरप्रदा ॥ १०३ ॥ धर्म्मशीला धर्म्मलीला धर्म्मकर्म्मविवर्जिता ॥ धर्म्मदा धर्म्मनिरता धर्म्मपाखण्डखण्डिनी ॥ १०४ ॥ धर्म्मेशी
धर्म्मरूपा च धर्म्मराजवरप्रदा ॥ धर्म्मिणी धर्म्मगेहस्था धर्म्माधर्म्मस्वरूपिणी ॥ १०५ ॥ धनदा धनदप्रीता धनधान्यसमृद्धिदा ॥
धनधान्यसमृद्धिस्था धनधान्यविनाशिनी ॥ १०६॥ धर्म्मनिष्ठा धर्म्मधीरा धर्म्ममार्गरता सदा ॥ धर्म्मबीजकृतस्थाना धर्म्मबीजसुरक्षिणी
॥ १०७ ॥ धर्म्मबीजेश्वरी धर्म्मबीजरूपा च धर्म्मगा ॥ धर्म्मबीजसमुद्भूता धर्म्मबीजसमाश्रिता ॥ १०८ ॥ धराधरपतिप्राणा धरा ॥ ४९७ ॥
धरपतिस्तुता ॥ धराधरेन्द्रतनुजा धराधरेन्द्रवन्दिता ॥ १०९ ॥ धराधरेन्द्रगेहस्था धराधरेन्द्रपालिनी ॥ धराधरेन्द्रसर्वार्तिनाशिनी
धर्म्मपालिनी ॥ ११० ॥ नवीना निर्म्मला नित्या नागराजप्रपूजिता ॥ नागेश्वरी नागमाता नागकन्या च नग्निका ॥ १११ ॥

निर्लेपा निर्विकल्पा च निर्लोमा निरुपद्रवा ॥ निराहारा निराकारा निरञ्जनस्वरूपिणी ॥ ११२ ॥ नागिनी नागविभवा नागराजपरि
स्तुता ॥ नागराजगुणज्ञा च नागराजसुखप्रदा ॥ ११३ ॥ नागलोकगता नित्यं नागलोकनिवासिनी ॥ नागलोकेश्वरी नागभागिनी
नागपूजिता ॥ ११४ ॥ नागमध्यस्थिता नागमोहसंक्षोभदायिनी ॥ नृत्यप्रिया नृत्यवती नृत्यगीतपरायणा ॥ ११५ ॥ नृत्येश्वरी
नर्तकी च नृत्यरूपा निराश्रया ॥ नारायणी नरेन्द्रस्था नरमुण्डास्थिमालिनी ॥ ११६ ॥ नरमांसप्रिया नित्या नररक्तप्रिया सदा ॥
नरराजेश्वरी नारीरूपा नारीस्वरूपिणी ॥ ११७ ॥ नारीगणार्चिता नारीमध्यगा नूतनाम्बरा ॥ नर्मदा च नदीरूपा नदीसंगम
संस्थिता ॥ ११८ ॥ नर्मदेश्वरसम्प्रीता नर्मदेश्वररूपिणी ॥ पद्मावती पद्ममुखी पद्मकिञ्जल्कवासिनी ॥ ११९ ॥ पट्टवस्त्रपरीधाना पद्म
रागविभूषिता ॥ परमा प्रीतिदा नित्यं प्रेतासननिवासिनी ॥ १२० ॥ परिपूर्णरसोन्मत्ता प्रेमविह्वलवल्लभा ॥ पवित्रासवनिष्पूता प्रेयसी
परमात्मिका ॥ १२१ ॥ प्रियव्रतपरा नित्यं परमप्रेमदायिनी ॥ पुष्पप्रिया पद्मकोशा पद्मधर्म्मनिवासिनी ॥ १२२ ॥ फेत्कारिणी
तंत्ररूपा फेरुफेरवनादिनी ॥ वंशिनी वंशरूपा च बगला वामरूपिणी ॥ १२३ ॥ वाङ्मयी वसुधा धृष्या वाग्भवाख्या वरा नरा ॥
बुद्धिदा बुद्धिरूपा च विद्या वादस्वरूपिणी ॥ १२४ ॥ बाला वृद्धमयीरूपा वाणी वाक्यनिवासिनी ॥ वरुणा वाग्वती वीरा वीरभूषण
भूषिता ॥ १२५ ॥ वीरभद्रार्चितपदा वीरभद्रप्रसूरपि ॥ वेदमार्गरता वेदमंत्ररूपा वषट्प्रिया ॥ १२६ ॥ वीणावाद्यसमायुक्ता वीणा
वाद्यपरायणा ॥ वीणारवा तथा वीणाशब्दरूपा च वैष्णवी ॥ १२७ ॥ वैष्णवाचारनिरता वैष्णवाचारतत्परा ॥ विष्णुसेव्या विष्णुपत्नी
विष्णुरूपा वरानना ॥ १२८ ॥ विश्वेश्वरी विश्वमाता विश्वनिर्माणकारिणी ॥ विश्वरूपा च विश्वेशी विश्वसंहारकारिणी ॥ १२९ ॥
भैरवी भैरवाराध्या भूतभैरवसेविता ॥ भैरवेशी तथा भीमा भैरवेश्वरतुष्टिदा ॥ १३० ॥ भैरवाधीशरमणी भैरवाधीशपालिनी ॥ भीमे
श्वरी भीममाता भीमशब्दपरायणा ॥ १३१ ॥ भीमरूपा च भीमेशी भीमा भीमवरप्रदा ॥ भीमपूजितपादाब्जा भीमभैरवपालिनी
॥ १३२ ॥ भीमासुरध्वंसकरी भीमदुष्टविनाशिनी ॥ भुवना भुवनाराध्या भवानी भूतिदा सदा ॥ १३३ ॥ भयदा भयहंत्री च अभया

ऽभयरूपिणी ॥ भीमनादा विह्वला च भयभीतिविनाशिनी ॥ १३४ ॥ मत्ता प्रमत्तरूपा च मन्दोन्मत्तस्वरूपिणी ॥ मान्या मनोज्ञा माना च मंगला च मनोहरा ॥ १३५ ॥ माननीया महापूज्या महामहिषमर्द्दिनी ॥ महिषासुरहंत्री च मातंगी मयवासिनी ॥ ॥ १३६ ॥ माध्वी मधुमयी मुद्रा मुद्रिका मंत्ररूपिणी ॥ महाविश्वेश्वरी दूती मौलिचन्द्रप्रकाशिनी ॥ १३७ ॥ यशःस्वरूपिणी देवी योगमार्गप्रदायिनी ॥ योगिनी योगगम्या च याम्येशी योगरूपिणी ॥ १३८ ॥ यज्ञांगी च योगमयी जपरूपा जपात्मिका ॥ युगाख्या च युगांता च योनिमण्डलवासिनी ॥ १३९ ॥ अयोनिजा योगनिद्रा योगानन्दप्रदायिनी ॥ रमा रतिप्रिया नित्यं रतिरागविवर्द्धिनी ॥ ॥ १४० ॥ रमणी राससम्भूता रम्या रासप्रिया रसा ॥ रणोत्कण्ठा रणस्था च वरा रंगप्रदायिनी ॥ १४१ ॥ रेवती रणजैत्री च रसोद्भूता रणोत्सवा ॥ लता लावण्यरूपा च लवणाब्धिस्वरूपिणी ॥ १४२ ॥ लवंगकुसुमाराध्या लोलजिह्वा च लेलिहा ॥ वशिनी वनसंस्था च वनपुष्पप्रिया वरा ॥ १४३ ॥ प्राणेश्वरी बुद्धिरूपा बुद्धिदात्री बुधात्मिका ॥ शमनी श्वेतवर्णा च शाङ्करी शिवभाषिणी ॥ १४४ ॥ शाम्यरूपा शक्तिरूपा शक्तिबिन्दुनिवासिनी ॥ सर्वेश्वरी सर्वदात्री सर्वमाता च शर्वरी ॥ १४५ ॥ शांभवी सिद्धिदा सिद्धा सुषुम्ना सुरभासिनी ॥ सहस्रदलमध्यस्था सहस्रदलवर्त्तिनी ॥ १४६ ॥ हरप्रिया हरध्येया हूँकारबीजरूपिणी ॥ लंकेश्वरी च तरला लोममांसप्रपूजिता ॥ १४७ ॥ क्षेम्या क्षेमकरी क्षामा क्षीरबिन्दुस्वरूपिणी ॥ क्षिप्तचित्तप्रदा नित्यं क्षौमवस्त्रविलासिनी ॥ १४८ ॥ छिन्ना च च्छिन्नरूपा च क्षुधा क्षौत्काररूपिणी ॥ सर्ववर्णमयी देवी सर्वसम्पत्प्रदायिनी ॥ १४९ ॥ सर्वसम्पत्प्रदात्री च सम्पदापद्विभूषिता ॥ सत्त्वरूपा च सर्वार्था सर्वदेवप्रपूजिता ॥ १५० ॥ सर्वेश्वरी सर्वमाता सर्वज्ञा सुरसात्मिका ॥ सिन्धुर्मंदाकिनी गंगा नदी सागररूपिणी ॥ १५१ ॥ सुकेशी मुक्तकेशी च डाकिनी वरवर्णिनी ॥ ज्ञानदा ज्ञानगगना सोममण्डलवासिनी ॥ १५२ ॥ आकाशनिलया नित्या परमाकाशरूपिणी ॥ अन्नपूर्णा महानित्या महादेवरसोद्भवा ॥ १५३ ॥ मंगला कालिका चण्डा चण्डनादातिभीषणा ॥ चण्डासुरस्य मथिनी चामुण्डा चपलात्मिका ॥ १५४ ॥ चण्डी चामरकेशी च चलत्कुण्डलधारिणी ॥ मुण्डमालाधर

नित्या खण्डमुण्डविलासिनी ॥ १५५ ॥ खड्गहस्ता मुण्डहस्ता वरहस्ता वरप्रदा ॥ असिचर्मधरा नित्या पाशांकुशधरा परा ॥ १५६ ॥ शूलहस्ता शिवहस्ता घण्टानादविलासिनी ॥ धनुर्बाणधराऽऽदित्या नागहस्ता नगात्मजा ॥ १५७ ॥ महिषासुरहंत्री च रक्तबीजविनाशिनी ॥ रक्तरूपा रक्तगा च रक्तहस्ता भयप्रदा ॥ १५८ ॥ असिता च धर्म्मधरा पाशांकुशधरा परा ॥ धनुर्बाणधरा नित्या धूम्रलोचननाशिनी १५९ ॥ परस्था देवतामूर्तिः शर्वाणी शारदा परा ॥ नानावर्णविभूषांगी नानारागसमापिनी ॥ १६० ॥ पशुवस्त्रपरीधाना पुष्पायुधधरा परा ॥ मुक्तरंजितमालाढ्या मुक्ताहारविलासिनी ॥ १६१ ॥ स्वर्णकुण्डलभूषा च स्वर्णसिंहासनस्थिता ॥ सुन्दरांगी सुवर्णाभा शांभवी शकटात्मिका ॥ १६२ ॥ सर्वलोकेशविद्या च मोहसम्मोहकारिणी ॥ श्रेयसी सृष्टिरूपा च च्छिन्नच्छद्ममयी च्छला ॥ १६३ ॥ छिन्नमुण्डधरा नित्या नित्यानन्दविधायिनी ॥ नन्दा पूर्णा च रिक्ता च तिथयः पूर्णषोडशी ॥ १६४ ॥ कुहूः संक्रांतिरूपा च पञ्चपर्वविलासिनी ॥ पञ्चवाणधरा नित्या पञ्चमप्रीतिदा परा ॥ १६५ ॥ पञ्चपत्राभिलाषा च पञ्चामृतविलासिनी ॥ पञ्चाली पञ्चमी देवी पञ्चरक्तप्रसारिणी ॥ १६६ ॥ पञ्चवाणधरा नित्या नित्यदात्री दयापरा ॥ पललादिप्रिया नित्याऽपशुगम्या परेशिता ॥ १६७ ॥ परा पररहस्या च परमप्रेमविह्वला ॥ कुलीना केशिमार्गस्था कलमार्गप्रकाशिनी ॥ १६८ ॥ कुलाकुलस्वरूपा च कुलार्णवमयी कुला ॥ रुक्मा च कालरूपा च कालकम्पनकारिणी ॥ १६९ ॥ विलासरूपिणी भद्रा कुलाकुलनमस्कृता ॥ कुबेरवित्तधात्री च कुमारजननी परा ॥ १७० ॥ कुमारीरूपसंस्था च कुमारीपूजनाम्बिका ॥ कुरंगनयना देवी दिनेशास्याऽपराजिता ॥ १७१ ॥ कुण्डली कदली सेना कुमार्गरहिता वरा ॥ अनंतरूपाऽनंतस्था आनन्दसिंधुवासिनी ॥ १७२ ॥ इलास्वरूपिणी देवी इईभेदभयंकरी ॥ इडा च पिंगला नाडी इकाराक्षररूपिणी ॥ १७३ ॥ उमा चोत्पत्तिरूपा च उच्चभावविनाशिनी ॥ ऋग्वेदा च निराराध्या यजुर्वेदप्रपूजिता ॥ १७४ ॥ सामवेदेन संगीता अथर्ववेदभाषिणी ॥ ऋकाररूपिणी ऋक्षा निरक्षरस्वरूपिणी ॥ १७५ ॥ अहिदुर्गासमाचारा इकारार्णस्वरूपिणी ॥

ओंकारा प्रणवस्था च ओंकारादिस्वरूपिणी ॥ १७६ ॥ अनुलोमविलोमस्था थकारवर्णसम्भवा ॥ पञ्चाशद्वर्णबीजाढ्या पञ्चाशन्मुण्ड मालिका ॥ १७७ ॥ प्रत्येका दशसंख्या च षोडशी च्छिन्नमस्तका ॥ षडंगयुवतीपूज्या षडंगरूपवर्जिता ॥ १७८ ॥ षड्वक्रसंश्रिता नित्या विश्वेशी खड्गदालया ॥ मालामंत्रमयी मंत्रजपमाता मदालसा ॥ १७९ ॥ सर्वविश्वेश्वरी शक्तिः सर्वानन्दप्रदायिनी ॥ इति श्रीच्छिन्न मस्ताया नामसाहस्रमुत्तमम् ॥ १८० ॥ पजाक्रमेण कथितं साधकानां सुखावहम् ॥ गोपनीयं गोपनीयं गोपनीयं न संशयः ॥ १८१ ॥ अर्द्धरात्रे मुक्तकेशो भक्तियुक्तो भवेन्नरः ॥ जपित्वा पूजयित्वा च पठेन्नामसहस्रकम् ॥ १८२ ॥ विद्यासिद्धिर्भवेत्तस्य षण्मासाभ्यास योगतः ॥ येन केन प्रकारेण देवीभक्तिपरो भवेत् ॥ १८३ ॥ अखिलान्स्तंभयेल्लोकान्राज्ञोऽपि मोहयेत्सदा ॥ आकर्षयेद्देवशक्तिं मार येद्देवि विद्विषम् ॥ १८४ ॥ शत्रवो दासतां यांति यांति पापानि संक्षयम् ॥ मृत्युश्च क्षयतां याति पठनाद्भाषणात्प्रिये ॥ १८५ ॥ प्रशस्तायाः प्रसादेन किं न सिद्ध्यति भूतले ॥ इदं रहस्यं परमं परं स्वस्त्ययनं महत् ॥ १८६ ॥ धृत्वा बाहौ महासिद्धिः प्राप्यते नात्र संशयः ॥ अनया सदृशी विद्या विद्यते न महेश्वरि ॥ १८७ ॥ वारमेकं तु योऽधीते सर्वसिद्धीश्वरो भवेत् ॥ कुलवारे कुलाष्टम्यां कुहू संक्रांतिपर्वसु ॥ १८८ ॥ यश्चेमां पठते विद्यां तस्य सम्यक्फलं शृणु ॥ अष्टोत्तरशतं जप्त्वा पठेन्नामसहस्रकम् ॥ १८९ ॥ भक्त्या स्तुत्वा महादेवि सर्वपापात्प्रमुच्यते ॥ सर्वपापैर्विनिर्मुक्तः सर्वसिद्धीश्वरो भवेत् ॥ १९० ॥ अष्टम्यां वा निशीथे च चतुष्पथगतो नरः ॥ माषभक्तबलिं दत्त्वा पठेन्नामसहस्रकम् ॥ १९१ ॥ सुदर्शवामवेध्यां तु मासत्रयविधानतः ॥ दुर्जयः कामरूपश्च महाबलपराक्रमः ॥ ॥ १९२ ॥ कुमारीपूजनं नाम मंत्रमात्रं पठेन्नरः ॥ एतन्मंत्रस्य पठनात्सर्वसिद्धीश्वरो भवेत् ॥ १९३ ॥ इति ते कथितं देवि सर्व सिद्धिपरं नरः ॥ जप्त्वा स्तुत्वा महादेवीं सर्वपापैः प्रमुच्यते ॥ १९४ ॥ न प्रकाश्यमिदं देवि सर्वदेवनमस्कृतम् ॥ इदं रहस्यं परमं गोप्तव्यं पशुसंकटे ॥ १९५ ॥ इति सकलविभूतेर्हेतुभूतं प्रशस्तं पठति य इह मर्त्यश्छिन्नमस्तास्तवं च ॥ धनद इव धनाढ्यो माननीयो नृपाणां स भवति च जनानामाश्रयः सिद्धिवेत्ता ॥ १९६ ॥ इति श्रीविश्वसारतंत्रे शिवपार्वतीसंवादे श्रीच्छिन्नमस्तासहस्रनामस्तोत्रं

सम्पूर्णम् ॥ अथ च्छिन्नमस्ताहृदयस्तोत्रप्रारंभः ॥ श्रीपार्वत्युवाच ॥ श्रुतं पूजादिकं सम्यग्भवद्वक्त्राब्जनिःसृतम् ॥ हृदयं छिन्नमस्तायाः श्रोतुमिच्छामि साम्प्रतम् ॥ १ ॥ ॐ महादेव उवाच ॥ नाद्यावधि मया प्रोक्तं कस्यापि प्राणवल्लभे ॥ यत्त्वया परिपृष्टोऽहं वक्ष्ये प्रीत्यै तव प्रिये ॥ २॥ ॐ अस्य श्रीच्छिन्नमस्ताहृदयस्तोत्रमंत्रस्य भैरव ऋषिः । सम्राट् छंदः । छिन्नमस्ता देवता । हूं बीजम् । ॐ शक्तिः । ह्रीं कीलकम् । शत्रुक्षयकरणार्थे पाठे विनियोगः ॥ ॐ भैरवऋषये नमः शिरसि १ । सम्राट्छंदसे नमो मुखे २ । छिन्नमस्तादेवतायै नमो हृदि ३ । हूं बीजाय नमो गुह्ये ४ । ॐ शक्तये नमः पादयोः ५ । ह्रीं कीलकाय नमो नाभौ ६ । विनियोगाय नमः सर्वांगे ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ ॐ अंगुष्ठाभ्यां नमः १ । ॐ हूं तर्जनीभ्यां नमः २ । ॐ ह्रीं मध्यमाभ्यां नमः ३ । ॐ ऐं अनामिकाभ्यां नमः ४ । ॐ क्लीं कनिष्ठिकाभ्यां नमः ५ । ॐ हूं करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ॐ ॐ हृदयाय नमः १ । ॐ हूं शिरसे स्वाहा २ । ॐ ह्रीं शिखायै वषट् ३ । ॐ ऐं कवचाय हुम् ४ । ॐ क्लीं नेत्रत्रयाय वौषट् ५ । ॐ हूं अस्त्रायफट् ६ ॥ इति हृदयादिषडंगन्यासः॥अथ ध्यानम्—रक्ताभां रक्तकेशीं करकमललसत्कर्त्रिकां कालकांतिं विच्छिन्नात्मीयमुण्डासृगरुणबहुलोदग्रधारां पिबंतीम् ॥ विघ्नाभ्रौघप्रचण्डश्वसनसमनिभां सेवितां सिद्धसंघैः पद्माक्षीं छिन्नमस्तां छलकरदितिजच्छेदिनीं संस्मरामि ॥ १ ॥ वन्देऽहं छिन्नमस्तां तां छिन्नमुडधरां पराम् ॥ छिन्नग्रीवोच्छटाच्छन्नां क्षौमवस्त्रपरिच्छदाम् ॥ २ ॥ सर्वदा सुरसंघेन सेवितांघ्रिसरोरुहाम् ॥ सेवे सकलसम्पत्त्यै छिन्नमस्तां शुभप्रदाम् ॥ ३ ॥ यज्ञानां योगयज्ञाय या तु जाता युगे युगे ॥ दानवांतकरीं देवीं छिन्नमस्तां भजामि ताम् ॥ ॥ ४ ॥ वैराचनीं वरारोहां वामदेवविवर्द्धिताम् ॥ कोटिसूर्य्यप्रभां वंदे विद्युद्वर्णाक्षिमण्डिताम् ॥ ५ ॥ निजकण्ठोच्छलद्रक्तधारया या मुहुर्मुहुः ॥ योगिनीस्तर्पयन्त्युग्रा तस्याश्चरणमाश्रये ॥ ६ ॥ हूमित्येकाक्षरं मंत्रं यदीयं युक्तमानसः ॥ यो जपेत्तस्य विद्वेषी भस्मतां याति तां भजे ॥ ७ ॥ हूं स्वाहेति मंनु सम्यग्यः स्मरत्यर्तिमान्नरः ॥ छिनत्ति च्छिन्नमस्ता या तस्य बाधां नमामि ताम् ॥८॥ यस्याः कटाक्षमात्रेण क्रूरभूतादयो द्रुतम् ॥ दूरतः सम्पलायंते च्छिन्नमस्तां भजामि ताम् ॥ ९ ॥ क्षितितलपरिरक्षाक्षांतरोषा सुदक्षा

छलयुतखलकक्षाच्छेदने क्षांतिलक्ष्या ॥ क्षितिदितिजसुपक्षा क्षोणिपाक्ष्यशिक्षा जयतु जयतु चाक्षा च्छिन्नमस्तारिभक्षा ॥ १० ॥ कलिकलुषकलानां कर्त्तने कर्त्रिहस्ता सुरकुवलयकाशा मन्दभानुप्रकाशा ॥ असुरकुलकलापत्रासिकाऽम्लानमूर्तिर्जयतु जयतु काली च्छिन्नमस्ता कराली ॥ ११ ॥ भुवनभरणभूरिभ्राजमानानुभावा भवभवविभवानां भारणोद्भातभूतिः ॥ द्विजकुलकमलानां भासिनी भानुमूर्तिर्भवतु भवतु वाणी च्छिन्नमस्ता भवानी ॥ १२ ॥ मम रिपुगणमाशु च्छेत्तुमुग्रं कृपाणं सपदि जननि तीक्ष्णं छिन्नमुण्डं गृहाण ॥ भवतु तव यशोऽलं छिंधि शत्रून्खलान्मे मम च परिदिशेष्टं छिन्नमस्ते क्षमस्व ॥ १३ ॥ छिन्नग्रीवा छिन्नमस्ता छिन्नमुण्ड धराऽक्षता ॥ क्षोदक्षेमकरी स्वक्षा क्षोणीशाच्छादनक्षमा ॥ १४ ॥ वैरोचनी वरारोहा बलिदानप्रहर्षिता ॥ बलिपूजितपादाब्जा वासुदेवप्रपूजिता ॥ १५ ॥ इति द्वादशनामानि च्छिन्नमस्ताप्रियाणि यः ॥ स्मरेत्प्रातः समुत्थाय तस्य नश्यंति शत्रवः ॥ १६ ॥ यां स्मृत्वा संति सद्यः सकलसुरगणाः सर्वदा सम्पदाढ्याः शत्रूणां संघमाहत्य विशदवदनाः स्वस्थचित्ताः श्रयंति ॥ तस्याः संकल्पवंतः सरसिजचरणं संततं संश्रयंति साऽऽद्या श्रीशादिसेव्या सुफलतु सुतरां छिन्नमस्ता प्रशस्ता ॥ १७ ॥ इदं हृदयमज्ञात्वा हंतुमिच्छति यो द्विषम् ॥ कथं तस्याचिरं शत्रुर्नाशमेष्यति पार्वति ॥ १८ ॥ यदीच्छेन्नाशनं शत्रोः शीघ्रमेतत्पठेन्नरः ॥ छिन्नमस्ता प्रसन्ना हि ददाति फलमीप्सितम् ॥ १९ ॥ शत्रुप्रशमनं पुण्यं समीप्सितफलप्रदम् ॥ आयुरारोग्यदं चैव पठतां पुण्यसाधनम् ॥ २० ॥ इति श्रीनंद्यावर्ते महादेवपार्वतीसंवादे श्रीच्छिन्नमस्ताहृदयस्तोत्रं समाप्तम् ॥ इति श्रीमंत्रमहार्णवे मध्यखण्डे च्छिन्नमस्तातंत्रे नवमस्तरंगः ॥ ९ ॥

धूमावत्यैनमः।




अथ धूमावतीतंत्रप्रारंभः ॥ मंत्रो यथा मंत्रमहोदधौ–धूंधूं धूमावति स्वाहा ॥ इत्यष्टाक्षरो मंत्रः ॥ अस्य विधानम्–अस्य धूमावतीमंत्रस्य पिप्पलाद ऋषिः । निवृच्छंदः । ज्येष्ठा[2] देवता। [3]धूं बीजम् । स्वाहा शक्तिः । धूमावती कीलकम् । मम[4]भीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ पिप्पलादऋषये नमः शिरसि १ । निवृच्छंदसे नमः मुखे २ । ज्येष्ठादेवतायै नमः हृदि ३ । धूं बीजाय नमः गुह्ये ४ । स्वाहाशक्तये नमः पादयोः ५ । धूमावतीकीलकाय नमः नाभौ ६ । विनियोगाय नमः सर्वांगे ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ धूं धूं अंगुष्ठाभ्यां नमः १ । ॐ धूं तर्जनीभ्यां नमः २ । ॐ मां मध्यमाभ्यां नमः ३ । ॐ वं अनामिकाभ्यां नमः ४ । ॐ तिं कनिष्ठिकाभ्यां नमः ५ । ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः ६ ॥ इति क[5]रन्यासः ॥ ॐ धूं धूं हृदयाय नमः १ । ॐ धूं शिरसे स्वाहा २ । ॐ मां शिखायै वषट् ३ । ॐ वं कवचाय हुम् ४ । ॐ तिं नेत्रत्रयाय वौषट् ५ । ॐ स्वाहा अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् । अथ ध्यानम्–अत्युच्चा मलिनांबराखिलजनोद्वेगावहा दुर्मना रूक्षाक्षित्रितया विशालदशना सूर्य्योदरी चंचला॥प्रस्वेदाम्बुचिताक्षुधाकुलतनुः कृष्णातिरूक्षाप्रभा ध्येया मुक्तकचा सदाप्रियकलिर्धूमावती मंत्रिणा ॥१॥ तंत्रांतरेऽपि ध्यानं यथा–विवर्णा चंचला

१ तंत्रांतरेऽपि–धूं धूं धूमावति ठः ठः । इति मंत्रः ॥ २ तंत्रांतरे धूमावती देवता ॥ ३ इति बीजादिकं मतांतरेऽपि ज्ञेयम् ॥ ४ शत्रुहनने जपे विनियोगः ॥ ५ तंत्रांतरेऽपि–धां धीं धूं धैं धौं धः । इति षड्बीजैः षडंगं कुर्य्यात् ॥

दुष्टा दीर्घा च मलिनांबरा ॥ विमुक्तकुंतला रूक्षा विधवा विरलद्विजा ॥
काकध्वजरथारूढा विलंबितपयोधरा ॥ शूर्पहस्तातिरक्ताक्षी धृतहस्ता वरान्विता ॥
प्रवृद्धघोणा तु भृशं कुटिला कुटिलेक्षणा ॥ क्षुत्पिपासार्दिता नित्यं भयदा कलहा
स्पदा ॥ २ ॥ इति ध्यायेत् । ततः पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादि
परतत्त्वांतपीठदेवताः संस्थाप्य 'ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः'
इति पीठदेवताः संपूज्य नव पीठशक्तीः पूजयेत् ॥ तद्यथा–पूर्वाद्यष्टसु दिक्षु
ॐ कामदायै नमः १ । ॐ मानदायै नमः २ । ॐ नक्तायै नमः ३ ॥ ॐ मधुरायै नमः
४ । ॐ मधुराननायै नमः ५ । ॐ नर्मदायै नमः ६ । ॐ भोगदायै नमः
७ । ॐ नंदायै नमः ८ । मध्ये ॐ प्राणदायै नमः ९ ॥ इति पीठशक्तीः
पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य
तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण प्रोञ्छ्य 'ॐ धमावती
योगपीठाय नमः' इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च
कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां

धूमावतीपूजनयन्त्रम् ।



गृहीत्वा आवरणपूजां कुर्यात् । तद्यथा पुष्पांजलिमादाय–संविन्मये परे देवि परामृतरसप्रिये ॥ अनुज्ञां देहि मातस्त्वं परिवारा
र्चनाय मे ॥ इति पठित्वा पुष्पांजलिं दद्यात् ॥ इत्याज्ञां गृहीत्वा षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च षडंगानि पूजयेत् ॥
॥ तद्यथा–ॐ धूं धूं हृदयाय नमः । हृदयश्रीपादुकां पूजयामि तर्पयामि नमः। इति सर्वत्र १ । ॐ धूं शिरसे स्वाहा शिरःश्रीपा० २ ।

ॐ मां शिखायै वषट् । शिखाश्रीपा० ३ । ॐ वं नमः कवचायै हुं । कवचश्रीपा० ४ । ॐ तिं नेत्रत्रयाय वौषट् । नेत्रत्रयश्रीपा० ५। ॐ स्वाहा अस्त्राय फट् । अस्त्रश्रीपा० ६ ॥ इति षडंगानि पूजयेत् ॥ ततःपुष्पांजलिमादाय मूलमुच्चार्य- अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततोऽष्टदले पज्यपूजकयोरंतरालं प्राची तदनुसारेण अन्याः दिशः प्रकल्प्य प्राचीक्रमेण ॐ क्षुधायै नमः । क्षुधाश्रीपा० १ । ॐ तृष्णायै नमः । तृष्णाश्रीपा० २ । ॐ रत्यै नमः । रतिश्रीपा० ३ । ॐ निद्रायै नमः । निद्राश्रीपा० ४ । ॐ निर्ऋत्यै नमः । निर्ऋतिश्रीपा० ५ । ॐ दुर्गत्यै नमः । दुर्गतिश्रीपा० ६ । ॐ रुषायै नमः । रुषाश्रीपा० ७ । ॐ अक्षमायै नमः । अक्षमाश्रीपा० ८ । इत्यष्टौ शक्तीः पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततो भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयित्वा पुष्पांजलिं दद्यात् ॥ इत्यावरणपूजां कृत्वा धूपादि नमस्कारांतं संपूज्य श्मशाने दिगंबरो भूत्वा जपं कुर्यात् ॥ अस्य पुरश्चरणमेकलक्षजपः । तिलमिश्रितघृतेन दशांशतो होमः । तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्य्यात् ॥ एवं कृते मंत्रः सिद्धो भवति । सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च- एवं ध्यात्वा जपेल्लक्षं श्मशाने विगतांबरः ॥ निशाभोजी दशांशेन तिलैर्हवनमाचरेत् ॥ १ ॥ एवं ज्येष्ठां समाराध्य सिद्धो मंत्रः प्रजायते ॥ प्रयोगो यथा—उपोष्य कृष्णभूताहे नग्नो मुक्तशिरोरुहः ॥ २ ॥ शून्यागारे श्मशाने वा कांतारे भूधरेऽथवा ॥ प्रत्यहं प्रजपेन्निर्भीर्ध्यायन् देवीं शवासनः ॥ ३ ॥ एवं लक्षं जपेन्मंत्री नाशयेदचिरादरीन् ॥ जुहुयाल्लवणोपेतराजिकां निशि तत्फलम् ॥ ४ ॥ फेत्कारिणीतंत्रे प्रयोगविशेषः—अस्थ्युपरि लिखेन्मंत्रं तस्मिन् स्थाप्य शिवं यजेत् ॥ अवष्टभ्य शिवं शत्रुनाम्ना वै प्रजपेन्मनुम् ॥ ५ ॥ सहस्रार्धमतः शत्रुर्ज्वरेण परिगृह्यते ॥ पंचगव्येन शांतिः स्याज्ज्वरस्य पयसापि वा ॥ ६ ॥ कृत्वा मंत्रं रिपोराख्यामरण्ययामिनी

१ फेत्कारिणीतंत्रे—जपेत्कृष्णचतुर्दश्यां पुरश्चरणसिद्धये। उपवासरतो मंत्री शून्यागारे दिवानिशम् ॥ श्मशाने विपिने वापि जपेल्लक्षं तु वाग्यतः । सोऽजीपः सार्द्धवासाश्च पुरश्चरणकर्मणि ॥

दले ॥ उत्साहो जायते शत्रोर्मनोरयुतजापतः ॥ ७ ॥ दग्ध्वा काकं श्मशानाग्नौ तद्भस्मादाय मंत्रि[1]तम् ॥ शीर्षे विरोधिनः क्षिप्त्वा
उच्चाटो जायते क्षणात् ॥ ८ ॥ श्मशानभस्मना कृत्वा शिवं तस्योपरि न्यसेत् ॥ विरोधिनामसंरुद्धं कृष्णपक्षे समर्चयेत् ॥ महिषीरूप
मासाद्य स्वप्ने शत्रुं विनाशयेत् ॥ ९ ॥ मंत्रेणानेन निखनेत्तद्भस्म रिपुमंदिरे ॥ शत्रुमुच्चाटयेन्नूनं नात्र कार्या विचारणा ॥ १० ॥
श्मशानभस्मना लिंगं कृत्वा पुष्पादिनार्चयेत् ॥ भगवान्निति संभाव्य मनसा कर्म चिंतयन् ॥ ११ ॥ निंबकाकच्छदावेकीकृत्य चाष्टशतं
जपेत् ॥ दद्या[2]द्धूपं साध्यनाम्ना सद्यो विद्वेषयेदरीन् ॥ १२ ॥ चितिकाष्ठानले क्षीरहोमाच्छांतिः सदा भवेत् ॥ रजोधूमप्रदानेन गृध्ररूपेण
कालिका ॥ १३ ॥ मारयत्यरिमागत्य शांतिर्निर्माल्यधूपतः ॥ वाराहकर्णधूपेन हन्याच्छूकररूपिणी ॥ १४ ॥ अश्वत्थपत्रधूपेन
शांतिर्भवति नान्यथा ॥ शांतिः सर्वापि चावश्यं पंचगव्येन जायते ॥ क्षीरेण चापि देवेशि मधरत्रितयेन वा ॥ १५ ॥ इत्यष्टाक्षरी
धूमावतीमंत्रप्रयोगः ॥ अथ धूमावतीकवचप्रारंभः ॥ श्रीपार्वत्युवाच ॥ धूमावत्यर्चनं शंभो श्रुत विस्तरतो मया ॥ कवचं श्रोतुमिच्छामि
तस्या देव वदस्व मे ॥१॥ श्रीभैरव उवाच ॥ शृणु देवि परं गुह्यं न प्रकाश्यं कलौ युगे ॥ कवचं श्रीधूमवत्याः शत्रुनिग्रहकारकम् ॥ २ ॥
ब्रह्माद्या देवि सततं यद्वशादरिघातिनः ॥ योगिनो भवंति शत्रुघ्ना यस्या ध्यानप्रभावतः ॥ ३ ॥ ॐ अस्य श्रीधूमावतीकवचस्य पिप्प
लाद ऋषिः । अनुष्टुप्छंदः । श्रीधूमावती देवता । धूं बीजम् । स्वाहा शक्तिः । धूमावती कीलकम् । शत्रुहनने पाठे विनियोगः ॥ ॐ धूं बीजं
मे शिरः पातु धूं ललाटं सदावतु ॥ धूमा नेत्रयुगं पातु वती कर्णौ सदावतु ॥४॥ दीर्घा तूदरमध्ये तु नाभिं मे मलिनाम्बरा ॥ शूर्पहस्ता
पातु गुह्यं रूक्षा रक्षतु जानुनी ॥ ५ ॥ मुखं मे पातु भीमाख्या स्वाहा रक्षतु नासिकाम् ॥ सर्वविद्याऽवतु कण्ठं विवर्णा बाहुयुग्मकम् ॥
॥ ६ ॥ चञ्चला हृदयं पातु धृष्टा पार्श्वे सदाऽवतु ॥ धूमहस्ता सदा पातु पादौ पातु भयावहा ॥ ७ ॥ प्रवृद्धरोमा तु भृशं कुटिला
कुटिलेक्षणा ॥ क्षुत्पिपासार्दिता देवी भयदा कलहप्रिया ॥ ८ ॥ सर्वांगं पातु मे देवी सर्वशत्रुविनाशिनी ॥ इति ते कथितं

१ अष्टोत्तरशतेनाभिमंत्रयेत् । २ अमुकं विद्वेषयेति मूलेन धूपं दद्यात् ।

पुण्यं कवचं भुवि दुर्लभम् ॥ ९ ॥ न प्रकाश्यं न प्रकाश्यं न प्रकाश्यं कलौ युगे ॥ पठनीयं महादेवि त्रिसंध्यं ध्यानतत्परः ॥ १० ॥
दुष्टाभिचारो देवेशि तद्गात्रं नैव संस्पृशेत् ॥ ११ ॥ इति भैरवीभैरवसंवादे धूमावतीतत्त्वे धूमावतीकवचं सम्पूर्णम् ॥
अथ धूमावतीस्तोत्रप्रारंभः ॥ प्रातर्या स्यात्कुमारी कुसुमकलिकया जापमालां जपंती मध्याह्ने प्रौढरूपा विकसितवदना चारुनेत्रा
निशायाम् ॥ संध्यायां वृद्धरूपा गलितकुचयुगा मुण्डमालां वहंती सा देवी देवदेवी त्रिभुवनजननी कालिका पातु युष्मान् ॥ १ ॥
बद्ध्वा खट्वांगखेटौ कपिलवरजटामंडलं पद्मयोनेः कृत्वा दैत्योत्तमांगैः स्रजमुरसि शिरःशेखरं तार्क्ष्यपक्षैः ॥ पूर्णं रक्तैः सुराणां यम
महिषमहाशृङ्गमादाय पाणौ पायाद्वो वंद्यमानः प्रलयमुदितया भैरवः कालरात्र्याम् ॥ २ ॥ चर्वन्तीमस्थिखण्डं प्रकटकटकटाशब्दसंघात
मुग्रं कुर्वाणा प्रेतमध्ये कहहकहकहाहास्यमुग्रं कृशांगी ॥ नित्यं नित्यप्रसक्ता डमरुडिमडिमान् स्फारयंती मुखाब्जं पायान्नश्चण्डिकेयं
झझमझमझमाजल्पमाना भ्रमंती ॥ ३ ॥ टंटंटंटंटटंटाप्रकरटमटमानादघंटां वहंती स्फेंस्फेंस्फेंस्फारकारा टकटकितहसा नादसंघट्टभीमा ॥
लोलन्मुण्डाग्रमाला ललहलहलहालोलल्लोलाग्रवाचं चर्वंती चण्डमुण्डं मटमटमटितैश्चर्वयंती पुनातु ॥ ४ ॥ वामे कर्णे मृगांकं प्रलय
परिगतं दक्षिणे सूर्य्यबिंबं कण्ठे नक्षत्रहारं वरविकटजटाजूटके मुण्डमालाम् ॥ स्कंधे कृत्वोरगेन्द्रध्वजनिकरयुतं ब्रह्मकंकालभारं संहारे
धारयंती मम हरतु भयं भद्रदा भद्रकाली ॥ ५ ॥ तैलाभ्यक्तैकवेणी त्रपुमयविलसत्कर्णिकाक्रांतकर्णा लौहेनैकेन कृत्वा चरणनलिन
कामात्मनः पादशोभाम् ॥ दिग्वासा रासभेन ग्रसति जगदिदं या यवाकर्णपरा वर्षिण्यातिप्रवृद्धा ध्वजविततभुजा सासि देवि त्वमेव ॥ ६ ॥
संग्रामे हेतिकृत्तैः सरुधिरदशनैर्यद्भटानां शिरोभिर्मालामाबद्ध्य मूर्ध्नि ध्वजविततभजा त्वं श्मशाने प्रविष्टा ॥ दृष्टा भूतप्रभूतैः पृथुतर
जघनाबद्धनागेन्द्रकाञ्ची शूलाग्रव्यग्रहस्ता मधुरुधिरसदाताम्रनेत्री निशायाम् ॥ ७ ॥ दंष्ट्रारौद्रे मुखेऽस्मिंस्तव विशति जगद्देवि सर्वं क्षणा
र्द्धात् संसारस्यांतकाले नररुधिरवशासम्प्लवे धूमधूम्रे ॥ काली कापालिकी सा शवशयनरता योगिनी योगमुद्रा रक्ता ऋद्धिः सभास्था
मरणभयहरा त्वं शिवा चण्डघण्टा ॥ ८ ॥ धूमावत्यष्टकं पुण्यं सर्वापद्विनिवारकम् ॥ यः पठेत्साधको भक्त्या सिद्धिं विंदति वांछि

ताम् ॥ ९ ॥ महापदि महाघोरे महारोगे महारणे ॥ शत्रूच्चाटे मारणादौ जंतूनां मोहने तथा ॥ १० ॥ पठेत्स्तोत्रमिदं देवि सर्वत्र सिद्धिभाग्भवेत् ॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः ॥ ११ ॥ सिंहव्याघ्रादिकाः सर्वे स्तोत्रस्मरणमात्रतः ॥ दूराद्दूरतरं यांति किं पुनर्मानुषादयः ॥ १२ ॥ स्तोत्रेणानेन देवेशि किं न सिद्ध्यति भूतले ॥ सर्वशांतिर्भवेद्देवि अंते निर्वाणतां व्रजेत् ॥ १३ ॥ इत्यूर्द्धाम्नाये धूमावतीस्तोत्रं समाप्तम् ॥ अथ धूमावत्यष्टोत्तरशतनामस्तोत्रप्रारंभः ॥ ईश्वर उवाच ॥ ॐ धूमावती धूम्रवर्णा धूम्रपानपरायणा ॥ धूम्राक्षमथिनी धन्या धन्यस्थाननिवासिनी ॥ १ ॥ अघोराचारसंतुष्टा अघोराचारमण्डिता ॥ अघोरमंत्रसम्प्रीता अघोरमंत्रपूजिता ॥ २ ॥ अट्टाट्टहासनिरता मलिनाम्बरधारिणी ॥ वृद्धा विरूपा विधवा विद्या च विरलद्विजा ॥ ३ ॥ प्रवृद्धघोणा कुमुखी कुटिला कुटिलेक्षणा ॥ कराली च करालास्या कंकाली शूर्पधारिणी ॥ ४ ॥ काकध्वजरथारूढा केवला कठिना कुहूः ॥ क्षुत्पिपासार्दिता नित्या ललज्जिह्वा दिगम्बरा ॥ ५ ॥ दीर्घोदरी दीर्घरवा दीर्घांगी दीर्घमस्तका ॥ विमुक्तकुंतला कीर्त्या कैलासस्थानवासिनी ॥ ॥ ६ ॥ क्रूरा कालस्वरूपा च कालचक्रप्रवर्तिनी ॥ विवर्णा चञ्चला दुष्टा दुष्टविध्वंसकारिणी ॥ ७ ॥ चण्डी चण्डस्वरूपा च चामुण्डा चण्डनिःस्वना ॥ चण्डवेगा चण्डगतिश्चंडमुण्डविनाशिनी ॥ ८ ॥ चाण्डालिनी चित्ररेखा चित्रांगी चित्ररूपिणी ॥ कृष्णा कपर्दिनी कुल्ला कृष्णरूपा क्रियावती ॥ ९ ॥ कुम्भस्तनी महोन्मत्ता मदिरापानविह्वला ॥ चतुर्भुजा ललज्जिह्वा शत्रुसंहारकारिणी ॥ १० ॥ शवारूढा शवगता श्मशानस्थानवासिनी ॥ दुराराध्या दुराचारा दुर्जनप्रीतिदायिनी ॥ ११ ॥ निर्मांसा च निराकारा धूमहस्ता वरान्विता ॥ कलहा च कलिप्रीता कलिकल्मषनाशिनी ॥ १२ ॥ महाकालस्वरूपा च महाकालप्रपूजिता ॥ महादेवप्रिया मेधा महासंकटनाशिनी ॥ १३ ॥ भक्तप्रिया भक्तगतिर्भक्तशत्रुविनाशिनी ॥ भैरवी भुवना भीमा भारती भुवनात्मिका ॥ १४ ॥ भेरुण्डा भीमनयना त्रिनेत्रा बहुरूपिणी ॥ त्रिलोकेशी त्रिकालज्ञा त्रिस्वरूपा त्रयीतनुः ॥ १५ ॥ त्रिमातश्च तथा तन्वी त्रिशक्तिश्च त्रिशूलिनी ॥ इति धूमामहत्स्तोत्रं नाम्नामष्टशतात्मकम् ॥ १६ ॥ मया ते कथितं देवि शत्रुसंघविनाशनम् ॥ कारागारे रिपुग्रस्ते महोत्पाते महाभये ॥ १७ ॥ इदं स्तोत्रं पठे

न्मर्त्यो मुच्यते सर्वसंकटैः ॥ गुह्याद्गुह्यतरं गुह्यं गोपनीयं प्रयत्नतः॥ चतुष्पदार्थदं नृणां सर्वसम्पत्प्रदायकम् ॥ १८ ॥ इति धूमावत्यष्टोत्तर शतनामस्तोत्रं समाप्तम् ॥ अथ धूमावतीसहस्रनामस्तोत्रप्रारंभः ॥ श्रीभैरव्युवाच ॥ धूमावत्या धर्म्मरात्र्याः कथयस्व महेश्वर ॥ सहस्र नामस्तोत्रं मे सर्वसिद्धिप्रदायकम् ॥ १ ॥ श्रीभैरव उवाच ॥ शृणु देवि महामाये प्रिये प्राणस्वरूपिणि ॥ सहस्रनामस्तोत्रं मे भवशत्रु विनाशनम् ॥२॥ ॐ अस्य श्रीधूमावतीसहस्रनामस्तोत्रस्य पिप्पलाद ऋषिः । पंक्तिश्छंदः । धूमावती देवता । शत्रुविनिग्रहे पाठे विनि योगः ॥ धूमा धूमवती धूमा धूमपानपरायणा ॥ धौता धौतगिरा धाम्नी धूमेश्वरनिवासिनी ॥ ३ ॥ अनंताऽनंतरूपा च अकाराकार रूपिणी ॥ आद्या आनन्ददा नंदा इकारा इन्द्ररूपिणी ॥४ ॥ धनधान्यार्थवाणीदा यशोधर्म्मप्रियेष्टदा ॥ भाग्यसौभाग्यभक्तिस्था गृहपर्वत वासिनी ॥ ५ ॥ रामरावणसुग्रीवमोहदा हनुमत्प्रिया ॥ वेदशास्त्रपुराणज्ञा ज्योतिश्छंदःस्वरूपिणी ॥ ६ ॥ चातुर्य्यचारुरुचिरा रंजनप्रेम तोषदा ॥ कमलास्या सुधावक्त्रा चन्द्रहासा स्मितानना ॥ ७ ॥ चतुरा चारुकेशी च चतुर्वर्गप्रदा मुदा ॥ कला कलाधरा धीरा धारिणी वसुनीरदा ॥ ८ ॥ हीरा हीरकवर्णाभा हरिणायतलोचना ॥ दंभमोहक्रोधलोभस्नेहद्वेषहरा परा ॥ ९ ॥ नरदेवकरी रामा रामानन्द मनोहरा ॥ योगभोगक्रोधलोभहरा हरनमस्कृता ॥ १० ॥ दानमानज्ञानमानपानगानसुखप्रदा ॥ गजगोऽश्वपदा गंजा भूतिदा भूत नाशिनी ॥ ११ ॥ भवभावा तथा बाला वरदा हरवल्लभा ॥ भगभंगभया माला मालतीमालना हृदा ॥ १२ ॥ जालवालहालकाल कपालप्रियवादिनी ॥ करंजशीलगुंजाढ्या चूतांकुरनिवासिनी ॥ १३ ॥ पनसस्था पानसक्ता पनशेशकुटुम्बिनी॥ पावनी पावनाधारा पूर्णा पूर्णमनोरथा ॥ १४ ॥ पूता पूतकला पौरा पुराणसुरसुन्दरी ॥ परेशी परदा पारा परमात्मा प्रमोहिनी ॥ १५ ॥ जगन्माया जगत्कर्त्री जगत्कीर्तिर्जगन्मयी ॥ जननी जयिनी जायाजिता जिनजयप्रदा ॥ १६ ॥ कीर्तिज्ञानध्यानमानदायिनी दानवेश्वरी ॥ काव्यव्याकरणज्ञा काप्रज्ञा प्रज्ञानदायिनी ॥ १७ ॥ विज्ञाज्ञा विज्ञजयदा विज्ञा विज्ञप्रपूजिता ॥ परावरेज्या वरदा पारदा शारदा दरा ॥ १८ ॥ दारिणी देवदूती च दमना दमनामदा ॥ परमज्ञानगम्या च परेशी परगा परा ॥ १९ ॥ यज्ञा यज्ञप्रदा यज्ञज्ञान

कार्य्यकरी शुभा ॥ शोभिनी शुम्भमथिनी निशुंभासुरमर्दिनी ॥ २० ॥ शांभवी शंभुपत्नी च शंभुजाया शुभानना ॥ शांकरी शंकराराध्या संध्यासंध्यासुधर्मिणी ॥ २१ ॥ शत्रुघ्नी शत्रुहा शत्रुप्रदा शात्रवनाशिनी ॥ शैवी शिवलया शैला शैलराजप्रिया सदा ॥ २२ ॥ शर्वरी शर्वरी शंभुः सुधाढ्या सौधवासिनी ॥ सगुणा गुणरूपा च गौरवी भैरवारवा ॥ २३ ॥ गौरांगी गौरदेहा च गौरी गुरुमती गुरुः ॥ गौर्गौर्गव्यस्वरूपा च गुणानन्दस्वरूपिणी ॥ २४ ॥ गणेशगणदा गुण्या गुणा गौरववांछिता ॥ गणमाता गणाराध्या गणकोटि विनाशिनी ॥ २५ ॥ दुर्गा दुर्जनहंत्री च दुर्जनप्रीतिदायिनी ॥ स्वर्गापवर्गदा दात्री दीना दीनदयावती ॥ २६ ॥ दुर्निरीक्ष्या दुरा दुःस्था दौःस्थ्यभंजनकारिणी ॥ श्वेतपाण्डुरकृष्णाभा कालदा कालनाशिनी ॥ २७ ॥ कर्मनर्मकरी नर्मा धर्माधर्मविनाशिनी ॥ गौरी गौरवदा गोदा गणदा गायनप्रिया ॥ २८ ॥ गङ्गा भागीरथी भंगा भगा भाग्यविवर्द्धिनी ॥ भवानी भवहंत्री च भैरवी भैरवासना ॥ २९ ॥ भीमा भीमरवा भैमी भीमानन्दप्रदायिनी ॥ शरण्या शरणा शम्या शशिनी शंखनाशिनी ॥ ३० ॥ गुणा गुणकरी गौणी प्रिया प्रीतिप्रदायिनी ॥ जनमोहनकर्त्री च जगदानन्ददायिनी ॥ ३१ ॥ जिता जाया च विजयाविजया जयदायिनी ॥ कामा काली करालास्या खर्वा खञ्जा खरागदा ॥ ३२ ॥ गर्वा गरुत्मती घर्मा घर्घरा घोरनादिनी ॥ चराचरी चराराध्या च्छिन्ना छिन्नमनोरथा ॥ ३३ ॥ छिन्नमस्ता जया जाप्या जगज्जाया च झर्झरी ॥ झकारा झीष्कृतिष्टीका टंका टंकारनादिनी ॥ ३४ ॥ ठीका ठक्कुरठक्कांगी ठठठांकारढुण्ढुरा ॥ ढुण्ढीता राजतीर्णा च तालस्था भ्रमनाशिनी ॥ ३५ ॥ थकारा थकरादात्री दीपा दीपविनाशिनी ॥ धन्या धना धनवती नर्मदा नर्ममोदिनी ॥ ३६ ॥ पद्मा पद्मावती पीता स्फीता फूत्कारकारिणी ॥ फुल्ला ब्रह्ममयी ब्राह्मी ब्रह्मानन्दप्रदायिनी ॥ ३७ ॥ भवाराध्या भवाध्यक्षा भगाली मन्दगामिनी ॥ मदिरा मदिरेक्षा च यशोदा यमपूजिता ॥ ३८ ॥ याम्या राम्या रामरूपा रमणी ललिता लता ॥ लंकेशी वाक्प्रदा वाच्या सदाश्रमनिवासिनी ॥ ३९ ॥ श्रांता शकाररूपा च षकारा खरवाहना ॥ सह्याद्रिरूपा सानन्दा हरिणी हरिरूपिणी ॥ ४० ॥ हराराध्या बालवा च लवंगप्रेमतोषिता ॥ क्षपा क्षयप्रदा क्षीरा अकारादिस्वरूपिणी ॥ ४१ ॥ कालिक

कालमूर्तिश्च कलहा कलहप्रिया ॥ शिवा शंदायिनी सौम्या शत्रुनिग्रहकारिणी ॥ ४२ ॥ भवानी भवमूर्तिश्च शर्वाणी सर्वमंगला ॥ शत्रुविद्राविणी शैवी शुंभासुरविनाशिनी ॥ ४३ ॥ धकारमंत्ररूपा च धूंबीजपरितोषिता ॥ धनाध्यक्षसुता धीरा धरारूपा धरावती ॥ ॥ ४४ ॥ चर्विणी चन्द्रपूज्या च च्छन्दोरूपा छटावती ॥ छाया छायावती स्वच्छा छेदिनी भेदिनी क्षमा ॥ ४५ ॥ वल्गिनी वर्द्धिनी वंद्या वेदमाता बुधस्तुता ॥ धारा धारावती धन्या धर्मदानपरायणा ॥ ४६ ॥ गर्भिणी गुरुपूज्या च ज्ञानदात्री गुणान्विता ॥ धर्मिणी धर्मरूपा च घण्टानादपरायणा ॥ ४७ ॥ घण्टानिनादिनी घूर्णा घूर्णिता घोररूपिणी ॥ कलिघ्नी कलिदूती च कलिपूज्या कलिप्रिया ॥ ४८ ॥ कालनिर्णाशिनी काल्या काव्यदा कालरूपिणी ॥ वर्षिणी वृष्टिदा वृष्टिर्महावृष्टिनिवारिणी ॥ ४९ ॥ घातिनी घाटिनी घोण्टा घातकी घनरूपिणी ॥ धूंबीजा धूंजपा नन्दा धूंबीजजपतोषिता ॥ ५० ॥ धूंधूंबीजजपासक्ता धूंधूंबीजपरायणा ॥ धूंकारहर्षिणी धूमा धनदा धनगार्विता ॥ ५१ ॥ पद्मावती पद्ममाला पद्मयोनिप्रपूजिता ॥ अपारा पर्णपूर्णा तु पूर्णिमापरिवन्दिता ॥ ॥ ५२ ॥ फलदा फलभोक्त्री च फलिनी फलदायिनी ॥ फूत्कारिणी फलावाप्त्री फलभोक्त्री फलान्विता ॥ ५३ ॥ वारिणी वारणप्रीता वारिपाथोधिपारगा ॥ विवर्णा धूम्रनयना धूम्राक्षी धूम्ररूपिणी ॥ ५४ ॥ नीतिर्नीतिस्वरूपा च नीतिज्ञा नयकोविदा ॥ तारिणीताररूपा च तत्त्वज्ञानपरायणा ॥ ५५ ॥ स्थूला स्थूलाधरा स्थात्री उत्तमस्थानवासिनी ॥ स्थूला पद्मपदस्थाना स्थानभ्रष्टा स्थलस्थिता ॥ ५६ ॥ शोषिणी शोभिनी शांता शीतपानीयपायिनी ॥ शारिणी शांखिनी शुद्धा शंखासुरविनाशिनी ॥ ५७ ॥ शर्वरी शर्वरीपूज्या शर्वरीशप्रपूजिता ॥ शर्वरीजागृता योग्या योगिनी योगिवंदिता ॥ ५८ ॥ योगिनीगणसंसेव्या योगिनीयोगभाविता ॥ योगमार्गरता युक्ता योगमार्गानुसारिणी ॥ ५९ ॥ योगभावा योगयुक्ता यमिनीपतिवन्दिता ॥ अयोग्या योधिनी योद्धी युद्धकर्मविशारदा ॥ ६० ॥ युद्धमार्गरतानंता युद्धस्थाननिवासिनी ॥ सिद्धा सिद्धेश्वरी सिद्धिः सिद्धिगेहनिवासिनी ॥ ॥ ६१ ॥ सिद्धरीतिः सिद्धप्रीतिः सिद्धा सिद्धांतकारिणी ॥ सिद्धगम्या सिद्धपूज्या सिद्धवंद्या सुसिद्धिदा ॥ ६२ ॥ साधिनी

साधनप्रीता साध्या साधनकारिणी ॥ साधनीया साध्यसाध्या साध्यसंघसुशोभिनी ॥ ६३ ॥ साध्वी साधुस्वभावा सा साधुसंतति दायिनी ॥ साधुपूज्या साधुवंद्या साधुसंदर्शनोद्यता ॥ ६४ ॥ साधुदृष्टा साधुपृष्टा साधुपोषणतत्परा ॥ सात्त्विकी सत्त्वसंसिद्धा सत्त्वसेव्या सुखोदया ॥ ६५ ॥ सत्त्ववृद्धिकरी शांता सत्त्वसंहर्षमानसा ॥ सत्त्वज्ञाना सत्त्वविद्या सत्त्वसिद्धांतकारिणी ॥ ६६ ॥ सत्त्ववृद्धिः सत्त्व सिद्धिः सत्त्वसम्पन्नमानसा ॥ चारुरूपा चारुदेहा चारुचञ्चललोचना ॥ ६७ ॥ छद्मिनी छद्मसंकल्पा छद्मवार्ता क्षमाप्रिया ॥ हठिनी हठसम्प्रीतिर्हठवार्त्ता हठोद्यमा ॥ ६८ ॥ हठकार्य्या हठधर्म्मा हठकर्मपरायणा ॥ हठसम्भोगनिरता हठात्काररतिप्रिया ॥ ॥ ६९ ॥ हठसंभेदिनी हृद्या हृद्यवार्ता हरिप्रिया ॥ हरिणी हरिणीदृष्टिर्हरिणीमांसभक्षणा ॥ ७० ॥ हरिणाक्षी हरिणपा हरिणीगण हर्षदा ॥ हरिणीगणसंहंत्री हरिणीपरिपोषिका ॥ ७१ ॥ हरिणीमृगयासक्ता हरिणीमानपुरःसरा ॥ दीना दीनकृतिर्दूना द्राविणी द्रविण प्रदा ॥ ७२ ॥ द्रविणाचलसंवासा द्रविता द्रव्यसंयुता ॥ दीर्घा दीर्घपदा दृश्या दर्शनीया दृढाकृतिः ॥ ७३ ॥ दृढा दुष्टमतिर्दुष्टा द्वेषिणी द्वेषिभंजिनी ॥ दोषिणी दोषसंयुक्ता दुष्टशत्रुविनाशिनी ॥ ७४ ॥ देवतार्तिहरा दुष्टदैत्यसंघविदारिणी ॥ दुष्टदानवहंत्री च दुष्टदैत्य निषूदिनी ॥ ७५ ॥ देवताप्राणदा देवी देवदुर्गतिनाशिनी ॥ नटनायकसंसेव्या नर्त्तकी नर्त्तकप्रिया ॥ ७६ ॥ नाट्यविद्या नाट्य कर्त्री नादिनी नादकारिणी ॥ नवीना नूतना नव्या नवीनवस्त्रधारिणी ॥ ७७ ॥ नव्यभूषा नव्यमाल्या नव्यालंकारशोभिता ॥ नकार वादिनी नम्या नवभूषणभूषिता ॥ ७८ ॥ नीचमार्गा नीचभूमिर्नीचमार्गगतिर्गतिः ॥ नाथसेव्या नाथभक्ता नाथानंदप्रदायिनी ॥ ॥ ७९ ॥ नम्रा नम्रगतिर्नेत्री निदानवाक्यवादिनी ॥ नारीमध्यस्थिता नारी नारीमध्यगताऽनघा ॥ ८० ॥ नारीप्रीतिर्नराराध्या नर नामप्रकाशिनी ॥ रती रतिप्रिया रम्या रतिप्रेमा रतिप्रदा ॥ ८१ ॥ रतिस्थानस्थिताऽऽराध्या रतिहर्षप्रदायिनी ॥ रतिरूपा रति ध्याना रतिरीतिसुधारिणी ॥ ८२ ॥ रतिरासमहोल्लासा रतिरासविहारिणी ॥ रतिकांतस्तुता राशी राशिरक्षणकारिणी ॥ ८३ ॥ अरूपा शुद्धरूपा च सुरूपा रूपगर्विता ॥ रूपयौवनसम्पन्ना रूपराशी रमावती ॥ ८४ ॥ रोधिनी रोषिणी रुष्टा रोषिरुद्धा रसप्रदा ॥

मादिनी मदनप्रीता मधुमत्ता मधुप्रदा ॥ ८५ ॥ मद्यपा मद्यपध्येया मद्यपप्राणरक्षिणी ॥ मद्यपानन्ददात्री च मद्यपप्रेमतोषिता ॥ ८६ ॥
मद्यपानरता मत्ता मद्यपानविहारिणी ॥ मदिरा मदिरारक्ता मदिरापानहर्षिणी ॥ ८७ ॥ मदिरापानसंतुष्टा मदिरापानमोहिनी ॥
मदिरामानसा मुग्धा माध्वीपा मदिराप्रदा ॥ ८८ ॥ माध्वीदानसदानन्दा माध्वीपानरता सदा ॥ मोदिनी मोदसंदात्री मुदिता मोद
मानसा ॥ ८९ ॥ मोदकर्त्री मोददात्री मोदमङ्गलकारिणी ॥ मोदकादानसंतुष्टा मोदकग्रहणक्षमा ॥ ९० ॥ मोदकालब्धिसंक्रुद्धा
मोदकप्राप्तितोषिणी ॥ मांसादा मांससंभक्षा मांसभक्षणहर्षिणी ॥ ९१ ॥ मांसपाकपरप्रेमा मांसपाकालयस्थिता ॥ मत्स्यमांसकृतास्वादा
मकारपञ्चकाचिता ॥ ९२ ॥ मुद्रा मुद्रान्विता माता महामोहा मनस्विनी ॥ मुद्रिका मुद्रिकायुक्ता मुद्रिकाकृतलक्षणा ॥ ९३ ॥ मुद्रिका
लंकृता माद्री मन्दराचलवासिनी ॥ मन्दराचलसंसेव्या मन्दराचलवासिनी ॥ ९४ ॥ मन्दरध्येयपादाब्जा मन्दरारण्यवासिनी ॥ मन्दुरा
वासिनी मन्दा मारिणी मारिका मिता ॥ ९५ ॥ महामारी महामारीशमिनी शवसंस्थिता ॥ शवमांसकृताहारा श्मशानालयवासिनी ॥ ९६ ॥
श्मशानसिद्धिसंहृष्टा श्मशानभवनस्थिता ॥ श्मशानशयनागारा श्मशानभस्मलेपिता ॥ ९७ ॥ श्मशानभस्मभीमाङ्गी श्मशा
नावासकारिणी ॥ शामिनी शमनाराध्या शमनस्तुतिवन्दिता ॥ ९८ ॥ शमनाचारसंतुष्टा शमनागारवासिनी ॥ शमनस्वामिनी शांतिः
शांतसज्जनपूजिता ॥ ९९ ॥ शांतपूजापरा शांता शांतागारप्रभोजिनी ॥ शांतपूज्या शांतवंद्या शांतग्रहसुधारिणी ॥ १०० ॥ शांत
रूपा शांतियुक्ता शांतचन्द्रप्रभाऽमला ॥ अमला विमलाऽम्लाना मालतीकुंजवासिनी ॥ १०१ ॥ मालतीपुष्पसंप्रीता मालतीपुष्प
पूजिता ॥ महोग्रा महती मध्या मध्यदेशनिवासिनी ॥ १०२ ॥ मध्यमध्वनिसंप्रीता मध्यमध्वनिकारिणी ॥ मध्यमा मध्यमप्रीति
मध्यमप्रेमपूरिता ॥ १०३ ॥ मध्याङ्गचित्रवसना मध्याखिन्ना महोद्धता ॥ महेन्द्रसुरसम्पूज्या महेन्द्रपरिवन्दिता ॥ १०४ ॥
महेन्द्रजालसंयुक्ता महेन्द्रजालकारिणी ॥ महेन्द्रमानिता मान्या मानिनीगणमध्यगा ॥ १०५ ॥ मानिनीमानसंप्रीता मानविध्वंस
कारिणी ॥ मानिन्याकर्षिणी मुक्तिर्मुक्तिदात्री सुमुक्तिदा ॥ १०६ ॥ मुक्तिद्वेषकरी मूल्यकारिणी मूल्यहारिणी ॥ निर्मूला मूल

संयुक्ता मूलिनी मूलमंत्रिणी ॥ १०७ ॥ मूलमंत्रकृतार्हाद्या मूलमंत्रार्घहर्षिणी ॥ मूलमंत्रप्रतिष्ठात्री मूलमंत्रप्रहर्षिणी ॥ १०८ ॥ मूलमंत्रप्रसन्नास्या मूलमंत्रप्रपूजिता ॥ मूलमंत्रप्रणेत्री च मूलमंत्रकृतार्चना ॥ १०९ ॥ मूलमंत्रप्रहृष्टात्मा मूलविद्या मलापहा ॥ विद्याऽविद्या वटस्था च वटवृक्षनिवासिनी ॥ ११० ॥ वटवृक्षकृतस्थाना वटपूजापरायणा ॥ वटपूजापरिप्रीता वटदर्शनलालसा ॥ ॥ १११ ॥ वटपूजाकृताह्लादा वटपूजाविवर्द्धिनी ॥ वशिनी विवशाराध्या वशीकरणमंत्रिणी ॥ ११२ ॥ वशीकरणसम्प्रीता वशीकारकसिद्धिदा ॥ बटुका बटुकाराध्या बटुकाहारदायिनी ॥ ११३ ॥ बटुकार्चापरा पूज्या बटुकार्चाविवर्द्धिनी ॥ बटुकानन्दकर्त्री च बटुकप्राणरक्षिणी ॥ ११४ ॥ बटुकेज्याप्रदाऽपारा पारिणी पार्वतीप्रिया ॥ पर्वताग्रकृतावासा पर्वतेन्द्रप्रपूजिता ॥ ११५ ॥ पार्वतीपातिपूज्या च पार्वतीपतिहर्षदा ॥ पार्वतीपतिबुद्धिस्था पार्वतीपतिमोहिनी ॥ ११६ ॥ पार्वतीयद्विजाराध्या पर्वतस्था प्रतारिणी ॥ पद्मला पद्मिनी पद्मा पद्ममालाविभूषिता ॥ ११७ ॥ पद्मजाढ्यपदा पद्ममालालंकृतमस्तका ॥ पद्मार्चितपदद्वंद्वा पद्महस्ता पयोधिजा ॥ ११८ ॥ पयोधिपारगंत्री च पयोधिपरिकीर्त्तिता ॥ पाथोधिपारगा पूता पल्वलांबुप्रतर्पिता ॥ ११९ ॥ पल्वलांतःपयोमग्ना पवमानगतिर्गतिः ॥ पयःपाना पयोदात्री पानीयपरिकांक्षिणी ॥ १२० ॥ पयोजमालाभरणा मुण्डमालाविभूषणा ॥ मुण्डिनी मुण्डहंत्री च मुण्डिता मुण्डशोभिता ॥ १२१ ॥ मणिभूषा मणिग्रीवा मणिमालाविराजिता ॥ महामोहा महाशौर्या महामाया महाहवा ॥ १२२ ॥ मानवी मानवीपूज्या मनुवंशविवर्द्धिनी ॥ मठिनी मठसंहंत्री मठसम्पत्तिहारिणी ॥ १२३ ॥ महाक्रोधवती मढा मूढशत्रुविनाशिनी ॥ पाठीनभोजिनी पूर्णा पूर्णहारविहारिणी ॥ १२४ ॥ प्रलयानलतुल्याभा प्रलयानलरूपिणी ॥ प्रलयार्णवसंमग्ना प्रलयाब्धिविहारिणी ॥ १२५ ॥ महाप्रलयसंभूता महाप्रलयकारिणी ॥ महाप्रलयसंप्रीता महाप्रलयसाधिनी ॥ १२६ ॥ महाप्रलयसंपज्या महाप्रलयमोदिनी ॥ छेदिनी च्छिन्नमुण्डोग्रा छिन्ना छिन्नरुहार्थिनी ॥ १२७ ॥ शत्रुसंछेदिनी छन्ना क्षोदिनी क्षोदकारिणी ॥ लक्षिणी लक्षसंपूज्या लक्षिता लक्षणान्विता ॥ १२८ ॥ लक्षशस्त्रसमायुक्ता लक्षबाणप्रमोचिनी ॥ लक्षपूजापरा

ऽलक्ष्या लक्षकोदण्डखण्डिनी ॥ १२९ ॥ लक्षकोदण्डसंयुक्ता लक्षकोदण्डधारिणी ॥ लक्षलीलालया लभ्या लक्षागारनिवासिनी ॥ ॥ १३० ॥ लक्षलोभपरा लोला लक्षभक्तप्रपूजिता ॥ लोकिनी लोकसंपूज्या लोकरक्षणकारिणी ॥ १३१ ॥ लोकवन्दित पादाब्जा लोकमोहनकारिणी ॥ ललिता लालिता लीना लोकसंहारकारिणी ॥ १३२ ॥ लोकलीलाकरी लोक्या लोकसंभव कारिणी ॥ भूतशुद्धिकरी भूतरक्षिणी भूतपोषिणी ॥ १३३ ॥ भूतवेतालसंयुक्ता भूतसेनासमावृता ॥ भूतप्रेतपिशाचादिस्वामिनी भूत पूजिता ॥ १३४ ॥ डाकिनी शाकिनी डेया डिण्डिमारावकारिणी ॥ डमरुवाद्यसंतुष्टा डमरुवाद्यकारिणी ॥ १३५ ॥ हूंकारकारिणी होत्री हविनी हवनार्थिनी ॥ हासिनी ह्वासिनी हास्यहर्षिणी हठवादिनी ॥ १३६ ॥ अट्टाट्टहासिनी टीका टीकानिर्माणकारिणी ॥ टंकिनी टंकिता टंका टंकामात्रसुवर्णदा ॥ १३७ ॥ टंकारिणी टकाराढ्या शत्रुत्रोटनकारिणी ॥ त्रुटिता त्रुटिरूपा च त्रुटिसंदेहकारिणी ॥ ॥ १३८ ॥ तर्षिणी तृट्परिक्रांता क्षुत्क्षामा क्षुत्परिप्लुता ॥ अक्षिणी तक्षिणी भिक्षाप्रार्थिनी शत्रुभक्षिणी ॥ १३९ ॥ कांक्षिणी कुट्टिनी क्रूरा कुट्टिनीवेश्मवासिनी ॥ कुट्टिनीकोटिसंपूज्या कुट्टिनीकुलमार्गिणी ॥ १४० ॥ कुट्टिनीकुलसंरक्षा कुट्टिनीकुलरक्षिणी ॥ कालपाशावृता कन्या कमारीपूजनप्रिया ॥ १४१ ॥ कौमुदी कौमुदीहृष्टा करुणादृष्टिसंयुता ॥ कौतुकाचारनिपुणा कौतुकागार वासिनी ॥ १४२ ॥ काकपक्षधरा काकरक्षिणी काकसंवृता ॥ काकांकरथसंस्थाना काकांकस्यन्दनस्थिता ॥ १४३ ॥ काकिनी काकदृष्टिश्च काकभक्षणदायिनी ॥ काकमाता काकयोनिः काकमण्डलमण्डिता ॥ १४४ ॥ काकदर्शनसंशीला काकसंकीर्णमन्दिरा ॥ काकध्यानस्थदेहादिध्यानगम्याऽधमावृता ॥ १४५ ॥ धनिनी धनिसंसेव्या धनच्छेदनकारिणी ॥ धुंधुरा धुंधुराकारा धूम्रलोचन घातिनी ॥ १४६ ॥ धूंकारिणी च धूंमंत्रपूजिताधर्मनाशिनी ॥ धूम्रवर्णा च धूम्राक्षी धूम्राक्षासुरघातिनी ॥ १४७ ॥ धूंबीजजप संतुष्टा धूंबीजजपमानसा ॥ धूंबीजजपपूजार्हा धूंबीजजपकारिणी ॥ १४८ ॥ धूंबीजकर्षिता धृष्या धर्षिणी धृष्टमानसा ॥ धूलि प्रक्षेपिणी धूलिव्याप्तधम्मिल्लधारिणी ॥ १४९ ॥ धूंबीजजपमालाढ्या धूंबीजानिन्दकांतका ॥ धर्मविद्वेषिणी धर्मरक्षिणी धर्मतोषिता ॥

॥ १५० ॥ धारास्तंभकरी धूर्ता धारावारिविलासिनी ॥ धांधींधूंधैंमंत्रवर्णा धौंधः स्वाहास्वरूपिणी ॥ १५१ ॥ धारित्रीपूजिता
धूर्वा धान्यच्छेदनकारिणी ॥ धिक्कारिणी सुधीपूज्या धामोद्याननिवासिनी ॥ १५२ ॥ धामोद्यानपयोदात्री धामधूलिप्रधूलिता ॥
महाध्वनिमती धूप्या धूपामोदप्रहर्षिणी ॥ १५३ ॥ धूपादानमतिप्रीता धूपदानविनोदिनी ॥ धीवरीगणसंपूज्या धीवरीवरदायिनी ॥
॥ १५४ ॥ धीवरीगणमध्यस्था धीवरीधामवासिनी ॥ धीवरीगणगोप्त्री च धीवरीगणतोषिता ॥ १५५ ॥ धीवरीधनधात्री च
धीवरीप्राणरक्षिणी ॥ धात्रीशा धातृसंपूज्या धात्रीवृक्षसमाश्रया ॥ १५६ ॥ धात्रीपूजनकर्त्री च धात्रीरोपणकारिणी ॥ धूम्रपान
रतासक्ता धूम्रपानरतेष्टदा ॥ १५७ ॥ धूम्रपानकरानन्दा धूम्रवर्षणकारिणी ॥ धन्यशब्दश्रुतिप्रीता धुंधुकारिजनच्छिदा ॥ १५८ ॥
धुंधुकारीष्टसंदात्री धुंधुकारिसुमुक्तिदा ॥ धुंधुकार्य्याराध्यरूपा धुंधुकारिमनःस्थिता ॥ १५९ ॥ धुंधुकारिहिताकांक्षी धुंधुकारिहितै
षिणी ॥ धिंधिमाराविणी ध्यात्री ध्यानगम्या धनार्थिनी ॥ १६० ॥ धोरिणी धोरणप्रीता घोरिणी घोररूपिणी ॥ धरित्रीरक्षिणी
देवी धराप्रलयकारिणी ॥ १६१ ॥ धराधरसुताऽशेषधाराधरसमद्युतिः ॥ धनाध्यक्षा धनप्राप्तिर्द्धनधान्यविवर्द्धिनी ॥ १६२ ॥
धनाकर्षणकर्त्री च धनाहरणकारिणी ॥ धनच्छेदनकर्त्री च धनहीना धनप्रिया ॥ १६३ ॥ धनसंवृद्धिसंपन्ना धनदानपरायणा ॥
धनहृष्टा धनपुष्टा दानाध्ययनकारिणी ॥ १६४ ॥ धनरक्षा धनप्राणा धनानंदकरी सदा ॥ शत्रुहंत्री शवारूढा शत्रुसंहारकारिणी ॥
॥ १६५ ॥ शत्रुपक्षक्षतिप्रीता शत्रुपक्षनिषूदिनी ॥ शत्रुग्रीवाच्छिदा छाया शत्रुपद्धतिखण्डिनी ॥ १६६ ॥ शत्रुप्राणहरा हार्य्या
शत्रून्मूलनकारिणी ॥ शत्रुकार्य्यविहंत्री च सांगशत्रुविनाशिनी ॥ १६७ ॥ सांगशत्रुकुलच्छेत्री शत्रुसद्मप्रदाहिनी ॥ सांगसायुध
सर्वारिसर्वसम्पत्तिनाशिनी ॥ १६८ ॥ सांगसायुधसर्वारिदेहगेहप्रदाहिनी ॥ इतीदं धूमरूपिण्याः स्तोत्रं नामसहस्रकम् ॥ १६९ ॥
यः पठेच्छून्यभवने संध्यांते यतमानसः ॥ मदिरामोदयुक्तो वै देवीध्यानपरायणः ॥ १७० ॥ तस्य शत्रुः क्षयं याति यदि शक्र
समोऽपि वै ॥ भवपाशहरं पुण्यं धूमावत्याः प्रियं महत् ॥ १७१ ॥ स्तोत्रं सहस्रनामाख्यं मम वक्राद्विनिर्गतम् ॥ पठेद्वा शृणुया

द्वापि शत्रुघातकरो भवेत् ॥ १७२ ॥ न देयं परशिष्यायाऽभक्ताय प्राणवल्लभे ॥ देयं शिष्याय भक्ताय देवीभक्तपराय च ॥ इदं रहस्यं परमं दुर्लभं दुष्टचेतसाम् ॥ १७३ ॥ इति श्रीभैरवीतंत्रे भैरवीभैरवसंवादे धूमावतीसहस्रनामस्तोत्रं समाप्तम् ॥


॥ अथ धूमावतीहृदयप्रारंभः॥ॐ अस्य श्रीधूमावतीहृदयस्तोत्रमंत्रस्य पिप्पलाद ऋषिः । अनुष्टुप्छंदः । श्रीधूमावती देवता । धूं बीजम् । ह्रीं शक्तिः । क्लीं कीलकम् । सर्वशत्रुसंहरणे पाठे विनियोगः ॥ ॐ धां हृदयाय नमः १ । ॐ धीं शिरसे स्वाहा २ । ॐ धूं शिखायै वषट् ३ । ॐ धैं कवचाय हुम् ४ । ॐ धौं नेत्रत्रयाय वौषट् ५ । ॐ धः अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ एवमेव करन्यासं कुर्यात् ॥ अथ ध्यानम्—ॐ धूम्राभां धूम्रवस्त्रां प्रकटितदशनां मुक्तवालांबराढ्यां काकांकस्यन्दनस्थां धवलकरयुगां शूर्पहस्तातिरूक्षाम्॥ नित्यं क्षुत्क्षामदेहां मुहुरतिकुटिलां वारिवांछाविचित्रां ध्यायेद्धूमावतीं वामनयनयुगलां भीतिदां भीषणास्याम् ॥ १ ॥ कल्पादौ या कालिकाद्याऽचीकलन्मधुकैटभौ ॥ कल्पांते त्रिजगत्सर्वं धूमावतीं भजामि ताम् ॥ २ ॥ गुणागाराऽगम्यगुणा या गुणागुणवर्द्धिनी ॥ गीतावेदार्थतत्त्वज्ञैर्धूमावतीं भजामि ताम् ॥ ३ ॥ खट्वांगधारिणी खर्वा खण्डिनीखलरक्षसाम् ॥ धारिणी खेटकस्यापि धूमावतीं भजामि ताम् ॥ ४ ॥ घूर्णा घूर्णकरा घोरा घूर्णिताक्षी घनस्वना ॥ घातिनी घातकानां या धूमावतीं भजामि ताम् ॥ ५ ॥ चर्वंती मस्थिखण्डानां चण्डमुण्डविदारिणीम् ॥ चण्डाट्टहासिनीं देवीं भजे धूमावतीमहम् ॥ ६ ॥ छिन्नग्रीवां क्षताच्छन्नां छिन्नमस्तस्वरूपिणीम् ॥ छेदिनीं दुष्टसंघानां भजे धूमावतीमहम् ॥ ७ ॥ जाता या याचिता देवैरसुराणां विघातिनी ॥ जल्पंती बहु गर्जंती भजे तां धूम्ररूपिणीम् ॥ ८ ॥ झंकारकारिणीं झंझां झंझमाझमवादिनीम् ॥ झटित्याकर्षिणीं देवीं भजे धूमावतीमहम् ॥ ९ ॥ टीपटंकार संयुक्तां धनुष्टंकारकारिणीम् ॥ घोरां घनघटाटोपां वंदे धूमावतीमहम् ॥ १० ॥ ठंठंठंठंमनुप्रीतिं ठःठःमंत्रस्वरूपिणीम् ॥ ठमकाह्वगति प्रीतां भजे धूमावतीमहम् ॥ ११ ॥ डमरूडिंडिमारावां डाकिनीगणमण्डिताम् ॥ डाकिनीभोगसंतुष्टां भजे धूमावतीमहम् ॥ १२ ॥ ढक्कानादेन संतुष्टां ढक्कावादकसिद्धिदाम् ॥ ढक्कावादचलच्चित्तां भजे धूमावतीमहम् ॥ १३ ॥ तत्त्ववार्त्ताप्रियप्राणां भवपाथोधितारिणीम् ॥ तारस्वरूपिणीं तारां भजे धूमावतीमहम् ॥ १४ ॥ थांथींथूंथेंमंत्ररूपां थैंथौंथंथः स्वरूपिणीम् ॥ थकारवर्णसर्वस्वां भजे धूमा


वतीमहम् ॥ १५ ॥ दुर्गास्वरूपिणीं देवीं दुष्टदानवदारिणीम् ॥ देवदैत्यकृतध्वंसां वंदे धूमावतीमहम् ॥ १६ ॥ ध्वांताकारांधकध्वंसां
मुक्तधर्म्मिल्लधारिणीम् ॥ धूमधाराप्रभां धीरां भजे धूमावतीमहम् ॥ १७ ॥ नर्तकीनटनप्रीतां नाट्यकर्म्मविवर्द्धिनीम् ॥ नारसिंहीं
नराराध्यां नौमि धूमावतीमहम् ॥ १८ ॥ पार्वतीपतिसंपूज्यां पर्वतोपरिवासिनीम् ॥ पद्मारूपां पद्मपूजां नौमि धूमावतीमहम् ॥ १९ ॥
फूत्कारसहितश्वासां फट्मंत्रफलदायिनीम् ॥ फेत्कारिगणसंसेव्यां सेवे धूमावतीमहम् ॥ २० ॥ बलिपूज्यां बलाराध्यां बगला
रूपिणीं वराम् ॥ ब्रह्मादिवंदितां विद्यां वंदे धूमावतीमहम् ॥ २१ ॥ भव्यरूपां भवाराध्यां भुवनेशीस्वरूपिणीम् ॥ भक्तभव्यप्रदां देवीं
भजे धूमावतीमहम् ॥ २२ ॥ मायां मधुमतीं मान्यां मकरध्वजमानिताम् ॥ मत्स्यमांसमहास्वादां मन्ये धूमावतीमहम् ॥ २३ ॥ योग
यज्ञप्रसन्नास्यां योगिनीपरिसेविताम् ॥ यशोदां यज्ञफलदां यजे धूमावतीमहम् ॥ २४ ॥ रामाराध्यपदद्वंद्वां रावणध्वंसकारिणीम् ॥ रमेश
रमणीं पूज्यामहं धूमावतीं श्रये ॥ २५ ॥ लक्षलीलाकलालक्ष्यां लोकवंद्यपदांबुजाम् ॥ लंबितां बीजकोशाढ्यां वंदे धूमावतीमहम् ॥
॥ २६ ॥ बकपूज्यपदांभोजां बकध्यानपरायणाम् ॥ बालां बकारिसंध्येयां वंदे धूमावतीमहम् ॥ २७ ॥ शांकरीं शंकरप्राणां संकट
ध्वंसकारिणीम् ॥ शत्रुसंहारिणीं शुद्धां श्रये धमावतीमहम् ॥ २८ ॥ षडाननारिसंहंत्रीं षोडशीरूपधारिणीम् ॥ षड्रसास्वादिनीं
सौम्यां सेवे धूमावतीमहम् ॥ २९ ॥ सुरसेवितपादाब्जां सुरसौख्यप्रदायिनीम् ॥ सुन्दरीगणसंसेव्यां सेवे धूमावतीमहम् ॥ ३० ॥
हेरंबजननीं योग्यां हास्यलास्यविहारिणीम् ॥ हारिणीं शत्रुसंघानां सेवे धूमावतीमहम् ॥ ३१ ॥ क्षीरोदतीरसंवासां क्षीरपानप्रहर्षि
ताम् ॥ क्षणदेशेज्यपादाब्जां सेवे धूमावतीमहम् ॥ ३२ ॥ चतुस्त्रिंशद्वर्णकानां प्रतिवर्णादिनामाभिः ॥ कृतं तु हृदयं स्तोत्रं धूमावत्याः
सुसिद्धिदम् ॥ ३३ ॥ य इदं पठति स्तोत्रं पवित्रं पापनाशनम् ॥ स प्राप्नोति परां सिद्धिं धूमावत्याः प्रसादतः ॥ ३४ ॥ पठन्नेकाग्र
चित्तो यो यद्यदिच्छति मानवः ॥ तत्सर्वं समवाप्नोति सत्यं सत्यं वदाम्यहम् ॥ ३५ ॥ इति धूमावतीहृदयं समाप्तम् ॥ इति श्रीमंत्र
महार्णवे मध्यखण्डे धूमावतीतंत्रे दशमस्तरङ्गः ॥ १० ॥ ॥ ॥ ॥ ॥



॥ श्रीगणेशाय नमः ॥ अथ बगलामुखीतंत्रप्रारंभः ॥ तत्रादौ पटलप्रारंभः ॥ अथ प्रवक्ष्ये शत्रूणां स्तंभिनीं बगलामुखीम् ॥ साधकानां हितार्थाय स्तंभनाय च वैरिणाम् ॥ १ ॥ तंत्रांतरेऽपि । ब्रह्मास्त्रं च प्रवक्ष्यामि सद्यः प्रत्ययकारणम् ॥ यस्य स्मरणमात्रेण पवनोऽपि स्थिरायते ॥ २ ॥ मंत्रो यथा मंत्रमहोदधौ–ॐ ह्लीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तंभय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा ॥ इति षट्त्रिंशदक्षरो मंत्रः ॥ अस्य विधानम्–आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम श्रीबगलामुख्यमुकमंत्रसिद्ध्यर्थे श्रीबगलामुखीप्रसादार्थममुकसंख्यापरिमितजपं तत्तद्दशांशेन हवनतर्पणमार्जनब्राह्मणभोजनरूपपुरश्चरणम् (अमुकसंख्यापरिमितजपरूपपुरश्चरणं वा) अहं करिष्ये ॥ इति संकल्प्य । ॐ अस्य श्रीबगलामुखीमंत्रस्य नारदऋषिः । बृहती च्छंदः । बगलामुखी देवता । ह्लीं बीजम् । स्वाहा शक्तिः । ममाखिलावाप्तये जपे विनियोगः ॥ इति जलं क्षिपेत् ॥ ॐ नारदऋषये नमः शिरसि १ । बृहतीच्छंदसे नमः मुखे २ । बगलादेवतायै नमः हृदि ३ । ह्लीं बीजाय नमः गुह्ये ४। स्वाहाशक्तये नमः पादयोः ५ । विनियोगाय नमः सर्वांगे ६ ॥ इति ऋष्यादिन्यासः ॥ ॐ ह्लीं अंगुष्ठाभ्यां नमः १ । बगलामुखि तर्जनीभ्यां नमः २ । सर्वदुष्टानां मध्यमाभ्यां नमः ३ । वाचं मुखं पदं स्तंभय अनामिकाभ्यां नमः ४ । जिह्वां कीलय कनिष्ठिकाभ्यां नमः ५ । बुद्धिं विनाशय ह्लीं ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ॐ ह्लीं हृदयाय नमः १

बगलामुखीपूजनयन्त्रम् ।





बगलामुखि शिरसे स्वाहा २। सर्वदुष्टानां शिखायै वषट् ३। वाचं मुखं पदं स्तंभय कवचाय हुम् ४। जिह्वां कीलय नेत्रत्रयाय वौषट् ५। बुद्धिं विनाशय ह्लीं ॐ स्वाहा अस्त्राय फट् ६॥ इति हृदयादिषडंगन्यासः॥ (तंत्रांतरेऽपि न्यासे विशेषः) मूलं पठित्वा आत्म तत्त्वव्यापिनीं श्रीबगलामुखीपादुकां पूजयामि इति मूलाधारे १ । मूलं पठित्वा विद्यातत्त्वव्यापिनीं श्रीबगलामुखीश्रीपादुकां पूजयामि ति हृदये २। मूलं पठित्वा शिवतत्त्वव्यापिनीं श्रीबगलामुखीश्रीपादुकां पूजयामि इति शिरसि ३। मूलं पठित्वा सर्वतत्त्वव्यापिनीं श्रीबगलामुखीश्रीपादुकां पूजयामि इति सर्वांगे ४ ॥ इति न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम्—ॐ सौवर्णासनसंस्थितां त्रिनयनां पीतां शुकोल्लासिनीं हेमाभांगरुचिं शशांकमुकुटां सच्चंपकस्रग्युताम् ॥ हस्तैर्मुद्गरपाशवज्ररशनाः संबिभ्रतीं भूषणैर्व्याप्तांगीं बगलामुखीं त्रिजगतां संस्तंभिनीं चिंतयेत् ॥ १ ॥ तंत्रांतरेऽपि—मध्येसुधाब्धि मणिमंडपरत्नवेदीसिंहासनोपरिगतां परिपीतवर्णाम् ॥ पीतांबराभरणमाल्यविभूषितांगीं देवीं नमामि धृतमुद्गरवैरिजिह्वाम् ॥ २ ॥ जिह्वाग्रमादाय करेण देवीं वामेन शत्रुं परिपीडयंतीम् ॥ गदाभिघातेन च दक्षिणेन पीतांबराढ्यां द्विभुजां नमामि ॥ ३ ॥ एवं ध्यात्वा मानसोपचारैः संपूज्य पीठपूजां कुर्यात् ॥ तद्यथा—पीठादौ रचिते सर्वतोभद्र मंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य ‘ ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः ’ इति संपूज्य नव पीठशक्तीः पूजयेत् ॥ तद्यथा—पूर्वाद्यष्टसु दिक्षु ॐ जयायै नमः १। ॐ विजयायै नमः २। ॐ अजितायै नमः ३। ॐ अपराजितायै नमः ४। ॐ नित्यायै नमः ४। ॐ विलासिन्यै नमः ६ । ॐ दोग्ध्र्यै नमः ७। ॐ अघोरायै नमः ८। मध्ये । ॐ मंगलायै नमः ९ ॥ इति पीठ शक्तीः पूजयेत् । ततः स्वर्णादिनिर्मितं यंत्रं ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संप्रोञ्छ्य तदुपरि चन्दनागुरुकर्पूरेण पूजनार्थं यंत्रं विलिख्य ‘ॐ ह्लीं बगलामुखीयोगपीठाय नमः’ इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्य्यात् ॥ तद्यथा—ॐ संविन्मये परे देवि परामृतरसप्रिये ॥ अनुज्ञां देहि बगले परिवारार्चनाय मे ॥ इति पठित्वा पुष्पांजलिं दद्यात् ॥ आज्ञां गृहीत्वा

आवरणपूजामारभेत । तत्र त्रिकोणमध्ये ऐशान्यादिक्रमेण ॐ सत्त्वाय नमः । सत्त्वश्रीपादुकां पूजयामि तर्पयामि नमः । इति सर्वत्र १ । ॐ रजसे नमः । रजःश्रीपा० २ । ॐ तमसे नमः । तमःश्रीपा० ३ । इति त्रिगुणान् पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य— ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा विशे षार्घ्यबिंदुं निःक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततः षट्कोणकेसरेषु आग्नेय्यादिचतुर्विदिक्षु मध्ये दिक्षु च ॐ ह्लीं हृदयाय नमः । हृदयश्रीपा० १ । बगलामुखि शिरसे स्वाहा । शिरःश्रीपा० २ । सर्वदुष्टानां शिखायै वषट् । शिखाश्रीपा० ३ । वाचं पदं मुखं स्तंभय कवचाय हुम् । कवचश्रीपा० ४ । जिह्वां कीलय नेत्रत्रयाय वौषट् । नेत्रत्रयश्रीपा० ५ । बुद्धिं विनाशय ह्लीं ॐ स्वाहा अस्त्राय फट् । अस्त्रश्रीपा० ६ ॥ इति षडंगानि पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततोऽष्टदले पूज्यपूजकयोरंतरालं प्राची तदनुसारेण अन्याः दिशः प्रकल्प्य प्राचीक्रमेण ॐ ब्राह्म्यै नमः । ब्राह्मीश्रीपा० १ । माहे श्वर्य्यै नमः । माहेश्वरीश्रीपा० २ । ॐ कौमार्य्यै नमः । कौमारीश्रीपा० ३ । ॐ वैष्णव्यै नमः । वैष्णवीश्रीपा० ४ । ॐ वाराह्यै नमः । वाराहीश्रीपा० ५ । ॐ इन्द्राण्यै नमः । इन्द्राणीश्रीपा० ६ । ॐ चामुंडायै नमः । चामुंडाश्रीपा० ७ । ॐ महालक्ष्म्यै नमः । महालक्ष्मीश्रीपा० ८ ॥ इत्यष्टौ मातरः संपूज्य पुष्पांजलिं दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ तस्योपरि ब्राह्म्यादि समीपे ॐ असितांगभैरवाय नमः । असितांगभैरवश्रीपा० १ । ॐ रुरुभैरवाय नमः । रुरुभैरवश्रीपा० २ । ॐ चंडभैरवाय नमः । चंडभैरवश्रीपा० ३ । ॐ क्रोधभैरवाय नमः । क्रोधभैरवश्रीपा० ४ । ॐ उन्मत्तभैरवाय नमः । उन्मत्तभैरवश्रीपा० ५ । ॐ कपाल भैरवाय नमः । कपालभैरवश्रीपा० ६ । ॐ भीषणभैरवाय नमः । भीषणभैरवश्रीपा० ७ । ॐ संहारभैरवाय नमः । संहारभैरवश्री पा० ८ ॥ इत्यष्टौ भैरवान् पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति चतुर्थावरणम् ॥ ४ ॥ ततः षोडशदलेषु प्राचीक्रमेण ॐ मंगलायै नमः । मंगलाश्रीपा० १ । ॐ स्तंभिन्यै नमः । स्तंभिनीश्रीपा० २ । ॐ जृंभिण्यै नमः । जृंभिणीश्रीपा० ३ । ॐ मोहिन्यै नमः ।

मोहिनीश्रीपादुकां पूजयामि ४। ॐ वश्यायै नमः । वश्याश्रीपा० ५ ॐ बलायै नमः । बलाश्रीपा० ६ । ॐ अचलायै नमः। अचलाश्रीपा० ७ । ॐ भूधरायै नमः । भूधराश्रीपा० ८ । ॐ कल्मषायै नमः । कल्मषाश्रीपादु० ९ । ॐ धात्र्यै नमः । धात्री श्रीपा० १० । ॐ कलनायै नमः । कलनाश्रीपा० ११ । ॐ कालाकर्षिण्यै नमः । कालाकर्षिणीश्रीपा० १२ । ॐ भ्रामिकायै नमः । भ्रामिकाश्रीपा० १३ । ॐ मंदगमनायै नमः । मंदगमनाश्रीपा० १४ । ॐ भोगस्थायै नमः । भोगस्थाश्रीपादु० १५। ॐ भाविकायै नमः । भाविकाश्रीपा० १६ ॥ इति षोडश शक्तीः संपूज्य पुष्पांजलिं दद्यात् ॥ इति पंचमावरणम् ॥ ५ ॥ ततो भूपुराभ्यंतरे पूर्वादिचतुर्दिक्षु ॐ गणपतये नमः । गणपतिश्रीपा० १ । ॐ बटुकाय नमः । बटुकश्रीपा० २ । ॐ योगिनीभ्यो नमः । योगिनीश्रीपा० ३ । ॐ क्षेत्रपालाय नमः । क्षेत्रपालश्रीपा० ४ । इति द्वारपालान् पजयित्वा पुष्पांजलिं दद्यात् ॥ इति षष्ठावरणम् ॥ ६ ॥ ततो भूपुराद्बहिः पूर्वे ॐ लं इन्द्राय नमः। इन्द्रश्रीपा० १ । अग्निकोणे ॐ रं अग्नये नमः । अग्निश्रीपा० २ । दक्षिणे ॐ मं यमाय नमः । यमश्रीपा० ३ । निर्ऋतिकोणे ॐ क्षं निर्ऋतये नमः । निर्ऋतिश्रीपा० ४ । पश्चिमे ॐ वं वरुणाय नमः । वरुणश्रीपा० ५ । वायुकोणे ॐ यं वायवे नमः । वायुश्रीपा० ६ । उत्तरे ॐ कुं कुबेराय नमः । कुबेरश्रीपा० ७ । ईशानकोणे ॐ हं ईशानाय नमः । ईशानश्रीपा० ८ ॥ इन्द्रेशानयोर्मध्ये ॐ आं ब्रह्मणे नमः । ब्रह्मश्रीपा० ९ । वरुणनिर्ऋत्योर्मध्ये ॐ ह्रीं अनंताय नमः । अनंतश्रीपा० १० । इति दशदिग्पालान् पजयेत् । तत इन्द्रादिसमीपे ॐ वं वज्राय नमः । वज्रश्रीपा० १ । ॐ शं शक्तये नमः । शक्तिश्रीपा० २ । ॐ दं दंडाय नमः । दंडश्रीपा० ३ । ॐ खं खड्गाय नमः । खड्गश्रीपा० ४ । ॐ पं पाशाय नमः । पाशश्रीपा० ५ । ॐ अं अंकुशाय नमः । अंकुशश्रीपा० ६ । ॐ गं गदायै नमः । गदाश्रीपा० ७ । ॐ त्रिं त्रिशूलाय नमः । त्रिशूलश्रीपा० ८ । ॐ पं पद्माय नमः । पद्मश्रीपा० ९ । ॐ चं चक्राय नमः । चक्रश्रीपा० १० ॥ इत्यस्त्राणि संपूज्य पुष्पांजलिं दद्यात् ॥ इति सप्तमावरणम् ॥ ७ ॥


इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणं लक्षजपः। चंपककुसुमैर्दशांशतो होमः। तत्तद्दशांशेन तर्पण मार्जनब्राह्मणभोजनानि कुर्य्यात्। एवं कृते मंत्रः सिद्धो भवति। सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् । तथाच-एवं ध्यात्वा जपेल्लक्ष मयुतं चंपकोद्भवैः ॥ कुसुमैर्जुहुयात्पीठे पूर्वोक्ते पजयेदिमाम् ॥ १ ॥ इत्थं सिद्धमनुर्मंत्री स्तंभयेद्देवतादिकान् ॥ पीतवस्त्रस्तदासीनः पतिमाल्यानुलेपनः ॥ २ ॥ पीतपुष्पैर्यजेद्देवीं हरिद्रोत्थस्त्रजा जपन् ॥ पीतां ध्यायन् भगवतीं प्रयोगेष्वयुतं जपेत् ॥ ३ ॥ त्रिमध्व क्तलिलैर्होमो नृणां वश्यकरो मतः॥ मधुरत्रितयाक्तैः स्यादाकर्षो लवणैर्ध्रुवम् ॥ ४ ॥ तैलाभ्यक्तैर्निंबपत्रैर्होमो विद्वेषकारकः ॥ तालकोणहरिद्राभिर्द्विषां संस्तंभनं भवेत् ॥ ५ ॥ अगारधूमं राजीश्च माहिषं गुग्गुलं निशि ॥ श्मशानपावके हुत्वा नाशयेदचिरा दरीन् ॥ ६॥ गरुतो गृध्रकाकानां कटुतैलं बिभीतकम् ॥ गृहधूमं चितावह्नौ हुत्वा प्रोच्चाटयेद्रिपून् ॥ ७ ॥ दूर्वागुडूचीलाजान्यो मधुर त्रितयान्वितान् ॥ जुहोति सोऽखिलान्रोगान् शमयेद्दर्शनादपि ॥ ८ ॥ पर्वताग्रे महारण्ये नदीसंगे शिवालये ॥ ब्रह्मचर्य्यरतो लक्षं जपेदखिलसिद्धये ॥ ९ ॥ एकवर्णगवीदुग्धं शर्करामधुसंयुतम् ॥ त्रिशतं मंत्रितं पीतं हन्याद्विषपराभवम् ॥ १० ॥ श्वेतपालाशकाष्ठेन रचिते रम्यपादुके ॥ अलक्तरंजिते लक्षं मंत्रयेन्मनुनामुना ॥ ११ ॥ तदारूढः पुमान् गच्छेत्क्षणेन शतयोजनम् ॥ पारदं च शिलां तालपिष्टं मधुसमान्वितम् ॥ १२ ॥ मनुना मंत्रयेल्लक्षं लिंपेत्तेनाखिलां तनुम् ॥ अदृश्यः स्यान्नृणामेष आश्चर्य्यं दृश्यतामिदम् ॥ १३ ॥ षट्कोणे विलिखेद्बीजं साध्यनामान्वितं मनोः॥ हरिताल [illegible]ना णैरुन्मत्तरससंयुतैः ॥ १४ ॥ शेषाक्षरैः समावीतं धरागेहविराजितम् ॥

---

१ तन्त्रांतरेऽपि-पीतांबरधरो भूत्वा पूर्वाशाभिमुखं स्थितः। लक्षमेकं जपेन्मन्त्री हरिद्राग्रंथिमालया ॥ ब्रह्मचर्यरतो नित्यं प्रयतो ध्यानतत्परः। प्रियंग्वाश्च रखेनारि पीतपुष्पैश्च होमयेत् ॥ जपमन्त्रप्रयोगेण मन्त्रं चाप्ययुतं जपेत् ॥ २त्रिमध्वक्तम्-मधुघृतशर्कराक्तम् ।३ गरुतः पक्षान्। ४ धत्तूररसाक्तहरिद्राचूर्णेन षट्कोणेष्वमुकं स्तम्भयेति वर्णयुतं ह्लीं इति बीजं विलिख्य मन्त्र शेषार्णैः स्ववष्ट्योपरि चतुरस्रेण वेष्टितं पीतसूत्रवीतं कृत्वा भ्रमत्कुम्भकारचक्रस्थमृदा रचितवृषोदरे प्रक्षिप्य हरितालेन संलिप्य वृषं प्रत्यहं पूजयेत् । स्तम्भनं फलम् ॥

तद्यंत्रं स्थापितं प्राणपीतसूत्रेण वेष्टयेत् ॥ १५ ॥ भ्राम्यत्कुलालचक्रस्थां गृहीत्वा मृत्तिकां तया ॥ रचयेद्वृषभं रम्यं यंत्रं तन्मध्यतः क्षिपेत् ॥ १६ ॥ हरितालेन संलिप्य वृषं प्रत्यहमर्चयेत् ॥ स्तंभयेद्विद्विषां वाचं गतिं कार्य्यं परंपराम् ॥ १७ ॥ आदाय वामहस्तेन प्रेतभूमिस्थखर्परम् ॥ अंगारेण चितास्थेन तत्र यंत्रं समालिखेत् ॥ १८ ॥ मंत्रितं निहितं भूमौ रिपूणां स्तंभयेद्गतिम् ॥ प्रेतवस्त्रे लिखेद्यंत्रमंगारेणैव तत्पुनः ॥ १९ ॥ मंडूकवदने न्यस्य पीतवस्त्रेण वेष्टितम् ॥ पूजितं पीतपुष्पैस्तद्वाचं संस्तंभयेद्द्विषाम् ॥ ॥ २० ॥ यद्भूमौ भविता दिव्यं तत्र यंत्रं समालिखेत् ॥ मार्जितं तद्वृषा पत्रैर्दिव्यस्तंभनकृद्भवेत् ॥ २१ ॥ इन्द्रवारुणिकामलं सप्तशो मनुमंत्रितम् ॥ क्षिप्तं जले दिव्यकृतं जलस्तंभनकारकम् ॥ २२ ॥ किं भूरिणा साधकेन मंत्रः सम्यगुपासितः ॥ शत्रूणां गतिबुद्ध्यादेः स्तंभनो नात्र संशयः ॥ ॥ २३ ॥ इति श्रीबगलामुखीषट्त्रिंशदक्षरमंत्रप्रयोगः ॥ अथ बगलामुखीकवचप्रारंभः ॥ ॐ कैलासाचलमध्यगं पुरहरं शांतं त्रिनेत्रं शिवं वामस्था कवचं प्रणम्य गिरिजा भूतिप्रदं पृच्छति॥देवी श्रीबगलामुखी रिपुकुलारण्याग्निरूपा च या तस्याः शापविमुक्तमंत्रसहितं प्रीत्याऽधुना ब्रूहि माम् ॥१॥ श्रीशंकर उवाच॥देवि श्रीभववल्लभे शृणु महामंत्रं विभूतिप्रदं देव्या वर्मयुतं समस्तसुखदं साम्राज्यदं मुक्तिदम् ॥

बगलामुखीस्तंभनयंत्रम्।



॥ ५१२॥

तारं रुद्रवधूर्विरंचिमहिले विष्णुप्रिये कामयुक् कांते श्रीबगलानने मम रिपून्नाशाय युग्मं त्विति ॥ २ ॥ ऐश्वर्य्याणि पदं च देहियुगलं शीघ्रं मनोवांछितं कार्य्यं साधय युग्मयुक् शिववधूवह्निप्रियांतो मनुः ॥ कंसारेस्तनयं च बीजमपराशक्तिं च वाणीं तथा कीलं श्रीमति भैरवर्षिसहितं छन्दोविराट्संयुतम् ॥ ३ ॥ स्वेष्टार्थस्य परस्य चापि नितरां कार्य्यस्य संप्राप्तये नानासाध्यमहागदस्य नियतं नाशाय वीर्य्याप्तये॥ ध्यात्वा श्रीबगलाननां मनुवरं जप्त्वा सहस्राख्यकं दीर्घैः षट्कयुतैश्च रुद्रमहिलाबीजैर्विन्यस्यांगके ॥ ४ ॥ ॐ अस्य श्रीबगलामुखीब्रह्मास्त्रमंत्रकवचस्य भैरवऋषिः ॥ विराट् छंदः । श्रीबगलामुखी देवता । क्लीं बीजम् । ऐं शक्तिः । श्रीं कीलकम् । मम परस्य च मनोभिलषितेष्टकार्य्यसिद्धये जपे विनियोगः ॥ ॐ भैरवऋषये नमः शिरसि १ । विराट् छंदसे नमः मुखे २ । बगलामुखीदेवतायै नमः हृदि ३ । क्लीं बीजाय नमः गुह्ये ४ । ऐं शक्तये नमः पादयोः ५ । श्रीं कीलकाय नमः सर्वांगे ६ ॥ इति ऋष्यादिन्यासः ॥ ॐ ह्रां अंगुष्ठाभ्यां नमः १ । ॐ ह्रीं तर्जनीभ्यां नमः २ । ॐ ह्रूं मध्यमाभ्यां नमः ३ । ॐ ह्रैं अनामिकाभ्यां नमः ४ । ॐ ह्रौं कनिष्ठिकाभ्यां नमः ५ । ॐ ह्रः करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ॐ ह्रां हृदयाय नमः १ । ॐ ह्रीं शिरसे स्वाहा २ । ॐ ह्रूं शिखायै वषट् ३ । ॐ ह्रैं कवचाय हुम् ॥ ॐ ह्रौं नेत्रत्रयाय वौषट् ५ । ॐ ह्रः अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ अथ ध्यानम्—ॐ सौवर्णासनसंस्थितां त्रिनयनां पीतांशुकोल्लासिनीं हेमाभांगरुचिं शशांकमुकुटां स्रक्चम्पकस्रग्युताम् ॥ हस्तैर्मुद्गरपाशबद्धरसनां संबिभ्रतीं भूषणव्याप्तांगीं बगलामुखीं त्रिजगतां संस्तंभिनीं चिंतये ॥ ५ ॥ शिरो मे पातु ॐ ह्रीं ऐं श्रीं क्लीं पातु ललाटकम् ॥ सम्बोधनपदं पातु नेत्रे श्रीबगलानने ॥ ६ ॥ श्रुतौ मम रिपुं पातु नासिकां नाशयद्वयम् ॥ पातु गण्डौ सदा मामैश्वर्य्याण्यंतं तु मस्तकम् ॥ ७ ॥ देहिद्वंद्वं सदा जिह्वां पातु शीघ्रं वचो मम ॥ कंठदेशं स नः पातु वांछितं बाहुमूलकम् ॥ ८ ॥ कार्य्यं साधयद्वंद्वं तु करौ पातु सदा मम ॥ मायायुक्ता तथा स्वाहा हृदयं पातु सर्वदा ॥ ९ ॥ अष्टाधिकचत्वारिंशद्दण्डाढ्या बगलामुखी ॥ रक्षां करोतु सर्वत्र गृहेऽरण्ये सदा

१ मन्त्रोद्धारो यथा-ॐ ह्रीं ऐं श्रीं क्लीं श्रीबगलानने मम रिपून्नाशय नाशय मामैश्वर्य्याणि देहि देहि शीघ्रं मनोवाञ्छितकार्य्यं साधय साधय ह्रीं स्वाहा ॥ इति मंत्रः"

मम ॥ १० ॥ ब्रह्मास्त्राख्यो मनुः पातु सर्वांगं सर्वसंधिषु ॥ मंत्रराजः सदा रक्षां करोतु मम सर्वदा ॥ ११ ॥ ॐ ह्रीं पातु नाभि
देशं कटिं मे बगलाऽवतु ॥ मुखी वर्णद्वयं पातु लिंगं मेऽमुष्युग्मकम् ॥ १२ ॥ जानुनी सर्वदुष्टानां पातु मे वर्णपञ्चकम् ॥ वाचं
मुखं तथा पादौ षडर्णा परमेश्वरी ॥ १३ ॥ जंघायुग्मे सदा पातु बगला रिपुमोहिनी ॥ स्तंभयेति पदं पृष्ठं पातु वर्णत्रयं मम ॥
॥ १४ ॥ जिह्वां वर्णद्वयं पातु गुल्फौ मे कीलयेति च ॥ पादोर्ध्वं सर्वदा पातु बुद्धिं पादतले मम ॥ १५ ॥ विनाशयपदं पातु
पादांगुल्योर्नखानि मे॥ ह्रीं बीजं सर्वदा पातु बुद्धीन्द्रियवचांसि मे ॥ १६ ॥ सर्वांगं प्रणवः पातु स्वाहा रोमाणि मेऽवतु ॥ ब्राह्मी
पूर्वदले पात चाग्नेय्यां विष्णुवल्लभा ॥ १७ ॥ माहेशी दक्षिणे पातु चामुण्डा राक्षसेऽवतु ॥ कौमारी पश्चिमे पातु वायव्ये चापराजिता ॥
॥ १८ ॥ वाराही चोत्तरे पातु नारासिंही शिवेऽवतु ॥ ऊर्द्ध्वं पातु महालक्ष्मीः पाताले शारदाऽवतु ॥ १९ ॥ इत्यष्टौ शक्तयः पांतु सायुधा
श्च सवाहनाः ॥ राजद्वारे महादुर्गे पातु मां गणनायकः ॥ २० ॥ श्मशाने जलमध्ये च भैरवश्च सदाऽवतु ॥ द्विभुजा रक्तवसनाः सर्वा
भरणभूषिताः ॥ २१ ॥ योगिन्यः सर्वदा पांतु महारण्ये सदा मम ॥ इति ते कथितं देवि कवचं परमाद्भुतम् ॥ २२ ॥ श्रीविश्व
विजयं नाम कीर्तिश्रीविजयप्रदम् ॥ अपुत्रो लभते पुत्रं धीरं शूरं शतायुषम् ॥ २३ ॥ निर्द्धनो धनमाप्नोति कवचस्यास्य पाठतः ॥
जपित्वा मंत्रराजं तु ध्यात्वा श्रीबगलामुखीम् ॥ २४ ॥ पठेदिदं हि कवचं निशायां नियमात्तु यः ॥ यं यं कामयते कामं साध्या
साध्यं महीतले ॥ २५ ॥ तं तं काममवाप्नोति सप्तरात्रेण शांकरि ॥ गुरुं ध्यात्वा सुरां पीत्वारात्रौ शक्तिसमन्वितः ॥ २६ ॥
कवचं यः पठेद्देवि तस्यासाध्यं न किञ्चन ॥ यं ध्यात्वा प्रजपेन्मंत्रं सहस्रं कवचं पठेत् ॥ २७ ॥ त्रिरात्रेण वशं याति तस्य
तन्नात्र संशयः ॥ लिखित्वा प्रतिमां शत्रोः सतालेन हारिद्रया ॥ २८ ॥ लिखित्वा हृदि तन्नाम तं ध्यात्वा प्रजपेन्मनुम् ॥ एकविंश
दिनं यावत्प्रत्यहं च सहस्रकम् ॥ २९ ॥ जप्त्वा पठेत्तु कवचं चतुर्विंशतिवारकम् ॥ संस्तंभो जायते शत्रोर्नात्र कार्य्या विचा
रणा ॥ ३० ॥ विवादे विजयस्तस्य संग्रामे जयमाप्नुयात् ॥ श्मशाने च भयं नास्ति कवचस्य प्रभावतः ॥ ३१ ॥ नवनीतं

चाभिमंत्र्य स्त्रीणां दद्यान्महेश्वरि ॥ वंध्यायां जायते पुत्रो विद्याबलसमन्वितः ॥ ३२ ॥ श्मशानांगारमादाय भौमे रात्रौ शनावथ ॥
पादोदकेन स्पृष्ट्वा च लिखेल्लोहशलाकया ॥ ३३ ॥ भूमौ शत्रोः स्वरूपञ्च हृदि नाम समालिखेत् ॥ हस्तं तद्धृदये दत्त्वा कवचं
तिथिवारकम् ॥ ३४ ॥ ध्यात्वा जपेन्मंत्रराजं नवरात्रं प्रयत्नतः ॥ म्रियते ज्वरदाहेन दशमेऽह्नि न संशयः ॥ ३५ ॥ भूर्जपत्रे
ष्विदं स्तोत्रमष्टगंधेन संलिखेत् ॥ धारयेद्दक्षिणे बाहौ नारी वामभुजे तथा ॥ ३६ ॥ संग्रामे जयमाप्नोति नारी पुत्रवती भवेत् ॥
ब्रह्मास्त्रादीनि शस्त्राणि नैव कृंतंति तं जनम् ॥ ३७ ॥ संपूज्य कवचं नित्यं पूजायाः फलमालभेत् ॥ बृहस्पतिसमो वापि विभवे धन
दोपमः ॥ ३८ ॥ कामतुल्यश्च नारीणां शत्रूणां च यमोपमः ॥ कवितालहरी तस्य भवेद्गंगाप्रवाहवत् ॥ ३९ ॥ गद्यपद्यमयी वाणी
भवेद्देवीप्रसादतः ॥ एकादशशतं यावत्पुरश्चरणमुच्यते ॥ ४० ॥ पुरश्चर्याविहीनं तु न चेदं फलदायकम् ॥ न देयं परशिष्येभ्यो
दुष्टेभ्यश्च विशेषतः ॥ ४१ ॥ देयं शिष्याय भक्ताय पंचत्वं चान्यथाऽऽप्नुयात् ॥ इदं कवचमज्ञात्वा भजेद्यो बगलामुखीम् ॥ ४२ ॥
शतकोटिं जपित्वा तु तस्य सिद्धिर्न जायते ॥ ४३ ॥ दाराढ्यो मनुजोऽस्य लक्षजपतः प्राप्नोति सिद्धिं परां विद्यां श्रीविजयं तथा
सुनियतं धीराश्च वीरा वराः ॥ ब्रह्मास्त्राख्यमनुं विलिख्य नितरां भूर्जेऽष्टगंधेन वै धृत्वा राजपुरं व्रजंति खलु ये दासोऽस्ति तेषां नृपः॥४४॥
इति विश्वसारोद्धारतंत्रे पार्वतीश्वरसंवादे बगलामुखीकवचं समाप्तम् ॥ अथ बगलामुखीसहस्रनामस्तोत्रप्रारंभः ॥ सुरालयप्रधाने तु
देवदेवं महेश्वरम् ॥ शैलाधिराजतनया संग्रहे तमुवाच ह ॥ १ ॥ श्रीदेव्युवाच ॥ परमेष्ठिन् परं धाम प्रधानपरमेश्वर ॥ नाम्नां सहस्रं
बगलामुख्यास्त्वं ब्रूहि वल्लभ ॥ २ ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि नामधेयसहस्रकम् ॥ परब्रह्मास्त्रविद्यायाश्चतुर्वर्गफल
प्रदम् ॥ ३ ॥ गुह्याद् गुह्यतरं देवि सर्वसिद्धैकवन्दितम् ॥ अतिगुप्ततरं सर्वविद्यातंत्रेषु गोपितम् ॥ ४ ॥ विशेषतः कलियुगे महा
सिद्ध्योघदायि तत् ॥ गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ॥ ५ ॥ अप्रकाश्यमिदं सत्यं स्वयोनिरिव सुव्रते ॥ रोधिनी विघ्नसंघानां
मोहिनी परयोषिताम् ॥ ६ ॥ स्तंभिनी राजसैन्यानां वादिनी परवादिनाम् ॥ पुरा चैकार्णवे घोरे काले परमभैरवः ॥ ७ ॥

सुन्दरीसहितो देवः केशवः क्लेशनाशनः ॥ उरगासनमासीनो योगनिद्रामुपागमत् ॥ ८ ॥ निद्राकाले च ते काले मया प्रोक्तः सना
तनः ॥ महास्तंभकरं देवीस्तोत्रं वा शतनामकम् ॥ ९ ॥ सहस्रनाम परमं वद देवस्य कस्यचित् ॥ श्रीभगवानुवाच ॥ शृणु शंकर
देवेश परमातिरहस्यकम् ॥ १० ॥ अजोऽहं यत्प्रसादेन विष्णुः सर्वेश्वरेश्वरः ॥ गोपनीयं प्रयत्नेन प्रकाशात्सिद्धिहानिकृत् ॥ ११ ॥
ॐ अस्य श्रीपीताम्बरासहस्रनामस्तोत्रमंत्रस्य भगवान् सदाशिव ऋषिः । अनुष्टुप्छन्दः श्रीजगद्वश्यकरी पीताम्बरा देवता । सर्वाभीष्ट
सिद्ध्यर्थे पाठे विनियोगः ॥ अथ ध्यानम्—पीताम्बरपरीधानां पीनोन्नतपयोधराम् ॥ जटामुकुटशोभाढ्यां पीतभूमिसुखासनाम् ॥ १२ ॥ शत्रो
र्जिह्वां मुद्गरं च बिभ्रतीं परमां कलाम् ॥ सर्वागमपुराणेषु विख्यातां भुवनत्रये ॥ १३ ॥ जगद्विध्वंसिनीं देवीमजरामरकारिणीम् ॥ तां
नमामि महामायां महदैश्वर्य्यदायिनीम् ॥ १४ ॥ सृष्टिस्थितिविनाशानामादिभूतां महेश्वरीम् ॥ गोप्यां सर्वप्रयत्नेन शृणु तां कथयामि
ते ॥ १५ ॥ प्रणवं पूर्वमुद्धृत्य स्थिरमायां ततो वदेत् ॥ बगलामुखि सर्वेति दुष्टानां वाचमेव च ॥ १६ ॥ मुखं पदं स्तंभयेति
जिह्वां कीलय बुद्धिमत् ॥ विनाशयेति तारं च स्थिरमायां ततो वदेत् ॥ १७ ॥ वह्निप्रियां ततो मंत्रश्चतुर्वर्गफलप्रदः ॥ ब्रह्मास्त्रं ब्रह्म
विद्या च ब्रह्ममाता सनातनी ॥ १८ ॥ माहेशी ब्रह्मकैवल्यं बगला ब्रह्मचारिणी ॥ नित्यनिन्दा । नित्यसिद्धा नित्यरूपा निरामया ॥
॥ १९ ॥ संधारिणी महामाया कटाक्षक्षेमकारिणी ॥ कमला विमला लीला रत्नकांतिगुणाश्रिता ॥ २० ॥ कामप्रिया कामरता
कामा कामस्वरूपिणी ॥ मङ्गला विजया जाया सर्वमङ्गलकारिणी ॥ २१ ॥ कामिनी कामिनी काम्या कामुका कामचारिणी ॥ काम
प्रिया कामरता कामा कामस्वरूपिणी ॥ २२ ॥ कामाख्या कामबीजस्था कामपीठनिवासिनी ॥ कामदा कामहा काली कपाली
च करालिका ॥ २३ ॥ कंसारिः कमला कामा कैलासेश्वरवल्लभा ॥ कात्यायनी केशवा च करुणा कामकेलिभुक् ॥ २४ ॥
क्रिया कीर्तिः कृत्तिका च काशिका मथुरा शिवा ॥ कालाक्षी कालिका काली धवलाननसुन्दरी ॥ २५ ॥ खेचरी च खमूर्तिश्च
क्षुद्रा क्षुद्रक्षुधावरा ॥ खड्गहस्ता खड्गरता खड्गिनी खर्परप्रिया ॥ २६ ॥ गङ्गा गौरी गामिनी च गीता गोत्रविवर्द्धिनी ॥ गोधरा

गोकरा गोधा गंधर्वपुरवासिनी ॥ २७ ॥ गंधर्वा गंधर्वकला गोपती गरुडासना ॥ गोविंदभावा गोविन्दा गांधारी गंधमादिनी ॥
॥ २८ ॥ गौरांगी गोपिकामूर्तिर्गोपीगोष्ठनिवासिनी ॥ गंधा गजेन्द्रगा मान्या गदाधरप्रिया ग्रहा ॥ २९ ॥ घोरघोरा घोररूपा
घनश्रोणी घनप्रभा ॥ दैत्येन्द्रप्रबला घण्टावादिनी घोरनिःस्वना ॥ ३० ॥ डाकिन्युमा उपेन्द्रा च उर्वशी उरगासना ॥ उत्तमा उन्नता
उंन्ना उत्तमस्थानवासिनी ॥ ३१ ॥ चामुण्डा मुण्डिका,चण्डी चण्डदर्पहरेति च ॥ उग्रचण्डा चण्डचण्डा चण्डदैत्यविनाशिनी ॥
॥ ३२ ॥ चण्डरूपा प्रचण्डा च चण्डा चण्डशरीरिणी ॥ चतुर्भुजा प्रचण्डा च चराचरनिवासिनी ॥ ३३ ॥ क्षत्रप्रायशिरोवाहा
छला छलतरा छली ॥ क्षत्ररूपा क्षत्रधरा क्षत्रियक्षयकारिणी ॥ ३४ ॥ जया च जयदुर्गा च जयंती जयदा परा ॥ जायिनी
जयिनी ज्योत्स्ना जटाधरप्रिया जिता ॥ ३५ ॥ जितेन्द्रिया जितक्रोधा जयमाना जनेश्वरी ॥ जितमृत्युर्जरातीता जाह्ववी जनका
त्मजा ॥ ३६ ॥ झंकारा झंझरी झण्टा झंकारी झकशोभिनी ॥ झखा झमेशा झंकारी योनिकल्याणदायिनी ॥ ३७ ॥ झर्झरा झमुरी
झारा झरा झरतरा परा ॥ झंझाझमेता झंकारी.झणा कल्याणदायिनी ॥ ३८ ॥ ईमनामानसीचिन्त्या ईमुना शंकरप्रिया ॥ टंकारी
टिटिका टीका टंकिनी च टवर्गगा ॥ ३९ ॥ टापाटोपा टटपतिष्टमनी टमनाप्रिया ॥ ठकारधारिणी ठीका ठंकरी ठिकराप्रिया ॥ ४० ॥
ठेकठासा ठकरती ठामिनी ठमनप्रिया ॥ डारहा डाकिनी डारा डामरा डामरप्रिया ॥ ४१ ॥ डखिनी डडयुक्ता च डमरूकरवल्लभा ॥
ढका ढकी ढकनादा ढोलशब्दप्रबोधिनी ॥ ४२ ॥ ढामिनी ढामनप्रीता ढगतंत्रप्रकाशिनी ॥ अनेकरूपिणी अम्बा ॥ अणिमासिद्धिदा
यिनी ॥ ४३ ॥ अमंत्रिणी अणुकरी अणुमद्भानुसंस्थिता ॥ तारा तंत्रावती तंत्रा तत्त्वरूपा तपस्विनी ॥ ४४ ॥ तरंगिणी तत्त्व
परा तंत्रिका तंत्रविग्रहा ॥ तपोरूपा तत्त्वदात्री तपःप्रीतिप्रधर्षिणी ॥ ४५ ॥ तंत्रा यंत्रार्चनपरा तलातलनिवासिनी ॥ तल्पदा त्वल्पदा
काम्या स्थिरा स्थिरतरा स्थितिः ॥ ४६ ॥ स्थाणुप्रिया स्थलपरा स्थिता स्थानप्रदायिनी ॥ दिगम्बरा दयारूपा दावाग्नि
दमनी दमा ॥ ४७ ॥ दुर्गा दुर्गपरा देवी दुष्टदैत्यविनाशिनी ॥ दमनप्रमदा दैत्यदयादानपरायणा ॥ ४८ ॥ दुर्गार्तिनाशिनी दांता

दंभिनी दंभवर्जिता ॥ दिगम्बरप्रिया दंभा दैत्यदंभविदारिणी ॥ ४९ ॥ दमना दंतसौन्दर्य्या दानवेन्द्रविनाशिनी ॥ दयाधरा च दमनी दर्भपत्रविलासिनी ॥ ५० ॥ धरिणी धारिणी धात्री धराधरधरप्रिया ॥ धराधरसुता देवी सुधर्म्मा धर्म्मचारिणी ॥ ५१ ॥ धर्म्मज्ञा धवला धूला धनदा धनवर्द्धिनी ॥ धीराऽधीरा धरितरा धीरसिद्धिप्रदायिनी ॥ ५२ ॥ धन्वंतरिधरा धीरा ध्येया ध्यानस्वरूपिणी ॥ नारायणी नारसिंही नित्यानन्दा नरोत्तमा ॥ ५३ ॥ नक्ता नक्तवती नित्या नीलजीमूतसन्निभा ॥ नीलांगी नीलवस्त्रा च नीलपर्वतवासिनी ॥ ५४ ॥ सुनीलपुष्पखचिता नीलजंबुसमप्रभा ॥ नित्याख्या षोडशी विद्या नित्या नित्यसुखावहा ॥ ५५ ॥ नर्मदानन्दनाऽऽनन्दा नन्दानन्दविवर्द्धिनी ॥ यशोदानन्दतनया नन्दनोद्यानवासिनी ॥ ५६ ॥ नागांतका नागवृद्धा नागपत्नी च नागिनी ॥ नमिताशेषजनता नमस्कारवती नमः ॥ ५७ ॥ पीताम्बरा पार्वती च पीताम्बरविभूषिता ॥ पीतमाल्याम्बरधरा पीताभा पिंगमूर्द्धजा ॥ ५८ ॥ पीतपुष्पार्चनरता पीतपुष्पसमर्चिता ॥ परप्रभा पितृपतिः परसैन्यविनाशिनी ॥ ५९ ॥ परमा परतंत्रा च परमंत्रा परात्परा ॥ परा विद्या परा सिद्धिः परस्थानप्रदायिनी ॥ ६० ॥ पुष्पा पुष्पवती नित्या पुष्पमालाविभूषिता ॥ पुरातना पूर्वपरा परसिद्धिप्रदायिनी ॥ ६१ ॥ पीता नितम्बिनी पीता पीनोन्नतपयःस्तनी ॥ प्रेमा प्रमध्यमा शेषा पद्मपत्रविलासिनी ॥ ६२ ॥ पद्मावती पद्मनेत्रा पद्मा पद्ममुखी परा ॥ पद्मासना पद्मप्रिया पद्मरागस्वरूपिणी ॥ ६३ ॥ पावनी पालिका पात्री परदा वरदा शिवा ॥ प्रेतसंस्था परानन्दा परब्रह्मस्वरूपिणी ॥ ६४ ॥ जिनेश्वरप्रिया देवी पशुरक्तरतिप्रिया ॥ पशुमांसप्रियाऽपर्णा परामृतपरायणा ॥ ॥ ६५ ॥ पाशिनी पाशिका चापि पशुघ्नी पशुभाषिणी ॥ फुल्लारविन्दवदना फुल्लोत्पलशरीरिणी ॥ ६६ ॥ परानन्दप्रदा वीणा पशुपाशविनाशिनी ॥ फूत्कारा फूत्परा फेनी फुल्लेन्दीवरलोचना ॥ ६७ ॥ फट्मंत्रा स्फटिका स्वाहा स्फोटा च फट्स्वरूपिणी ॥ स्फाटिका घुटिका घोरा स्फटिकाद्रिस्वरूपिणी ॥ ६८ ॥ वरांगना वरधरा वाराही वासुकी वरा ॥ बिन्दुस्था बिन्दुनी वाणी बिन्दुचक्रनिवासिनी ॥ ६९ ॥ विद्याधरी विशालाक्षी काशीवासिजनप्रिया ॥ वेदविद्या विरूपाक्षी विश्वयुग्बहुरूपिणी ॥ ७० ॥ ब्रह्मशक्तिर्विष्णुशक्तिः पञ्च

वक्रा शिवप्रिया ॥ वैकुण्ठवासिनी देवी वैकुण्ठपददायिनी ॥७१॥ ब्रह्मरूपा विष्णुरूपा परब्रह्ममहेश्वरी ॥ भवप्रिया भवोद्भावा भवरूपा
भवोत्तमा ॥ ७२ ॥ भवापारा भवाधारा भाग्यवत्प्रियकारिणी ॥ भद्रा सुभद्रा भवदा शुंभदैत्यविनाशिनी ॥ ७३ ॥ भवानी भैरवी भीमा
भद्रकाली सुभद्रिका ॥ भगिनी भगरूपा च भगमाना भगोत्तमा ॥७४॥ भगप्रिया भगवती भगवासा भगाकरा ॥ भगसृष्टा भाग्यवती
भगरूपा भगासिनी॥७५॥भगलिङ्गप्रिया देवी भगलिङ्गपरायणा॥भगलिंगस्वरूपा च भगलिंगविनोदिनी॥७६॥भगलिंगरता देवी भगलिंग
निवासिनी॥भगमाला भगकला भगाधारा भगाम्बरा ॥७७॥ भगवेगा भगाभूषा भगेन्द्रा भाग्यरूपिणी॥भगलिंगांगसम्भोगा भगलिं
गासवावहा ॥७८॥ भगलिंगसमाधुर्या भगलिंगनिवेशिता ॥ भगलिंगसुपूज्या च भगलिंगसमन्विता ॥ ७९ ॥ भगलिंगविरक्ता च भग
लिंगसमावृता ॥ माधवी माधवीमान्या मधुरा मधुमानिनी ॥ ८० ॥ मन्दहासा महामाया मोहिनी महदुत्तमा ॥ महामोहा महाविद्या
महाघोरा महास्मृतिः ॥ ८१ ॥ मनस्विनी मानवती मोदिनी मधुरानना ॥ मेनका मानिनी मान्या मणिरत्नविभूषणा ॥ ८२ ॥
मल्लिका मौलिका माला मालाधरमदोत्तमा ॥ मदना सुन्दरी मेधा मधुमत्ता मधुप्रिया ॥ ८३ ॥ मत्तहंसा समोन्नासा मत्तसिंहमहासना ॥
महेन्द्रवल्लभा भीमा मौल्यं च मिथुनात्मजा ॥ ८४ ॥ महाकाला महाकाली महाबुद्धिर्महोत्कटा ॥ माहेश्वरी महामाया माहिषासुर
घातिनी ॥ ८५ ॥ मधुरा कीर्तिमत्ता च मत्ता मातंगगामिनी ॥ मदप्रिया मांसरता मत्तयुक् कामकारिणी ॥ ८६ ॥ मैथुन्य
वल्लभा देवी महानन्दा महोत्सवा ॥ मरीचिर्मारतिर्माया मनोबुद्धिप्रदायिनी ॥ ८७ ॥ मोहा मोक्षा महालक्ष्मीर्महत्पदप्रदायिनी ॥
यमरूपा च यमुना जयंती च जयप्रदा ॥ ८८ ॥ याम्या यमवती युद्धा यदोः कुलविवर्द्धिनी ॥ रमा रामा रामपत्नी रत्नमाला
रतिप्रिया ॥ ८९ ॥ रत्नसिंहासनस्था च रत्नाभरणमण्डिता ॥ रमणी रमणीया च रत्या रसपरायणा ॥ ९० ॥ रसानन्दा
रसवती रघूणां कुलवर्द्धिनी ॥ रमणारिपरिभ्राज्या रैधा राधिकरत्नजा ॥ ९१ ॥ रावी रसस्वरूपा च रात्रिराजसुखावहा ॥ ऋतुजा
ऋतुदा ऋद्धा ऋतुरूपा ऋतुप्रिया ॥ ९२ ॥ रक्तप्रिया रक्तवती रंगिणी रक्तदंतिका ॥ लक्ष्मीर्लज्जा च लतिका लीला लग्नानिता

क्षिणी ॥ ९३ ॥ लीला लीलावती लोमा हर्षाह्लादनपट्टिका ॥ ब्रह्मस्थिता ब्रह्मरूपा ब्रह्माणी वेदवंदिता ॥ ९४ ॥ ब्रह्मोद्भवा
ब्रह्मकला ब्रह्माणी ब्रह्मबोधिनी ॥ वेदांगना वेदरूपा वनिता विनतावसा ॥ ९५ ॥ बाला च युवती वृद्धा ब्रह्मकर्मपरायणा ॥
विंध्यस्था विंध्यवासी च विन्दुयुक् विन्दुभूषणा ॥ ९६ ॥ विद्यावती वेदधारी व्यापिका बर्हिणी कला ॥ वामाचारप्रिया वह्निर्वामाचार
परायणा ॥ ९७ ॥ वामाचाररता देवी वामदेवप्रियोत्तमा ॥ बुद्धेन्द्रिया विबुद्धा च बुद्धाचरणमालिनी ॥ ९८ ॥ बंधमोचनकर्त्री
च वारुणा वरुणालया ॥ शिवा शिवप्रिया शुद्धा शुद्धांगी शुक्लवर्णिका ॥ ९९ ॥ शुक्लपुष्पप्रिया शुक्ला शिवधर्म्मपरायणा ॥ शुक्लस्था
शुक्लिनी शुक्लरूपा शुक्लपशुप्रिया ॥ १०० ॥ शुक्रस्था शुक्रिणी शुक्रा शुक्ररूपा च शुक्रिका ॥ षण्मुखी च षडंगा च षट्चक्र
विनिवासिनी ॥ १०१ ॥ षट्ग्रंथियुक्ता षोढा च षण्माता च षडात्मिका ॥ षडङ्गयुवती देवी षडंगप्रकृतिर्वशी ॥ १०२ ॥ षडा
नना षड्रसा च षष्ठी षष्ठेश्वरी प्रिया ॥ षड्जवादा षोडशी च षोढान्यासस्वरूपिणी ॥ १०३ ॥ षट्चक्रभेदनकरी षट्चक्रस्थस्वरू
पिणी ॥ षोडशस्वररूपा च षण्मुखी षट्पदान्विता ॥ १०४ ॥ सनकादिस्वरूपा च शिवधर्म्मपरायणा ॥ सिद्धा सिद्धेश्वरी शुद्धा
सुरमाता स्वरोत्तमा ॥ १०५ ॥ सिद्धविद्या सिद्धमाता सिद्धा सिद्धस्वरूपिणी ॥ हरा हारिप्रिया हारा हरिणी हारयुक् तथा ॥ १०६ ॥
हरिरूपा हरिधरा हरिणाक्षी हरिप्रिया ॥ हेतुप्रिया हेतुरता हिताहितस्वरूपिणी ॥ १०७ ॥ क्षमा क्षमावती क्षीता क्षुद्रघण्टाविभू
षणा ॥ क्षयंकरी क्षितीशा च क्षीणमध्यसुशोभना ॥ १०८ ॥ अजाऽनंता अपर्णा च अहल्या शेषशायिनी ॥ स्वांतर्गता च साधूना
मंतरानंतरूपिणी ॥ १०९ ॥ अरूपा अमला चार्द्धा अनंतगुणशालिनी ॥ स्वविद्या विद्यका विद्याविद्या चार्विन्दुलोचना ॥
॥ ११० ॥ अपराजिता जातवेदा अजपा अमरावती ॥ अल्पा स्वल्पा अनल्पाऽऽद्या अणिमासिद्धिदायिनी ॥ १११ ॥ अष्ट
सिद्धिप्रदा देवी रूपलक्षणसंयुता ॥ अरविन्दमुखा देवी भोगसौख्यप्रदायिनी ॥ ११२ ॥ आदिविद्या आदिभूता आदिसिद्धिप्रदा
यिनी ॥ सीत्काररूपिणी देवी सर्वासनविभूषिता ॥ ११३ ॥ इन्द्रप्रिया च इन्द्राणी इन्द्रप्रस्थनिवासिनी ॥ इन्द्राक्षी इन्द्रवज्रा च

इन्द्रमयोक्षिणी तथा ॥ ११४ ॥ इला कामनिवासा च ईश्वरीश्वरवल्लभा ॥ जननी चेश्वरी दीना भेदा चेश्वरकर्म्मकृत ॥ ११५ ॥
उमा कात्यायनी ऊर्द्ध्वा मीना चोत्तरवासिनी ॥ उमापतिप्रिया देवी शिवा चोङ्काररूपिणी ॥ ११६ ॥ उरगेन्द्रशिरोरत्ना उरगोरग
वल्लभा ॥ उद्यानवासिनी माला प्रशस्तमणिभूषणा ॥ ११७ ॥ ऊर्द्ध्वदंतोत्तमांगी च उत्तमा चोर्ध्वकेशिनी ॥ उमा सिद्धिप्रदा या च
उरगासनसंस्थिता ॥ ११८ ॥ ऋषिपुत्री ऋषिच्छन्दा ऋषिसिद्धिप्रदायिनी ॥ उत्सवोत्सवसीमंता कामिका च गुणान्विता
॥ ११९ ॥ एला एकारविद्या च एणी विद्याधरा तथा ॥ ॲंकारवलयोपेता ॲंकारपरमा कला ॥ १२० ॥ ॐ वद वद वाणी
च ॲंकाराक्षरमण्डिता ॥ ऐन्द्री कुलिशहस्ता च ॲंलोकपरवासिनी ॥ १२१ ॥ ॲंकारमध्यबीजा च ॲंनमोरूपधारिणी ॥
परब्रह्मस्वरूपा च अंशुकांशुकवल्लभा ॥ १२२ ॥ ॲंकारा अःफड्मंत्रा च अक्षाक्षरविभूषिता ॥ अमंत्रा मंत्ररूपा च पदशोभासम
न्विता ॥ १२३ ॥ प्रणवोङ्काररूपा च प्रणवोच्चारभाक् पुनः ॥ ह्रींकाररूपा ह्रींकारी वाग्बीजाक्षरभूषणा ॥ १२४ ॥ हृल्लेखा
सिद्धियोगा च हृत्पद्मासनसंस्थिता ॥ बीजाख्या नेत्रहृदया ह्रींबीजा भुवनेश्वरी ॥ १२५ ॥ क्लींकामराजा क्लिन्ना च चतुर्वर्गफल
प्रदा ॥ क्लीं क्लीं क्लींरूपिका देवी क्रीं क्रीं क्रींनामधारिणी ॥ १२६ ॥ कमला शक्तिबीजा च पाशांकुशविभूषिता ॥ श्रीं श्रींकारा
महाविद्या श्रद्धा श्रद्धावती तथा ॥ १२७ ॥ ॐ ऐं क्लीं ह्रीं श्रीं परा च क्लींकारी परमाकला ॥ ह्रीं क्लीं श्रींकाररूपा च सर्वकर्मफल
प्रदा ॥ १२८ ॥ सर्वाढ्या सर्वदेवी च सर्वसिद्धिप्रदा तथा ॥ सर्वज्ञा सर्वशक्तिश्च वाग्विभूतिप्रदायिनी ॥ १२९ ॥ सर्वमोक्षप्रदा
देवी सर्वभोगप्रदायिनी ॥ गुणेन्द्रवल्लभा वामा सर्वशक्तिप्रदायिनी ॥ १३० ॥ सर्वानन्दमयी चैव सर्वसिद्धिप्रदायिनी ॥ सर्वचक्रे
श्वरी देवी सर्वसिद्धेश्वरी तथा ॥ १३१ ॥ सर्वप्रियंकरी चैव सर्वसौख्यप्रदायिनी ॥ सर्वानन्दप्रदा देवी ब्रह्मानन्दप्रदायिनी ॥ १३२ ॥
मनोवाञ्छितदात्री च मनोबुद्धिसमन्विता ॥ अकारादिक्षकारांता दुर्गा दुर्गार्तिनाशिनी ॥ १३३ ॥ पद्मनेत्रा सुनेत्रा च स्वधा स्वाहा
वषट्करी ॥ स्ववर्गा देववर्गा च तवर्गा च समन्विता ॥ १३४ ॥ अंतःस्था वेश्मरूपा च नवदुर्गा नरोत्तमा ॥ तत्त्वसिद्धिप्रदा नीता तथ

नीलपताकिनी ॥ १३५ ॥ नित्यरूपा निशाकारी स्तंभिनी मोहिनीति च ॥ वशंकरी तथोच्चाटी उन्मायाकर्षिणीति च ॥ १३६ ॥ मातंगी मधुमत्ता च अणिमा लघिमा तथा ॥ सिद्धा मोक्षप्रदा नित्या नित्यानन्दप्रदायिनी ॥ १३७ ॥ रक्तांगी रक्तनेत्रा च रक्तचन्दन भूषिता ॥ स्वल्पसिद्धिः सुकल्पा च दिव्यचारणशुक्रभा ॥ १३८ ॥ संक्रांतिः सर्वविद्या च सप्तवासरभूषिता ॥ प्रथमा च द्वितीया च तृतीया च चतुर्थिका ॥ १३९ ॥ पञ्चमी चैव षष्ठी च विशुद्धा सप्तमी तथा ॥ अष्टमी नवमी चैव दशम्येका दशी तथा ॥ १४० ॥ द्वादशी त्रयोदशी च चतुर्दश्यथ पूर्णिमा ॥ अमावस्या तथा पूर्वा उत्तरा परिपूर्णिमा ॥ १४१ ॥ खड्गिनी चक्रिणी घोरा गदिनी शूलिनी तथा ॥ भुशुण्डी चापिनी बाणा सर्वायुधविभूषणा ॥ १४२ ॥ कुलेश्वरी कुलवती कुलाचारपरायणा ॥ कुलकर्मसुरक्ता च कुलाचारप्रवर्द्धिनी ॥ १४३ ॥ कीर्तिः श्रीश्च रमा रामा धर्म्मायै सततं नमः ॥ क्षमा धृतिः स्मृतिर्मेधा कल्पवृक्षनिवासिनी ॥ १४४ ॥ उग्रा उग्रप्रभा गौरी वेदविद्याविबोधिनी ॥ साध्या सिद्धा सुसिद्धा च विप्ररूपा तथैव च ॥ १४५ ॥ काली कराली काल्या च कालदैत्यविनाशिनी कौलिनी कालिका चैव कचटतपवर्णिका ॥ १४६ ॥ जयिनी जययुक्ता च जयदा जृम्भिणी तथा ॥ स्राविणी द्राविणी देवी भरुण्डा विंध्यवासिनी ॥ १४७ ॥ ज्योतिर्भूता च जयदा ज्वाला मालासमाकुला ॥ भिन्ना भिन्नप्रकाशा च विभिन्ना भिन्नरूपिणी ॥१४८॥ अश्विनी भरणी चैव नक्षत्रसंभवान्विता ॥ काश्यपी विनता ख्याता दितिजा दितिरेव च ॥ १४९ ॥ कीर्तिः कामप्रिया देवी कीर्त्या कीर्तिविवर्द्धिनी ॥ सद्योमांससमालब्धा सद्यश्छिन्नासि शंकरा ॥ ॥ १५० ॥ दक्षिणा चोत्तरा पूर्वा पश्चिमा दिक्तथैव च ॥ अग्निनैर्ऋतिवायव्या ऐशान्यं दिक्तथा स्मृता ॥ १५१ ॥ ऊर्ध्वांगाधा गता श्वेता कृष्णा रक्ता च पीतका ॥ चतुर्वर्गा चतुर्वर्णा चतुर्मात्रात्मिकाक्षरा ॥ १५२ ॥ चतुर्मुखी चतुर्वेदा चतुर्विद्या चतुर्मुखा ॥ चतुर्गणा चतुर्माता चतुर्वर्गफलप्रदा ॥ १५३ ॥ धात्री विधात्री मिथुना नारी नायकवासनी ॥ सुरामुदा मोदवती मोदिनी मेनकात्मजा ॥ १५४ ॥ ऊर्द्ध्वकाली सिद्धिकाली दक्षिणा कालिका शिवा ॥ नील्या सरस्वती सत्त्वा बगला छिन्नमस्तका ॥ १५५ ॥ सर्वे

श्वरी सिद्धविद्या परा परमदेवता ॥ हिंगुलीं हिंगुलांगी च हिंगुलाधरवासिनी ॥ १५६ ॥ हिंगुलोत्तमवर्णाभा हिंगुलावरणा च सा ॥
जाग्रती च जगन्माता जगदीश्वरवल्लभा ॥ १५७ ॥ जनार्दनप्रिया देवी जययुक्ता जयप्रदा ॥ जगदानन्दकारी च जगदाह्लादकारिणी ॥
॥ १५८ ॥ ज्ञानदानकरी यज्ञा जानकी जनकप्रिया ॥ जयंती जयदा नित्या ज्वलदग्निसमप्रभा ॥ १५९ ॥ बिम्बाधरा च
बिम्बोष्ठी कैलासाचलवासिनी ॥ विभवा वडवाग्निश्च ह्यग्निहोत्रफलप्रदा ॥ १६० ॥ मंत्ररूपा परा देवी तथैव गुरुरूपिणी ॥ गया
गंगा गोमती च प्रभासा पुष्करापि च ॥ १६१ ॥ विंध्याचलरता देवी विंध्याचलनिवासिनी ॥ बहुर्बहुसुन्दरी च कंसासुरविना
शिनी ॥ १६२ ॥ शूलिनी शूलहस्ता च वज्रा वज्रधरापि च ॥ दुर्गा शिवा शांतिकरी ब्रह्माणी ब्राह्मणप्रिया ॥ १६३ ॥ सर्वलोक
प्रणेत्री च सर्वरोगहरापि च ॥ मंगला शोभना शुद्धा निष्कला परमा कला ॥ १६४ ॥ विश्वेश्वरी विश्वमाता ललिता वासितानना ॥
सदाशिवा उमा क्षेमा चण्डिका चण्डविक्रमा ॥ १६५ ॥ सर्वदेवमयी देवी सर्वागमभयापहा ॥ ब्रह्मेशविष्णुनमिता सर्वकल्याण
कारिणी ॥ १६६ ॥ योगिनी योगमाता च योगीन्द्रहृदयस्थिता ॥ योगिजाया योगवती योगीन्द्रानन्दयोगिनी ॥ १६७ ॥ इन्द्रादि
नमिता देवी ईश्वरी चेश्वरप्रिया ।। विशुद्धिदा भयहरा भक्तद्वेषिभयंकरी ॥ १६८ ॥ भगवेषा कामिनी च भरुण्डा भयकारिणी ॥ बल
भद्रप्रियाकारा संसारार्णवतारिणी ॥ १६९ ॥ पञ्चभूता सर्वभूता विभूतिर्भूतिधारिणी ॥ सिंहवाहा महामोहा मोहपाशविनाशिनी ॥
॥ १७० ॥ मन्दुरा मदिरा मुद्रा मुद्रामुद्गरधारिणी ॥ सावित्री च महादेवी परप्रियविनायका ॥ १७१ ॥ यमदूती च पिंगाक्षी वैष्णवी
शंकरी तथा ॥ चन्द्रप्रिया चन्द्ररता चन्दनारण्यवासिनी ॥ १७२ ॥ चन्द्रनेत्रसमायुक्ता चण्डदैत्यविनाशिनी ॥ सर्वेश्वरी यक्षिणी
च किराती राक्षसी तथा ॥ १७३ ॥ महाभोगवती देवी महामोक्षप्रदायिनी ॥ विश्वहंत्री विश्वरूपा विश्वसंहारकारिणी ॥ १७४ ॥
धात्री च सर्वलोकानां हितकारणकामिनी ॥ कमला सूक्ष्मदा देवी धात्री विनाशिनी ॥ १७५ ॥ सुरेन्द्रपूजिता सिद्धा महातेजोवतीति
च ॥ परा रूपवती देवी त्रैलोक्याकर्षकारिणी ॥ १७६ ॥ इति ते कथितं देवि पीतानामसहस्रकम् ॥ पठेद्वा पाठयेद्वापि सर्व

सिद्धिर्भवेत्प्रिये ॥ १७७ ॥ इति मे विष्णुना प्रोक्तं महास्तंभकरं परम् ॥ प्रातःकाले च मध्याह्ने संध्याकाले च पार्वति ॥ १७८ ॥
एकचित्तः पठेदेतत्सर्वसिद्धिर्भविष्यति ॥ एकवारं पठेद्यस्तु सर्वपापक्षयो भवेत् ॥ १७९ ॥ द्विवारं प्रपठेद्यस्तु विघ्नेश्वरसमो भवेत् ॥
त्रिवारं पठनाद्देवि सर्वं सिद्धयति सर्वथा ॥ १८० ॥ स्तवस्यास्य प्रभावेण साक्षाद्भवति सुव्रते ॥ मोक्षार्थी लभते मोक्षं धनार्थी लभते
धनम् ॥ १८१ ॥ विद्यार्थी लभते विद्यां तर्कव्याकरणान्विताम् ॥ महित्वं वत्सरान्ताच्च शत्रुहानिः प्रजायते ॥ १८२ ॥ क्षोणीपति
र्वशस्तस्य स्मरेण सदृशो भवेत् ॥ यः पठेत्सर्वदा भक्त्या श्रेयस्तु भवति प्रिये ॥ १८३ ॥ गणाध्यक्षप्रतिनिधिः कविः काव्यपरो वरः ॥
गोपनीयं प्रयत्नेन जननीजारवत्सदा ॥ १८४ ॥ हेतुयुक्तो भवेन्नित्यं शक्तियुक्तः सदा भवेत् ॥ य इदं पठते नित्यं शिवेन सदृशो भवेत्
॥ १८५ ॥ जीवन्धर्म्मार्थभोगी स्यान्मृतो मोक्षपतिर्भवेत् ॥ सत्यं सत्यं महादेवि सत्यं सत्यं न संशयः ॥ १८६ ॥ स्तवस्यास्यप्रभा
वेण देवेन सह मोदते ॥ सुचित्ताश्च सुराः सर्वे स्तवराजस्य कीर्त्तनात् ॥ १८७ ॥ पीताम्बरपरीधाना पीतगंधानुलेपना ॥ परमोदयकीर्तिः
स्यात्परतः सुरसुन्दरी ॥ १८८ ॥ इति श्रीउत्कटशम्बरे नागेन्द्रप्रयाणतंत्रे षोडशसाहस्त्रे विष्णुशंकरसंवादे पीताम्बरासहस्रनामस्तोत्रं
समाप्तम् ॥ श्रीगणेशाय नमः ॥ अथ बगलामुखीस्तोत्रप्रारंभः ॥ चलत्कनककुंडलोल्लसितचारुगण्डस्थलीं लसत्कनकचंपकद्युतिमदिंदु
बिंबाननाम् ॥ गदाहतविपक्षकां कलितलोलजिह्वांचलां स्मरामि बगलामुखीं विमुखवाङ्मनस्स्तंभिनीम् ॥१॥ पीयूषोदधिमध्यचारुविल
द्रक्तोत्पले मंडपे सत्सिंहासनमौलिपातितरिपुं प्रेतासनाध्यासिनीम् ॥ स्वर्णाभां करपीडितारिरसनां भ्राम्यद्गदां बिभ्रतीमित्थं ध्यायति
यांति तस्य सहसा सद्योऽथ सर्वापदः ॥ २ ॥ देवि त्वच्चरणांबुजार्चनकृते यः पीतपुष्पांजलीन्भक्त्या वामकरे निधाय च मनं मंत्री
मनोज्ञाक्षरम् ॥ पीठध्यानपरोऽथ कुंभकवशाद्बीजं स्मरेत्पार्थिवं तस्यामित्रमुखस्य वाचि हृदये जाड्यं भवेत्तत्क्षणात् ॥ ३ ॥ वादी ॥ ६१८॥
मूकति रंकति क्षितिपतिर्वैश्वानरः शीतति क्रोधी शाम्यति दुर्जनः सुजनति क्षिप्रानुगः खंजति ॥ गर्वी खर्वति सर्वविच्च जडति त्वन्मं
त्रिणा यंत्रितः श्रीर्नित्ये बगलामुखि प्रतिदिनं कल्याणि तुभ्यं नमः ॥ ४ ॥ मंत्रस्तावदलं विपक्षदलने स्तोत्रं पवित्रं च ते यंत्रं वादि

नियंत्रणं त्रिजगतां जैत्रं च चित्रं च ते ॥ मातः श्रीबगलेति नाम ललितं यस्यास्ति जंतोर्मुखे त्वन्नामग्रहणेन संसदि मुखे स्तंभो भवेद्वादिनाम् ॥ ५ ॥ दुष्टस्तंभनमुग्रविघ्नशमनं दारिद्र्यविद्रावणं भूभृत्संदमनं चलन्मृगदृशां चेतःसमाकर्षणम् ॥ सौभाग्यैकनिकेतनं समदृशः कारुण्यपूर्णेक्षणं मृत्योर्मारणमाविरस्तु पुरतो मातस्त्वदीयं वपुः ॥ ६ ॥ मातर्भंजय मद्विपक्षवदनं जिह्वां च संकीलय ब्राह्मीं मुद्रय दैत्यदेवधिषणामुग्रां गतिं स्तंभय ॥ शत्रूंश्चूर्णय देवि तीक्ष्णगदया गौरांगि पीतांबरे विघ्नौघं बगले हर प्रणमतां कारुण्यपूर्णेक्षणे ॥ ७ ॥ मातर्भैरवि भद्रकालि विजये वाराहि विश्वाश्रये श्रीविद्ये समये महेशि बगले कामेशि वामे रमे ॥ मातंगि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे दासोऽहं शरणागतः करुणया विश्वेश्वरि त्राहि माम् ॥ ८ ॥ संरंभे चौरसंघे प्रहरणसमये बंधने व्याधिमध्ये विद्यावादे विवादे प्रकुपितनृपतौ दिव्यकाले निशायाम् ॥ वश्ये वा स्तंभने वा रिपुवधसमये निर्जने वा वने वा गच्छंस्तिष्ठंस्त्रिकालं यदि पठति शिवं प्राप्नुयादाशु धीरः ॥ ९ ॥ त्वं विद्या परमा त्रिलोकजननी विघ्नौघसंछेदिनी योषित्कर्षणकारिणी जनमनःसम्मोहसंदायिनी ॥ स्तंभोत्सारणकारिणी पशुमनःसंमोहसंदायिनी जिह्वाकीलनभैरवी विजयते ब्रह्मादिमंत्रो यथा ॥ १० ॥ विद्या लक्ष्मी नित्यसौभाग्यमायुः पुत्रैः पौत्रैः सर्वसाम्राज्यसिद्धिः ॥ मानो भोगो वश्यमारोग्यसौख्यं प्राप्तं तत्तद्भूतलेऽस्मिन्नरेण ॥ ११ ॥ त्वत्कृते जपसन्नाहं गदितं परमेश्वरि ॥ दुष्टानां निग्रहार्थाय तद्गृहाण नमोऽस्तु ते ॥ १२ ॥ पीताम्बरां च द्विभुजां त्रिनेत्रां गात्रकोमलाम् ॥ शिलामुद्गरहस्तां च स्मरे तां बगलामुखीम् ॥ १३ ॥ ब्रह्मास्त्रमिति विख्यातं त्रिषु लोकेषु विश्रुतम् ॥ गुरुभक्ताय दातव्यं न देयं यस्य कस्य चित् ॥ १४ ॥ नित्यं स्तोत्रमिदं पवित्रमिह यो देव्याः पठत्यादराद्धृत्वा यंत्रमिदं तथैव समरे बाहौ करे वा गले ॥ राजानोऽप्यरयो मदान्धकरिणः सर्पा मृगेन्द्रादिकास्ते वै यांति विमोहिता रिपुगणा लक्ष्मीः स्थिरा सिद्धयः ॥ १५ ॥ इति श्रीरुद्रयामले तंत्रे श्रीबगलामुखीस्तोत्रं समाप्तम् ॥ अथ बगलामुखीशतनामस्तोत्रप्रारंभः ॥ नारद उवाच ॥ भगवन्देवदेवेश सृष्टिस्थितिलयात्मक ॥ शतमष्टोत्तरं नाम्नां बगलाया वदाधुना ॥ १ ॥ श्रीभगवानुवाच ॥ शृणु वत्स प्रवक्ष्यामि नाम्नामष्टोत्तरं शतम् ॥ पीतांबर्या महादेव्याः स्तोत्रं पापप्रणाशनम् ॥ २ ॥ यस्य प्रपठनात्सद्यो वादी मूको भवेत्क्षणात् ॥ रिपूणां स्तंभनं याति सत्यं सत्यं वदाम्य

हम् ॥ ३ ॥ ॐ अस्य श्रीपीताम्बराष्टोत्तरशतनामस्तोत्रस्य सदाशिव ऋषिः । अनुष्टुप्छंदः । श्रीपीताम्बरा देवता । श्रीपीताम्बराप्रीतये
पाठे विनियोगः ॥ ॐ बगला विष्णुवनिता विष्णुशंकरभामिनी ॥ बहुला वेदमाता च महाविष्णुप्रसूरपि ॥ १ ॥ महामत्स्या महा
कूर्म्मा महावाराहरूपिणी ॥ नारसिंहप्रिया रम्या वामना बटुरूपिणी ॥ २ ॥ जामदग्न्यस्वरूपा च रामा रामप्रपूजिता ॥ कृष्णा
कपर्दिनी कृत्या कलहा कलकारिणी ॥ ३ ॥ बुद्धिरूपा बुद्धभार्य्या बौद्धपाखण्डखण्डिनी ॥ कल्किरूपा कलिहरा कलिदुर्गति
नाशिनी ॥ ४ ॥ कोटिसूर्य्यप्रतीकाशा कोटिकन्दर्पमोहिनी ॥ केवला कठिना काली कला कैवल्यदायिनी ॥ ५ ॥
केशवी केशवाराध्या किशोरी केशवस्तुता ॥ रुद्ररूपा रुद्रमूर्ती रुद्राणी रुद्रदेवता ॥ ६ ॥ नक्षत्ररूपा नक्षत्रा नक्षत्रेशप्रपूजिता ॥ नक्ष
त्रेशप्रिया नित्या नक्षत्रपतिवन्दिता ॥ ७ ॥ नागिनी नागजननी नागराजप्रवंदिता ॥ नागेश्वरी नागकन्या नागरी च नगात्मजा ॥ ८ ॥
नगाधिराजतनया नगराजप्रपूजिता ॥ नवीना नीरदा पीता श्यामा सौन्दर्य्यकारिणी ॥ ९ ॥ रक्ता नीला घना शुभ्रा श्वेता
सौभाग्यदायिनी ॥ सुन्दरी सौभगा सौम्या स्वर्णाभा स्वर्गतिप्रदा ॥ १० ॥ रिपुत्रासकरी रेखा शत्रुसंहारकारिणी ॥ भामिनी च
तथा माया स्तंभिनी मोहिनी शुभा ॥ ११ ॥ रागद्वेषकरी रात्री रौरवध्वंसकारिणी ॥ यक्षिणी सिद्धनिवहा सिद्धेशा सिद्धि
रूपिणी ॥ १२ ॥ लंकापतिध्वंसकरी लंकेशी रिपुवंदिता ॥ लंकानाथकुलहरा महारावणहारिणी ॥ १३ ॥ देवदानवसिद्धौघपूजिता
परमेश्वरी ॥ पराणुरूपा परमा परतंत्रविनाशिनी ॥ १४ ॥ वरदा वरदाराध्या वरदानपरायणा ॥ वरदेशप्रिया वीरा वीरभूषण
भूषिता ॥ १५ ॥ वसुदा बहुदा वाणी ब्रह्मरूपा वरानना ॥ बलदा पीतवसना पीतभूषणभूषिता ॥ १६ ॥ पीतपुष्पप्रिया पीत
हारा पीतस्वरूपिणी ॥ इति ते कथितं विप्र नाम्नामष्टोत्तरं शतम् ॥ १७ ॥ यः पठेत्पाठयेद्वापि शृणुयाद्वा समाहितः ॥ तस्य शत्रुः
क्षयं सद्यो याति नैवात्र संशयः ॥ १८ ॥ प्रभातकाले प्रयतो मनुष्यः पठेत्सुभक्त्या परिचिन्त्य पीताम् ॥ द्रुतं भवेत्तस्य समस्तबुद्धि
विनाशमायाति च तस्य शत्रुः ॥ ११ ॥ इति श्रीविष्णुयामले नारदविष्णुसंवादे श्रीबगलाष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥ इति श्रीमंत्र
महार्णवे मध्यखण्डे बगलातंत्रे एकादशस्तरंगः ॥ ११ ॥ ॥ ॥ ॥ ॥ ॥

श्रीमातङ्ग्यै नमः ।





॥ श्रीगणेशाय नमः ॥ अथ मातंगीतंत्रप्रारंभः ॥ तत्रादौ पटलप्रारंभः ॥ अथ वक्ष्ये महादेवीं मातंगीं सर्वसिद्धिदाम् ॥ अस्याः पूजनमात्रेण वाक्सिद्धिं लभते ध्रुवम् ॥ १ ॥ अथ द्वात्रिंशदक्षरो मातंगीमंत्रप्रयोगः ॥ मंत्रमहोदधौ मंत्रो यथा—ॐ ह्रीं ऐं श्रीं नमो भगवति उच्छिष्टचांडालि श्रीमातंगेश्वरि सर्वजनवशंकारि स्वाहा॥इति द्वात्रिंशदक्षरो मंत्रः॥अस्य विधानम्—अस्य मंत्रस्य मतंग ऋषिः । अनुष्टुप्छंदः । मातंगी देवता । ममाभीष्टसिद्ध्यर्थे जपे विनियोगः॥ॐ मतंगऋषये नमः शिरसि १ । अनुष्टुप्छंदसे नमः मुखे २ । मातंगीदेवतायै नमो हृदि ३ । विनियोगाय नमः सर्वांगे ४॥ इति ऋष्यादिन्यासः ॥ ॐ ह्रीं ऐं श्रीं अंगुष्ठाभ्यां नमः १ । नमो भगवति तर्जनीभ्यां नमः २ । उच्छिष्टचांडालि मध्यमाभ्यां नमः । श्रीमातंगेश्वरि अनामिकाभ्यां नमः ४ । सर्वजनवशंकारि कनिष्ठिकाभ्यां नमः ५ । स्वाहा करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ॐ ह्रीं ऐं श्रीं हृदयाय नमः १ । नमो भगवति शिरसे स्वाहा २ । उच्छिष्टचांडालि शिखायै वषट् ३ । श्रीमातंगेश्वरि कवचाय हुम् ४ । सर्वजनवशंकारि नेत्रत्रयाय वौषट् ५ । स्वाहा अस्त्राय फट् ॥ इति हृदयादिषडंगन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम्—ॐ घनश्यामलांगीं स्थितां रत्नपीठे शुकस्योदितं शृण्वतीं रक्तवस्त्राम् ॥ सुरापानमत्तां सरोजस्थितां श्रीं भजे वल्लकीं वादयंतीं मतंगीम् ॥ १ ॥ इति ध्यायेत् ॥ ततः पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य 'ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः' इति मंत्रेण पीठदेवताः संपूज्य नव पीठशक्तीः

पूजयेत्। तद्यथा पूर्वादिक्रमेण अष्टसु दिक्षु ॐ विभूत्यै मातंग्यै नमः १ । ॐ उन्नत्यै मातंग्यै नमः २ । ॐ कांत्यै मातंग्यै नमः ३ । ॐ सृष्ट्यै मातंग्यै नमः ४। ॐ कीर्त्यै मातंग्यै नमः ५ । ॐ सन्नत्यै मातंग्यै नमः ६ । ॐ व्युष्ट्यै मातंग्यै नमः ७ । ॐ उत्कृष्ट्यै मातंग्यै नमः ८ । मध्ये ॐ ऋद्ध्यै मातंग्यै नमः ९ ॥ इति पीठशक्तीः संपूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण प्रोञ्छ्य 'ॐ ह्रीं सर्वशक्तिकमलासनाय नमः' इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्य्यात् ॥ तद्यथा–पुष्पांजलिमादाय–ॐ संविन्मये परे देवि परामृतरसप्रिये ॥ अनुज्ञां देहि मातंगि परिवारार्चनाय मे ॥ ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घाद्बिंदुं निक्षिप्य पजितास्तर्पिताः संतु इति वदेत् ॥ इत्याज्ञां गृहीत्वा आवरणपूजां कुर्य्यात् ॥ तत्र त्रिकोणे ॐ ह्रीं ऐं श्रीं रत्यै मातंग्यै नमः श्रीपादुकां पूजयामि तर्पयामि नमः । इति सर्वत्र ॥ १ ॥ ॐ ह्रीं ऐं श्रीं प्रीत्यै मातंग्यै नमः। प्रीतिश्रीपा० २ । ॐ ३ ह्रीं ऐं श्रीं मनोभवायै मातंग्यै नमः। मनोभवाश्रीपा० ३ । इति पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य–अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्प्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घाद्बिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदन् पुष्पांजलिं दद्यात् ॥ इति प्रथमावरणम् ॥ १ ॥ ततः षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च ॐ ह्रीं ऐं श्रीं हृदयाय नमः । हृदयश्रीपा० १ । नमो भगवति शिरसे स्वाहा । शिरःश्रीपा० २ । उच्छिष्टचांडालि शिखायै वषट् । शिखाश्रीपा० ३ । श्रीमातंगेश्वरि कवचाय हुम् । कवचश्रीपा० ४ । सर्वजनवशंकरि नेत्रत्रयाय वौषट् । नेत्रत्रयश्रीपा० ५ । स्वाहाऽस्त्राय फट् । अस्त्रश्रीपा० ६ ॥ इति षडंगानि पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततोऽष्टदलेषु पूज्यपूजकयोरंतरालं प्राची तदनुसारेणान्या दिशः प्रकल्प्य प्राचीक्रमेण ॐ ह्रीं ऐं श्रीं ब्राह्म्यै मातंग्यै नमः । ब्राह्मीश्रीपा० १ । ॐ ह्रीं ऐं श्रीं माहेश्वर्यै मातंग्यै

नमः । माहेश्वरीश्रीपा० २ । ॐ ह्रीं ऐं श्रीं कौमार्यै मातंग्यै नमः । कौमारीश्रीपा० ३ । ॐ ह्रीं ऐं श्रीं वैष्णव्यै मातंग्यै नमः । वैष्णवीश्रीपा० ४ । ॐ ह्रीं ऐं श्रीं वाराह्यै मातंग्यै नमः । वाराहीश्रीपा० ५ । ॐ ह्रीं ऐं श्रीं इन्द्राण्यै मातंग्यै नमः । इन्द्राणी श्रीपा० ६ । ॐ ह्रीं ऐं श्रीं चामुंडायै मातंग्यै नमः । चामुंडाश्रीपा० ७ । ॐ ह्रीं ऐं श्रीं महालक्ष्म्यै मातंग्यै नमः । महालक्ष्मीश्रीपा० ८ ॥ इत्यष्टौ शक्तीः पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततोऽष्टदलेषु द्वितीयेषु प्राचीक्रमेण ॐ ह्रीं ऐं श्रीं असितांगभैरवाय मातंग्यै नमः । असितांगभैरवश्रीपा० १ । ॐ ह्रीं ऐं श्रीं रुरुभैरवाय मातंग्यै नमः । रुरुभैरवश्रीपा० २ । ॐ ह्रीं ऐं श्रीं चंडभैरवाय मातंग्यै नमः । चंडभैरवश्रीपा० ३ । ॐ ह्रीं ऐं श्रीं क्रोधभैरवाय मातंग्यै नमः । क्रोधभैरवश्रीपा० ४ । ॐ ह्रीं ऐं श्रीं उन्मत्तभैरवाय मातंग्यै नमः । उन्मत्तभैरवश्रीपा० ५ । ॐ ह्रीं ऐं श्रीं कपालभैरवाय मातंग्यै नमः । कपालभैरवश्रीपा० ६ । ॐ ह्रीं ऐं श्रीं भीषणभैरवाय मातंग्यै नमः । भीषणभैरवश्रीपा० ७ । ॐ ह्रीं ऐं श्रीं संहारभैरवाय मातंग्यै नमः । संहारभैरवश्रीपा० ॥८॥ इत्यष्टौ भैरवान् पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति चतुर्थावरणम् ॥ ४ ॥ ततः षोडशदलेषु प्राचीक्रमेण–ॐ ह्रीं ऐं श्रीं वामायै मातंग्यै नमः । वामाश्रीपा० १ । ॐ ह्रीं ऐं श्रीं ज्येष्ठायै मातंग्यै नमः । ज्येष्ठाश्रीपा० २ । ॐ ह्रीं ऐं श्रीं रौद्र्यै मातंग्यै नमः । रौद्री श्रीपा० ३ । ॐ ह्रीं ऐं श्रीं शांत्यै मातंग्यै नमः । शांतिश्रीपा० ४ । ॐ ह्रीं ऐं श्रीं श्रद्धायै मातंग्यै नमः । श्रद्धाश्रीपा० ५ । ॐ ह्रीं ऐं श्रीं माहेश्वर्यै मातंग्य नमः । माहेश्वरीपा० ६ । ॐ ह्रीं ऐं श्रीं क्रियायै मातंग्यै नमः । क्रियाश्रीपा० ७ । ॐ ह्रीं ऐं श्रीं लक्ष्म्यै मातंग्यै नमः । लक्ष्मीश्रीपा० ८ । ॐ ह्रीं ऐं श्रीं सृष्ट्यै मातंग्यै नमः । सृष्टिश्रीपा० ९ । ॐ ह्रीं ऐं श्रीं मोहिन्यै मातंग्यै नमः । मोहिनीश्रीपा० १० । ॐ ह्रीं ऐं श्रीं प्रमथायै मातंग्यै नमः । प्रमथाश्रीपा० ११ । ॐ ह्रीं ऐं श्रीं श्वासिन्यै मातंग्यै नमः । श्वासिनी श्रीपा० १२ । ॐ ह्रीं ऐं श्रीं विद्युल्लतायै मातंग्यै नमः । विद्युल्लताश्रीपा० १३ । ॐ ह्रीं ऐं श्रीं सुंदर्यै मातंग्यै नमः । सुंदरी श्रीपा० १४ । ॐ ह्रीं ऐं श्रीं नंदायै मातंग्यै नमः । नंदाश्रीपा० १५ । ॐ ह्रीं ऐं श्रीं नंदबुद्ध्यै मातंग्यै नमः । नंदबुद्धिश्रीपा० १६ ।

मातङ्गीद्वात्रिंशदक्षरमन्त्रयन्त्रम् ।





॥१२३॥

म० म० इति षोडश पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति पंचमावरणम् ॥ ५ ॥ ततो भूपुराभ्यंतरे चतुर्दिक्षु प्राचीक्रमेण ॐ ह्रीं ऐं म० खं० १
श्रीं मातंग्यै मातंग्यै नमः । मातंगीश्रीपा० १। ॐ ह्रीं ऐं श्रीं महामातंग्यै मातंग्यै नमः। महामातंगीश्रीपा० २। ॐ ह्रीं ऐं श्रीं मातं० त०
॥६२२॥ महालक्ष्म्यै मातंग्यै नमः। महालक्ष्मीश्रीपा० ३। ॐ ह्रीं ऐं श्रीं सिद्ध्यै मातंग्यै नमः । सिद्धिश्रीपा० ४ । आग्नेय्यादिविदिक्षु च ॐ तरं० १२
ह्रीं ऐं श्रीं विघ्नेशाय मातंग्यै नमः। विघ्नेशश्रीपा० १। ॐ ह्रीं ऐं श्रीं दुर्गायै मातंग्यै नमः । दुर्गाश्रीपा० २। ॐ ह्रीं ऐं श्रीं बटुकाय
मातंग्यै नमः । बटुकश्रीपा० ३। ॐ ह्रीं ऐं श्रीं क्षेत्रपालाय मातंग्यै नमः। क्षेत्रपालश्रीपा० ४ ॥ इत्यष्टौ द्वारपालान् पूजयित्वा पुष्पांजलिं
दद्यात् ॥ इति षष्ठावरणम् ॥ ६ ॥ ततो भूपुराद्बहिः पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च एवमेव संपूज्य पुष्पां
जलिं दद्यात् ॥ इति सप्तमावरणम् ॥ ७ ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्य्यात् ॥ अस्य पुरश्चरणमयुत
जपः । मध्वक्तैर्मधुपुष्पैर्दशांशतो होमः । तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्य्यात् ॥ एवं कृते मंत्रः सिद्धो भवति । सिद्धे
मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च–जपोऽयुतं सहस्रं तु होमः पुष्पैर्मधूकजैः ॥ मध्वक्तैः पूजयेत्पीठं वक्ष्यमाणविधानतः ॥ १ ॥
एवं यः पूजयेत्तस्य सिद्धिरित्थं मनोर्भवेत् ॥ मल्लिकाकुसुमैर्होमाद्योगो राज्यं च बिल्वजैः ॥ २ ॥ पत्रैः फलैर्वा वश्या स्याज्जनता
ब्रह्मवृक्षजः ॥ रोगनाशोऽमृताखंडैर्निंबैः श्रीस्तंडुलैरपि ॥ ३ ॥ आकृष्टिं लवणैर्विद्यात्तगरैर्वेतसैर्जलम् ॥ लवणैर्निंबतैलाक्तैः शत्रुनाशो
ऽन्धसोऽशनम् ॥ ४ ॥ निशाचूर्णयुतैर्लोणैर्होमात्स्यात्स्तंभनं नृणाम् ॥ रक्तचंदनकर्पूरमांसीकुंकुमरोचनैः ॥ ५ ॥ चंदनागुरुकर्पूरै
र्गंधाष्टकमुदीरितम् ॥ एतद्धोमाज्जगद्वश्यं जायते मंत्रिणो ध्रुवम् ॥ ६ ॥ एतत्पिष्ट्वा शतं जप्त्वा तिलकेन जगत्प्रियः ॥ कदलीफल
होमेन सर्वेष्टं समवाप्नुयात् ॥ किं बहूक्तेन मातंगी पूजिता कामदा नृणाम् ॥ ७ ॥ मध्वक्तलोणरचितां पुत्तलीं दक्षिणांघ्रितः ॥ हुत्वा ॥६२२॥
दष्टोत्तरशतं खादिराग्नौ वशं निशि ॥ ८ ॥ शालिपिष्टमयीं तां तु भक्षयेत्स्त्रीवशीकृतौ ॥ कृष्णभूतनिशि ध्वांक्षोदरे क्षिप्त्वा समुद्र
जम् ॥ ९ ॥ नीलसूत्रेण संवेष्ट्य चिताग्नौ प्रदहेदमुम् ॥ सहस्रजप्तं तद्भस्म यस्मै दद्यात्स दासवत् ॥ १० ॥ इति द्वात्रिंशदक्षर

मातंगीमंत्रप्रयोगः ॥ अथ मातंगीभेदे लघुश्यामामंत्रप्रयोगः ॥ मंत्रमहादधौ मंत्रो यथा—ऐं नम उच्छिष्टचांडालि मातंगि सर्ववशंकारि स्वाहा ॥ इति विंशत्यक्षरो मंत्रः ॥ अस्य विधानम्—अस्य लघुश्यामामंत्रस्य मदन ऋषिः। निचृद्गायत्री छंदः। देवी लघुश्यामा देवता। ऐं बीजम्। स्वाहा शक्तिः। ममाखिलाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ मदनऋषये नमः शिरसि १। निचृद्गायत्रीच्छंदसे नमः मुखे २। देवीलघुश्यामादेवतायै नमः हृदि ३। ऐं बीजाय नमः गुह्ये ४। स्वाहाशक्तये नमः पादयोः ५। विनियोगाय नमः सर्वांगे ६॥ इति ऋष्यादिन्यासः ॥ ऐं रत्यै नमः मूर्ध्नि १। ह्रीं प्रीत्यै नमो हृदि २। क्लीं मनोभवायै नमः पादयोः ३। ऐं इच्छाशक्त्यै नमो मुखे ४। ह्रीं ज्ञानशक्त्यै नमः कंठे ५। क्लीं क्रियाशक्त्यै नमो लिंगे ६ ॥ इति विन्यसेत् ॥ ततो द्रां द्रावणबाणाय नमः शिरसि १। द्रीं शोषणबाणाय नमो मुखे २। क्लीं तापनबाणाय नमो हृदि ३। ब्लूं मोहनबाणाय नमो गुह्ये ४। सः उन्मादनबाणाय नमः पादयोः ५ ॥ इति बाणन्यासः ॥ ऐं नमः अंगुष्ठाभ्यां नमः १। उच्छिष्ट तर्जनीभ्यां नमः २। चांडालि मध्यमाभ्यां नमः ३। मातंग्यनामिकाभ्यां नमः ४। सर्ववशंकारि कनिष्ठिकाभ्यां नमः ५। स्वाहा करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ऐं नमः हृदयाय नमः १। उच्छिष्ट शिरसे स्वाहा २। चांडालि शिखायै वषट् ३। मातंगि कवचाय हुम् ४। सर्ववशंकारि नेत्रत्रयाय वौषट् ५। स्वाहा अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ आं क्षां ब्राह्मीकन्यकायै नमो मूर्ध्नि १। ईं लां माहेश्वरीकन्यकायै नमो वामांसे २। ऊं हां कौमारीकन्यकायै नमो वामपार्श्वे ३। ऋं सां वैष्णवीकन्यकायै नमः नाभौ ४। लृं षां वाराहीकन्यकायै नमो दक्षपार्श्वे ५। ऐं शां इन्द्राणीकन्यकायै नमः दक्षांसे ६। औं वां चामुंडाकन्यकायै नमः ककुदि ७। अः लां महालक्ष्मीकन्यकायै नमो हृदि ८॥ इति मातृकान्यासः ॥ ॐ ऐं अणिमासिद्धिकन्यकायै नमो ललाटे १। ॐ ऐं महिमासिद्धिकन्यकायै नमः भ्रूमध्ये २। ॐ ऐं लघिमासिद्धिकन्यकायै नमः कंठे ३। ॐ ऐं गरिमासिद्धिकन्यकायै नमो हृदि ४। ॐ ऐं असितासिद्धिकन्यकायै नमः नाभौ ५। ॐ ऐं वशितासिद्धिकन्यकायै नमः आधारे ६। ॐ ऐं प्राकाम्यसिद्धिकन्यकायै नमो लिंगे ७। ॐ ऐं प्राप्तिसिद्धिकन्यकायै नमो

मातंगीविंशत्यक्षरीमन्त्रपूजनयन्त्रम् ।

